Acharya Vidyapeetham Series

Uttarachampuprabhandha

by

Kavi Venkatadwari

Foreword

by

Sri U. Ve. M.S. Narasimhacharya

भूमिका by

Dr. Sri U. Ve. V. Krishnaswamy Iyengar

Comments by

Sri U. Ve. Krishnathathacharya

Edited with introduction and commentary

By

Kumaravadi S. Ananthachari

ACHARYA VIDYAPEETHAM

New Delhi

1974

(Complimentary Release)

Acharya Vidyapeetham Series

Uttarachampuprabhandha

by

Kavi Venkatadwari

Foreword

by

Sri U. Ve. Melma Narasimhacharya

भूमिका by

Dr. Sri U. Ve. V. Krishnaswamy Iyengar

Comments by

Sri U. Ve. Krishnathathacharya

Edited with introduction and commentary

By

Kumaravadi S. Ananthachari

ACHARYA VIDYAPEETHAM

New Delhi

1974

(Complimentary Release)

CONTENTS

1.	Preface	३
2.	Introduction	४
3.	Foreword	५ - ७
4.	Bhumika	८ - ३७
5.	Comments of Sri Krishnathathacharya	३८
6.	Vishayanukramanika of Uttarachampuprabhanda	१ - २
7.	Uttarachampuprabhanda with text & commentary	१-१५२
8.	Errata Page	१५३

श्रीहयग्रीवाय नमः

प्राची संध्या काचीदन्तर्निशायाः प्रज्ञाधृष्टेरञ्जनश्रीरपूर्वा।
वक्त्री वेदान् भातु मे वाजिवक्त्रा वागीशाख्या वासुदेवस्य मूर्तिः।

श्रीलक्ष्मीहयवदनः

व्याख्यामुद्रां करसरसिजैः पुस्तकं शङ्खचक्रे
बिभ्रद्भिन्नस्फटिकरुचिरे पुण्डरीके निषण्णः ।
अम्लानश्रीरमृतविशदैरंशुभिः प्लावयन्मां
आविर्भूयादनघमहिमा मानसे वागधीशः ।।

(हयग्रीवस्तोत्रम्)

श्रीमते निगमान्तमहादेशिकाय नमः

सशङ्खचक्रलाञ्छनः सदूर्ध्वपुण्ड्रमण्डितः
सकण्ठलग्नसत्तुलस्यनर्घपद्ममालिकः ।
सितान्तरीयसूत्तरीययज्ञसूत्रशोभितो
ममाविरस्तु मानसे गुरुस्य वेङ्कटेश्वरः ।।

(सप्ततिरत्नमालिका)

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्त महादेशिकाय नमः

श्री श्रीनिवास महादेशिकाय नमः

श्री वीरराघवार्य महादेशिकाय नमः

श्रीलक्ष्मीतुरगास्यलास्यविभवस्थानियतास्याम्बुज
श्रीश्रीवासयतीन्द्र दिव्यकरुणासद्वीक्षणैकास्पदम् ।
श्रीमद्वीररघूत्तमंगुणगणैः सद्विध्यथाप्युन्नतं
नित्यं श्रेयसिदीक्षितं नतजनेभक्त्यानतोहंभजे ।।

'कुमारवाडिस्वामी'ति विख्याताः वङ्गीपुरं
छन्दोग श्रीश्रीनिवासाचार्याः

एषां श्रीमन्निगमान्तमहादेशिकचरणारविन्दयोः
अचञ्चलां भक्तिमनवरतं स्मर्तुं एभ्यः पितृचरणेभ्य एव,
ग्रन्थोऽयं समर्प्यते
एतच्चरणारविन्दसेवासंप्राप्तव्युत्पत्तिकेन
संपादकेन अनन्तदासेन

श्रीदेवाधिराजपरब्रह्मणे नमः



श्री वरदराजः(उत्सवमूर्तिः)

देवीभूषणहेत्यादिजुष्टस्य भगवंस्तव ।
नित्यं निरपराधेषु कैंकर्येषु नियुंक्ष्व माम् ।।

(न्यासदशकम्)

निरन्तरं निर्विशतस्त्वदीयमस्पृष्टचिन्तापदमाभिरूप्यम् ।
सत्यं शपे वारणशैलनाथ वैकुण्ठवासेऽपि न मेऽभिलाष :।।

(वरदराजपञ्चाशत्)

श्रीवेङ्कटेश परब्रह्मणे नमः



क्षमप्यनवधिं वन्दे करुणावरुणालयम् ।
वृषशैलतटस्थानां स्वयं व्यक्तिमुपागतम् ।।

(दयाशतकम्)

PREFACE

'उत्तरचम्पूप्रबन्ध' is a composition of Kavi Venkatadwari, the renowned South Indian poet of the seventeenth century, who was well-versed in all arts and sciences and also had good instinct for poetry. His works number more than 14, among which the two famous compositions 'विश्वगुणादर्श' and 'लक्ष्मीसहस्र' have earned for him a peerless fame and unique place in the world of Sanskrit Literature.

The present publication of mine popularly known as 'Uttara Champu' is a classical masterpiece written in a fascinating and sweet blend of prose-poetry genre (Champu) closely following the Uttara Kanda of Valmiki.The poet portrays the birth and exploits of the three important characters Ravana, Vali, and Hanuman in a charming style with loftiness in conception and matchless imagery.

A running commentary with profuse quotations from the text as well as other excellent works of the poet, figures in Dr. V. Krishanswamy Iyengar's "भूमिका" of 37 pages. I am very grateful to Prof. V. Krishnaswamy Iyengar of Bangalore for writing the "भूमिका"

I am deeply indebted to Sri. U. Ve. M.S. Narasimhacharya, Pondicherry for his lucid comments in Sanskrit.

My thanks are due and hereby accorded to Nyayaveda Shiromani U.Ve. Sri. Krishnathathacharya for his comments in Sanskrit.

I had recently been to the three Oriental MMS libraries at Mysore, Tirupathi and Madras and was able to secure full text. I accord my sincere thanks to them.

I am very grateful to Lakherwal Press, New Delhi - 5 for their continuous cooperation in bringing out this edition.

Editor

INTRODUCTION

Encouraged by the appreciation of my earlier two publications 'वेदान्ताचार्यविजयचम्पू' and 'विरक्तिगुरुवरसप्तति' with my commentary, I have undertaken to bring this out. Two more outstanding works of the same poet ' प्रध्युम्नानन्द '(drama) and ' आचार्यपञ्चाशत ' hitherto unpublished in Devanagari Script with elaborate commentaries are under preparation.

Moreover I undertake to publish only such works as occupy a high place in the field of Sanskrit Literature and have not been brought out in Devanagari script with full commentaries.

Eighty five years back, this work was printed in Telugu script with a small gloss. Early this century, Gopal Narayan & Sons of Bombay tried to print it in Devanagari but could do only two thirds of the book with intermittent blanks and that too, only the text.

This is the first time that a Champu is brought out in Devanagari with elaborate Commentary and Introduction.

The book is brought out with comments by late Prof. Krishnaswamy Thathacharya, Foreword by U.Ve.M.S. Narasimha charya, elaborate Bhoomica by Dr. Krishnaswamy Iyengar, my introduction in English with elaborate text and commentary in Sanskrit.

EDITOR

FOREWORD

श्रीवेदान्ताचार्यविजयाभिध आचार्यचम्पूग्रन्थः समदृश्यताचार्यविद्यापीठेन नवदेहलीपुरस्थापितेन प्रकाशितः। अत्र प्रतिपाद्यतया गृहीतो विषयः श्रीन्निगमान्तमहादेशिकाख्यया प्रसिद्धस्य, विशिष्टाद्वैतसिद्धान्तप्रतिष्ठापकाचार्यवरस्य चरित्रम्। अतएवायं ग्रन्थः 'आचार्यचम्पूः' इत्यनितरसाधारणीं प्रथामश्नुते। यदाहुः श्रीमन्तो महाचार्याः 'देशिको निगमान्तार्यात्..... अन्यो नास्ति नास्ति महीतले' इति । कवितार्किकसिंहाभिख्यो विबुधश्रेष्ठः कविप्रवरो यां चम्पूं निबध्नन् आन्मांन कृतार्थयति। अतिप्रौढोऽयं कविस्तत्र तत्र वर्णने कादम्बरीकतारं भट्टबाणमनुकरोति। श्रुतिस्मृति पुराणतर्कव्याकरणमीमांसावेदान्तादिषु निरुढान् विषयांस्तत्र तत्र घटयन् अतिमहान्तं प्रमोदं पठितणामावहतीति प्रत्यक्षमेवैतदनुभविनाम् एतादृशस्यातिप्रौढस्य ग्रन्थस्य विना व्याख्यासाहाय्यं याथार्थ्यावबोधो न सुलभः। इदमेव मनसिकृत्य कुमारवाडिस्वामीति विख्यातछन्दोग श्रीनिवासाचार्यबुध वरतनयैराचार्य भक्तिरसिकैः श्रीमदनन्ताचार्यैरावश्यक कविवरणस्थलीयार्थावबोधनाय प्रणीता टीका पठितृणामत्यन्तसुखावबोधिनी नितान्तललिता च चकास्ति। अतिगभीरायाश्चास्या आचार्यचम्प्वा व्याख्यानं न सामान्यतो लब्धपाण्डित्येन कर्तुं शक्यते। यत्र लोकसर्वशास्त्रव्यवहाराणां संप्रदायज्ञानस्य चात्यन्तमपेक्षावश्यक्यस्ति। तादृशीयं टीका श्रीमदनन्ताचार्य कृतावश्यापेक्षित सर्वांश बोधनकरी सहृदयहृदयङ्ग.-मा च वरीवर्ति। अत्र चानन्ताचार्याः अलङ्क.ारविशेषान् क्वचित्। . .ाकरणप्र.क्रियां मीमांसाशास्त्रविषयसंग्रहं च कुर्वन्तः ।टीकामिमामुज्ज्वलयन्ति । विस्तृतया च यदि श्रीमन्तो व्याख्यां कृतवन्तः स्युः तदा संस्कृतभाषापरिचिचीषूणा मितोऽप्यधिकतरमुपकारं कृतवन्तो भवेयुरिति चैतद्दर्शने मनसि स्फुरति। लौकिकाधिकार पदं निर्वहन्तोऽपीमे अनन्ताचार्या अस्तिकाग्रेसराः नवदेहली नगरे समितिं कांचन विधाय सांप्रदायिकग्रन्थ प्रचारादिषु प्रवृत्तिं निदधानाः स्वयमेवैतादृशग्रन्थस्य व्याख्यानं च विदधतः संस्कृताभिज्ञ जनतयाः विशिष्य विशिष्टाद्वैतसिद्धान्तिनां चातीवोपकृतिमातन्वन्तीति नितान्तं प्रमोदस्थानमेतत्।

प्रसङ्गादिदं ज्ञाप्यते, न दोषदृष्टया, यदत्र च शोधनीयतया प्रतिभाति किंचित्। 178 तमे पुटे 'बुधेर्णिजि लुङ्' इत्युपलभ्यते। अत्र 'बुधेर्लुङिचिण्' इति युक्तम्' 199 पुटेश्लोकात्मका' इतिदृश्यते। तत्र' श्लोकात्मिका' इत्युचितम् । 202 पुटे समयन् सम इवाचरन्नित्यर्थः इति समीक्ष्यते। तत्र समं कुर्वन्' इति समुचितम्। आचारार्थे सति विवक्षिते 'कर्तुःक्यङ्' इति सूत्रेण 'समायते' इति रुपं भवति, तस्माच्च शानचि 'समायमानः ' इत्येव स्यात्।क्विपि च शतरि 'समन्' इति स्यात्। अतः 'तत्करोति तदाचष्टे' इति करोत्यर्थे णिचि इष्ठवदावाट्टिलोपे शतरि 'समयन्' इति रुपं साधु''

एवमेतादृशप्राचीनसांप्रदायिकग्रन्थप्रचारव्याख्यानादिष्वव वहितचित्रानां श्रीमदनन्ताचार्याणामाचार्यानुग्रहविशेषेण भगवत्कटाक्षविशेषेण चेतोऽप्यध्किकतरः समुत्साहः तदु चितशरिारोग्यादिसमस्तसौकर्य च संपद्यतामित्याशास्महे ।।

इत्थम्

मे. श्री. नरसिंहाचार्यः
व्याकरणशिरोमणिः, उभयवेदान्तविद्वान्,
प्रेञ्च्भारतीयकलाविमर्शालये विमर्शकः
30.11.1974

श्रीमद्वेङ्कटाध्वरिणा विरचिताया उत्तरचम्प्वा भूमिका समैक्ष्यत। अस्मच्छोधितप्रकाशित राघवयाद्ववीयभूमिकायां संग्रहेणोक्तो विषयोऽत्र भूमिकायां श्रीमद्वेङ्कटाध्वरिग्रन्थानामेकैकश। आदाय तत्र तत्र विद्यमाना विशेषास्तत्र च वेङ्क. टाध्वरिणः श्रीमन्निगमान्तमहादेशिकानुसारित्वं तदवत्यतिय इत्यादिकमतिविस्तरेण प्रतिपादितं दरीदृश्यते । विमर्शसरणिः समीचीनैवोपलभ्यते। अत्र भूमिकायां 16 पुटे ''श्रीमान् वेदान्तदेशिकः । लक्ष्मीम् 'अनुग्रहमयीं वन्दे नित्यमज्ञातनिग्रहाम् इति वर्णयामास । तदनुसृत्यासौ ग्रन्थकारोऽपि ।

'श्रये शेषाचलमणेः शार्ङ्गिणो हृदयङ्गमाम् अनुकम्पामिवाकम्पामम्बामम्बुजवासिनीम्' इति सानुप्रासैः सूनृतैर्वचनैरभिष्टौति'' इत्यस्ति। एतदपेक्षया दयाशतके 'समस्तजननीं वन्दे चैतन्यस्तन्यदायिनीम्। श्रेयसीं श्रीनिवासस्य करुणामिव रुपिणीम्'' इत्यस्यानुसार इति कथनं युक्ततरं प्रतीमः।।

इत्थम्

मे श्री. नरसिंहाचार्यः

30.11.1974

दयचम्पूः, प्रद्युम्नानन्दम् लक्ष्मीसहस्रम् विधित्रयपरित्राणम्, विश्वगुणादर्शः चेत्यमी ग्रन्थाः प्रकाशिताः प्रथन्ते। आचार्यपञ्चाशत् तु श्रीमन्निगमान्त महादेशिकस्तात्ररूपा कृतिरस्य प्रन्थकारस्य तस्मिन्नाचार्यसार्वभौमे महीयसी भक्तिमुद्द्योतयति। विश्वगुणादर्शचम्पूग्रन्थेपि श्रीमद्वेदान्तदेशिकाचार्यवर्णनप्रसङ्गे कवेस्तस्मिन्नाचार्यवर्येऽनितरसाधारणी भक्तिः प्रकटतां नीता द्रष्टव्या। तथाहि कविरत्र वर्णयति –

नानाम्नायपरिश्रमं कलयतां नास्त्येव शास्त्रेषु धीः
सत्योरप्युभयोस्तयोर्न सुलभा सा हि क्षितौ साहिती।
अप्येतासु सतीषु नास्ति विनयो नाचारभक्तिक्षमा–
चातुर्यः स च सा च सा च स च ताश्चालम्ब्य खेलन्त्यमुम्।।

(श्लोकः 291)

निशामयति यः किल दृशा निशामयत्यङ्घ्रिणा च यो विश्वम्।
गजतुरगौ वदने यौ तैः सह वेदान्तदेशिको गण्यः।।

(श्लोकः 296)

अर्वन्तमास्ये तमुपास्य देवं गर्वं तमोजं कुदृशां प्रशान्तम्।
कुर्वन्तमेकं गुरूमन्तरेण गुर्वन्तरं कोत्र गुणी वृणीते? ॥

(श्लोकः 292)

इति। लक्ष्मीसहस्रकाव्येपि प्रारमभस्तबके

''दद्यादद्य कुदृष्टिसर्पगरुडस्त्रय्यन्तविद्यागुरूः
श्रीमान् वेंकटनाथदेशिकमणिः श्रेयांसि भूयांसि मे ।
दत्से दृष्टिबलेन देवि भजतां या त्वं विभुत्वं रमे
तस्या हन्त तवापि येन विभुता सुष्ठु प्रतिष्ठापिता ॥''

(श्लोकः 7)

इति तमेवाचार्यं लक्ष्मीविभुत्वस्थापकतया स्तौति । सैवेयमाचार्यभक्तिराचार्य-पञ्चाश' दाख्यग्रन्थत्मना परिणतेति स्पष्टमेतत्।

श्रवणानन्दे विविधविषयकाणि रमणीयार्थानि पद्यानि संकलितानि पश्यामः, यानि कवेरसामान्यं प्रतिभाविशेषं दर्शयन्ति ग्रन्थस्य च अन्वर्थतां साधयन्ति। **सुभाषितकौस्तुभे** पञ्चस्वध्यायेषु अज्ञानादिविविधविषयप्रतिपादका नीतिबोधकाश्च श्लोकाः संगृहीता उपलभ्यन्ते ।

सुभद्रापरिणयाख्यस्य नाटकस्य सम्प्रति द्वावेव अङ्कौ 'अरशाणिपाल' ग्रामे उपलभ्यते।

भूमिका

वी० कृष्णस्वामी अय्यङ्गार्

''गद्यपद्यमयं काव्यं चम्पूरित्यभिधीयत'' इति चम्पूलक्षणम् । गद्यं कवीनां निकषं वदन्ति इति गद्यस्य रचनाकाठिन्यं तत्र कविनैपुण्यं च प्रकाशितं जायते । तथैव चम्पूकाव्यं गद्यपद्योभयात्मकं वस्तुतः कवीनां निकषं भवति ।

श्लेषयमककविराडिति प्रसिद्धः विश्वगुणादर्श-चम्पूकाव्येन जगति विदितः महाकविः **वेङ्क.टाध्वरी** कस्य वा सहृदयस्य अपरिचितो भवेत् । स्वसर्वस्वं वैदुष्यस्य कविकृतेश्च दृढं परिचाययति *लक्ष्मीसहस्राख्य*काव्ये । वैशिष्ट्यं हि कवेरस्य **भगवद्भाष्यकार**प्रवर्तितसत्सम्प्रदायस्य कवितार्किकसिंह**वेदान्ताचार्य**दर्शितमार्गमनुल्लङ्घ्य काव्यमुखेनापि सिद्धान्तडिण्डिम इति ।

चम्पूप्रकरणे *रामायणचम्पूरेव* विराजते सर्वादृतत्वेन । भोजमनु लक्ष्मणकविः चम्पूप्रबन्धं प्रणिनाय । तदनु प्रकृतग्रन्थे कविना *''कारुण्यादवशेषितं किल मम क्षेमाय रामायणे, काण्डं सप्तममुद्गृणातु रसना चम्पूप्रबन्धात्मना''* इत्युक्तरीत्या उत्तरभागः रामायणस्य कथावस्तु समग्राहि ।

प्रतिपदं प्राशानुप्राशाभ्यां काव्यरसं विदधानः कविः बहूनि काव्यानि बबन्ध । तत्र च विद्वल्लोकेन भृशं समादृताः आभारतं सुतरां व्याप्ताः वरदाभ्यु-

शृङ्गारदीपिकाभाणो यथोक्तकारिभाणश्च ग्रन्थकारस्यास्य रूपकरचना सामर्थ्यमावेदयतः।

श्रीराघवयादवीयं नाम काव्यं 'दुष्करकाव्यभेदे'ष्वन्तर्भवति । अत्र हि एकमेव पद्यमनुलोमतया पठितं श्रीरामकथां, प्रतिलोमतया पठितं च श्रीकृष्णकथां वर्णयतीति महान् शब्दार्थचमत्कारः कविना निबद्धः । तथाचोक्तं तेनैव -

अनुवर्णितरामकृष्णवृतैरनुलोमप्रतिलोमवाचनाभ्याम्।

कृतिमुल्लसितां विधाय पद्यैर्विवृणोति स्वयमेव वेंकटार्यः ।'' इति। स्वोपज्ञटीकायुक्तं चेदं काव्ये त्रिंशत्पद्यात्मकमेव कविना न्यबन्धि। अस्य चायमाद्यः श्लोकः -

''वन्देऽहं देवं तं श्रीतं रन्तारं कालं भासा यः ।

रामो रामाधीप्यागो लीलामारायोध्ये वासे ॥ इति ।

रामः रामाधीः, आप्याग इति तृतीये पादे पदच्छेदः । रामायां स्त्रियां सीतायां धीर्यस्य तथोक्तः। आप्याः आप्तुम् योग्या अगाः सह्यमलयादिपर्वताः यस्य स तथोक्तः । सीतायां मनः प्रणिधाय सह्यमलायदिगिरीन् गतवानिति भावः । एवंविधो यो रामः आयोध्ये अयोध्याभवे वासे गृहे लीलां कीडामार प्राप्तवान्। ऋ-गतौ' इत्यस्मात् लिट् ।रावणवधं कृत्वा आयोध्यायां स्वगेहमेत्य सीतया साकं चिक्रीडेत्यर्थः । भासा कान्त्या कालम् नीलं । रन्तारं कीडितारम् । श्रिया इतं प्राप्तं । तं देवमहं वन्दे प्रणमामीत्यर्थ । एवमेभिः शब्दैः कविः स्वयमस्य पद्यस्य रामपरर्थ व्याचष्टे । एतदेव पद्यं प्रतिलोमतया पठितमित्थं विपरिणमति।-

''सेवाध्येयो रामालाली गोप्याराधी मारामोराः।

यस्साभालंकारं तारं तं श्रीतं वन्देहं देवम् ॥ इति ।

मारामोराः मायाः लक्ष्म्याः आरामभूतं भोग्यस्थानभूतमुरः वक्षः यस्य सः तथोक्तः सेवाभिः तपोयज्ञादिभिः ध्येयः ध्यातुं योग्यः । रामालाली रामाः रूक्मिण्यादिका अष्टौ महिष्यः, ताः लालयतीति तथोक्तः। यः कृष्णःगोप्याराधी गोपीः राधाप्रभृत्तिका गोपाङ्गना आराधयति संमानयतीति। अनेन कृष्णस्य दक्षिणत्वमुक्तं भवति। साभालंकारं साभाः सदीप्तिकाः अलंकाराः कौस्तुभादि भूषणानि यस्य स तथोक्तः। तं श्रीतं देवं वासुदेवमहं तारं यथा भवति तथा, उच्चस्वरेणेति यावत्, वन्दे सतौमि। एवं कविः स्वयमस्य पद्यस्य आनुलोम्य प्रातिलोम्याभ्यां राघवयादवपरत्वं व्याख्याय दर्शयति। ईदृशैः त्रिशता पद्यैः ग्रथितमेतदल्पाक्षरमपि गम्भीरार्थं काव्यं सव्याख्यं मद्रपुरस्थ लिटल्फ्लवर कार्यालयात्

प्रकाशितं (1966 **A.D.**) विजयते । शब्दचित्ररसिकैरवश्यं पठनीयं संग्राह्यं चेदमुत्त्मं काव्यमिति निवेदयामः ।

श्रीवरदाभ्युदयचम्पूरेव हस्तिगिरिचम्पूरिति नामान्तरेणापि ख्याति भजते । सा चेयं कोषियालं श्रीशठकोपाचार्येण संपादिता टिप्पण्या च परिष्कृता, 'उद्यान पत्रिका' यां नागराक्षरे प्रकाशिता जागर्ति । सत्यव्रतक्षेत्रे **काञ्चीनगर्या** हस्तिगिरिशिखरे विराजमानस्य भगवतो देवदेवस्य प्रणतार्तिहर**वरदपरब्रह्मणः** अवतारवृतान्तः तदाराधनमहिमा च अत्र प्रधानः प्रतिपाद्यो विषयः । एष च ग्रन्थः, **ब्रह्माण्डपुराणान्र्गतकाञ्चीमाहात्म्यम**नुसृत्य प्रवृतः । श्रीमन्निगमान्तमहादेशिके हस्तिगिरिमाहात्म्यनामके द्रामिडप्रबन्धेप्ययं वृत्तान्तो वर्णितः । भृगुनारदसंवाद रूपेण प्रवृते अस्मिन् ग्रन्थे पञ्चविलासा विलसन्ति । अयं च चम्पूग्रन्थः रसालंकारगुणपाकादिषु सर्वेष्वप्यपेक्षितांशेषु अविकलमुत्कर्ष वहन्नुत्तमकाव्यस्य निदर्शनं भवतीति विद्वांस एवं प्रमाणम् ।

हस्तिगिरिं वर्णयन्नयं कविः प्रथमे विलासे शब्दार्थचमत्कारमित्थं संपादयति।-

''अत्यद्भुतो हस्तिमहीभृदुच्चैरसौ यता ये नवपुष्यरागाः ।
तेप्यस्य संपादितदान्तदीप्तेर्मूर्धानमासाद्य भवन्ति मुक्ताः ॥''
''अगोऽपि संज्ञया सोयं नागो जगति विश्रुतः ।
नागोपि नमदाह्लादी मदाह्लादी च सोपि सन् '' इति ।

(श्लोकौ 35-36)

अत्रश्लेषकृतो विरोधाभासः स्पष्टः । सरस्वतीं स्तुवता चानेन कविना एवमभाणि -

''पादेन पश्यन्नयनेन शृण्वन् प्रादुर्भवंश्चापि भुवः श्रवस्तः ।
तव प्रसादेन दिशो विशालयशोदुकूलेन विशोभयन्ति ।। इति ।

(श्लोकः 69)

वाणि करवाणि नतिमुन्नमितपाणिः
प्राणिहितकारिणि सुवेणि मधुराणि ।
मानिनि विधेस्तव नवानि धुतहानि
र्मानिततमानि तनवानि नवनानि ।।'' इति च ।

(श्लोकः 71)

दशावतारवर्णनप्रस्तावे रामं बलरामं कृष्णं च निम्नाङ्कि.तैः पद्यैरभिष्टौति

''प्राहार्षीस्त्वं राम तुष्ट्यै बुधानां लड्.कारक्षोदक्षमस्वादुशब्दम् ।
त्वत्पुत्राभ्यां त्वत्सुकाव्यं ररक्षेऽलड.कारक्षोदक्षमस्वादुशब्दम् ।।

त्वं यमुनाभेदनकृत्त्वदाश्रितो यस्त्वदीक्षणं धत्ते।
तद्भ्रातृभेदकः स्यात्तत्पितृभेदनमपि क्षमः कर्तुम् ।।
कृष्णोपि गोपीषु बहूपरक्तो भवांश्च तासां नयनैश्च पीतः
आपादयत्यर्जुनदीप्तिमय्यां अतो विदुस्त्वामिह विश्वरूपम् ।।'' इति ।

(तत्रैव द्वितीये विलासे, श्लोकाः 38-40)

एवमस्य **'वाचमर्थोनुधावती'** न्यायेन वशीकृतवाचः कवेः शब्दार्थचमत्कार निबन्धननैपुण्यमन्यादृशमस्मिन् ग्रन्थे प्रतिपदं विभाव्यते ।

विश्वगुणादर्शचम्पूरित्येष ग्रन्थस्तु लब्धविपुलप्रचारो बहुभिर्विद्वद्भिर्व्याख्यातः प्रकाशितश्च संस्कृतज्ञानां वहुमानपात्रतां यातः । अत्र च कृशानुर्विश्वाव सुरिति द्वौ गन्धर्वौ भारतवर्षे विविधानि क्षेत्राणि वीक्षमाणै संचरतः । तयोः कृशानुस्सर्वत्र दोषानाविष्करोति, विश्वावसुस्तु गुणैकग्राही तान् दोषान् प्रत्याचष्टे । तदुक्तं कविना --

''विश्वावलाकस्पृहया कदाचिद्विमानमारूह्य समानवेषम् ।
कृशानुविश्वावसुनामधेयं गन्धर्वयुग्मं गगने चचार ।।
कृशानुरकृशासूयः पुरोभागिपदं गतः ।
विश्वावसुरभूद्विश्वगुणग्रहणकौतुकी ।'' इति ।

भगवन्तमम्बरमणिं सूर्यमपि कृशानुरेवं निन्दति

''पान्थान् दीनानहह वसोमानातपान्धान् विधत्ते
शुष्कां पृथ्वीं रचयतितरां शांषयत्योषधीश्च ।
कासाराणां हरति विभवं क्लान्तिशान्तिप्रदानां
क्रूरस्यैवं गुणलवकथा का स्वतो भास्वतोस्य ॥ इति ।

एतामस्थाननिन्दामसहमानो विश्वावसुराह -

''वृष्टिं घृष्टिभिरारचय्य जगतस्तुष्टिं सरीसर्ष्टि यः
पुष्टिं द्राग् विशिनष्टि दृष्टिषु नृणां ध्वान्तं पिनष्टि स्थिरम् ।
प्राज्ञानामपवर्गमार्गदममुं पदमागृहोल्लासिनं
को न स्तौति समस्तलोकसुहृदं द्योभूषणं पूषणम् ॥ इति ।

अनयैव रीत्या गन्धर्वावेतौ समस्तवस्तूनां गुणदोषानुपवर्णयन्तौ रसिकानानन्दयतः । न केवलं दोषगुणानुवर्णनमात्रं अस्य ग्रन्थस्य आकर्षकत्वे निदांन, अनुप्रासयमक श्लेषविरोधाभासादीनामलंकाराणां च च्छटा सर्वत्र राराज्यमाना दरीदृश्यते । एकमेवोदाहरणं प्रदर्शयामः -

''स जयति चित्रचरित्रो यस्य हि वरचराणपुष्करकरेणुः ।
महिषीमृषिसिंहस्य प्राजीजनदपि वृषोदये हेतुः ॥'' इति ।

इदं च पद्यमयोध्यावर्णनप्रसङ्गे भगवतः श्रीरामचन्द्रस्य महिमानं तुष्टूषता विश्वावसुना पटयते । रामचरणस्पर्शेन विधूतकल्मषा गौतमपत्नी निवृत्तशापा स्वरूपं पुनः प्रतिपद्य पत्या समानिता स्वीकृताचासीदिति रामायणे प्रसिद्धा किलेयं कथा । वृषस्य धर्मस्योदये हेतुर्यस्य रामस्य वरचनरणपुष्करकस्य पादकमलस्य रेणुः ऋषिसिंहस्य गौतमस्य महिषीमहल्यां प्राजीजनत् शापान्तं कृत्वा स्वरूपं पुनः प्रतिपाद्य उत्पादयामास, स चित्रचरित्रो रामो जयतीति सैव कथात्र उल्लिख्यते । किंतु श्लेषमहिम्ना विरुद्धं किंचिदर्थानतरमप्यत्र प्रतीयते । वरचरण पुष्कर करेणुः इभी, वृषोदये वृषस्य वृषभस्योदये उत्पत्तौ हेतुरिति प्रथमो विरोधः । वृषोदयहेतुरप्येषा ऋषिसिंहस्य महिर्षी सिंहपत्नीं, महिषीशब्दस्वारस्यात् महिषस्त्रियं च प्राजीजनदिति द्वितीयो विरोधः । एतादृशविरूद्धार्थनिष्पादकत्वादेवासौ भगवान् रामः चित्रचरित्र इति प्रथमचरणोक्तं समर्थ्यते । विरोधस्य आपात प्रतीतत्वात्, वस्तुतस्तु अहल्योद्धारस्यैव प्रतिपिपादयिषितत्वादत्र विरोधाभासोऽलंकारः । तन्मूलकं च चित्रचरित्रं इति पदार्थसमर्थनरूपं काव्यलिङ्गम् । अनयोः उभयोरपि श्लेषानुप्राणितत्वात्संकरः । ग्रन्थान्ते च विश्वावसुः सिद्धान्तयति

''नराः सुरा वा पशवः परेपि वा न निन्दनीयाः पुरूषेण भूष्णुना ।
यतोतिदोषप्रचुरे जगत्त्रये न सन्ति ते वीतगुणाः कलावपि ॥ इति ।

कृशानुरप्येतदोमित्यङ्गीकरोति-

दाढ्र्याय गुणसमृदधेर्दूषणभणितिः समस्तवस्तूनाम् ।
अस्माभिरूपनिवद्धा सिद्धान्तस्येव पूर्वपक्षोक्तिः ॥ इति ।

एवं कविः संसारवर्तिनां सर्वेषामपि वस्तूनां दोषगुणमिश्रितत्वात् तत्र दोषानलक्षयित्वा सद्भिरनसूयैर्गुणा एव ग्राह्या अभिनन्दनीयाश्चेति सुष्ठूपपादयति ।

प्रद्युम्नानन्दं नाम नाटकं षड्भिरङ्कैः परिभूषितं महीशूरपुरे आन्ध्राक्षरैः संमुद्रितं प्राकशितं चोपलभ्यते । अत्र कृष्णपुत्रतयावतीर्णस्य प्रद्युम्नाभिधानस्य मन्मथस्य, शम्बरासुरगृहे मायावतीरूपेण स्थिताया रत्याश्च परिणयः सविस्तरं प्रतिपाद्यते । इदं नाटकं प्रौढ़शब्दार्थसन्दर्भ रसालंकारमेदुरं च पाठकानां दर्शकानां च संतोषमावहतीति. किमु वक्तव्यम् । पश्यतास्य उक्तिसौष्ठवम्-

अर्धो हि स्यादात्मनो धर्मपत्नीत्याम्नायार्थ दर्शयन् लीलयैव
चन्द्रापीडः पञ्चबाणस्य जेताप्यद्रेः पुत्रीमर्धगात्रीकरोति ॥

(प्रथमाङ्केनारदवचनम्)

इयं च प्रद्युम्नकृता मायावतीसौन्दर्यप्रशंसा

''कलासान्द्रे चान्द्रे वपुषि रूचिमाचामति मुखं
गजोत्तसे हसेष्वपि गतिरनास्थां जनयति ।
रससलम्बे बिम्बे रचयति चवब्रैराग्मयमधरो
गिरः सक्षाद् द्राक्षास्वपि मदसुदस्यन्ति सुदृशः ॥''

तृतीयाङ्के कविर्वनान्यपि पुराणीवेति साधर्म्यमेवं साधयति

''अभ्रंलिहैर्हन्त वृतानि सालैरवाप्तशोभानि च पदिमनीभिः ।
उत्तुङ्ग.भूभृद्भिरूपाश्रितानि मन्ये पुराण्येव महावनानि ॥'' इति ।

चतुर्थाङ्के च युद्धोद्यतानसुरान् प्रति शम्बरस्येदं वचनमनिष्टार्थशङ्काकरं दृश्यताम्

''महानिष्टार्थलाभो नः, स्यान्नः परममङ्गलम् ।
तनुध्वं संप्रति क्षिप्रम् प्रयात समाङ्गणम् ॥'' इति ।

अत्र तनुध्वं संप्रति क्षिप्रमिति कथ्यमाने, तनुध्वंसं प्रति क्षिप्रं प्रयातत्यनर्थः स्फुरतिः परमं मङ्गलम् स्यादिति उच्यमाने, परम् अमङ्ग.लं स्यादित्यनिष्टमर्थान्तरमपि प्रतीयते । महान् इष्टार्थलाभः स्यादिति कथ्यमाने महतोऽनिष्टार्थस्य लाभः स्यादित्यर्थान्तरं प्रतिभाति । एवमनेकार्थकशब्दप्रयोगचातुर्यमत्राावधीयताम् । पञ्चमाङ्के च शृङ्गारचित्रमिदं दर्शनीयम् -

''क्रीडासंगरसंभ्रमेषु दयितैः क्लेशं भृशं प्रापिताः,
विस्रब्धं तदुरस्सु केलिविरतौ सुप्ता विदग्धाङ्गनाः ।
बुध्यन्ते नु निशान्तमन्तिकगतस्वर्लोककल्लोलिनी
नालीकोदरबन्धनिर्यदलिनाड.कारशड्.खारवैः ॥''

अत्रैव शिवसारूप्यदायिनीं वाराण्सी कविर्निन्दाव्याजेन स्तौति

''वाराणसि त्वयि सदैव सरोगभूमावारोग्यभूमिरिति काममलीकवादः ।
संतस्थुषां भवति यत्र वपुः सशूलं जन्मान्तरेपि जलभारवदुत्तमाङ्गम् ॥ इति ।

अयं श्लोकः विश्वगुणादर्शेपि दृश्यते। षष्ठाङ्के कविरसौ सरलपदविन्यासैरेव वेदान्ततत्त्वमप्यनायासेन प्रतिपादयति-

''निदिध्यासन्ति त्वां नियमितहृषीकाः शमधना-
स्तरीतुं संसारं कतिचन तपस्साहससहाः ।
निरस्तान्योपाया नियतमनुतिष्ठन्ति कतिचित्
प्रपतिं पञ्चाङ्.ां प्रकृतिपुरुषेशस्थितिविदः ॥ इति ।

अत्र किल मितैरेवाक्षरैः श्रीवैष्णवसंप्रदायसारसर्वस्वं संगृहीतमित्यपरोक्षं प्रेक्षावताम्। मायावत्या पृष्टः प्रद्युम्नो भगवन्तं श्रीकृष्णममीभिरक्षरैरुपश्लोकयति

''शुभश्रीवत्साड.कंशु चिरुचिरमुक्तामणिसरं
स्फुरदिबम्त्रद्वक्षस्तरलवनमालासुरभिलम्
वधूजुष्टे पार्श्वे बलभिदुपलश्यामलमहो
तदेवेदं तत्त्वं श्रुतिरपि यदुच्चैर्मृ गयते'' ॥ इति ।

तस्य च परब्रह्मणस्तत्त्वं वर्णयति

''आकीटादा च वाचः कमितुरनुपधिर्यः प्रतीचां नियन्ता
धर्मद्युल्लेखिनीर्यः स्फुटमखिलधियश्चोदयत्यन्वहं नः ।
आनन्दात्मानमन्तर्दहरमहरहर्य विचिन्वन्तिय युक्ताः
भाग्याद् भूमानमेनं श्रूतिभिरभिहितं चक्षुषा लक्षयामः ॥'' इति ।

एवमस्मिन्नाटके शृङ्ग.ारवेदान्तादिविविधविषयस्पृशो गम्भीरार्थाः सूक्तयो विदुषां महान्तं प्रमोदमावहन्ति ।

''लक्ष्मीसहस्त्रम' तावदस्य कवेरत्युत्मं काव्यमिति दृढ़ं प्रतीमः । विश्वगुणादर्शे सर्वेषु वस्तुषु दोषानुदावितवानेष कविस्तस्मादेवापचारादन्धतां प्राप्तः, सहस्त्रेण पद्यैर्भगवतीं लोकमातरमभिष्टुत्य, तदनुग्रहात्पुनर्दृष्टिमलभतेति किंचिदैतिह्यं श्रूयतं । अस्य सत्यत्वमसत्यत्वं वा यथाकाममुच्यतां सुधीभिः । किंतु, ग्रन्थान्तराणामभावेपि कं लक्ष्मीसहस्त्रमेव वेंकटाध्वरिणो महाकवित्वं स्थापयितुमलं भवतीति निस्संकोचमुद्घोषयामः । आरम्भस्तबकादीनि फलस्तब कान्तानि अस्मिन् ग्रन्थे पञ्चविंशतिः स्तबकानि प्रकाशन्ते । ग्रन्थान्तरेषु स्वस्य वैदुष्यं स्वयमेव घोषयन्नप्येष ग्रन्थ्कारो लक्ष्मीसहस्त्रे भक्तिप्रकर्षोपनतं विनयमेवं प्रकाशयति -

''शय्या शब्दगणानुशासनचणा, छन्दोमयं वाहनं
सोदर्यस्तु कलानिधिस्तव रमे, सूनुश्च वाणीपतिः ।
तस्यास्ते पुरतः स्तवं मितमतिः प्रज्ञोचितं श्रावयन्
गुञ्जाविक्रयिणः श्रयामि पदवीं माणिक्यपुञ्जापणे ॥''

''नाहं जाने नवरसगतीनर्थिमक्षुण्णमन्यै
नलिंकारानपि न च वचोगुम्भगम्भीरिमाणम् ।
स्तोतुं मातस्तदपि भवतीं त्यक्तलज्जो यतेऽहं
मन्तुं किंतु प्रथितकरुणा क्षन्तुमर्हस्यमुं त्वम् ॥''

''चक्षुष्मन्तश्चरणकमले चक्षुषा श्रोत्रवन्तः
श्रोत्रे भूमेर्जलधितनये जन्मवन्तोपि न स्मः ।
वक्त्राण्यासन् भगवति न षट् पञ्च चत्वारि वा नः
कस्मादस्मान्न हसतु जनः स्तोष्यतस्त्वद्गुणौघम् ।।''

''पद्मानां दशभिर्यदस्तुत शतैस्त्वत्प्रेयसः पादुकां
त्रय्यन्तार्यगुरुः परो हयमुखस्तत्राम्ब को विस्मयः ।
स्तोकप्रज्ञमतीव मूकमपि मां श्लोकैः सहस्रेणते
स्तोतारं समवेक्ष्य सूक्ष्ममतिभिः कस्मान्न विस्मीयते ॥'' इति ।

एषा वागधोरणी न कस्य हर्षमुत्पादयेत् ?

लोकमाता लक्ष्मीः समुद्रादुत्थिता देवानां समक्षमेव नारायणस्य वक्षस्समारुरोह । तदेवं वर्णयति -

''प्रसभमुदधिकन्ये पशपतां दैवतानां परमपुरुषवक्षः पीठमाढौकथास्त्वम् ।
सह दयिततमेन स्वैरकेलौ सतीनां न खलु निजशिशूनां संनिधिर्व्रीडहेतुः॥''इति

लक्ष्म्या भगवद्वक्षोनित्यवासे कारणं दर्शयति

''भगवतः प्रतिधो हृदि मा स्म भूत् समुदयद्वृजिनेषु जनेष्विति ।
अवहिता जगदम्ब हिताय नो हृदयमेव हरेरधितिष्ठसि ॥'' इति ।

श्रीमान् वेदान्तदेशिकः लक्ष्मीम्, ''अनुग्रहमयीं वन्दे नित्यमज्ञातनिग्रहाम् ।'' इति वर्णयामास । तदनुसृत्यासौ ग्रन्थकारोपि,

''श्रये शेषाचलमणेः शार्ङ्गि.णो हृदयंगमाम् ।
अनुकम्पामिवाकम्पामम्बामम्बुजवासिनीम् ॥'' इति ।

सानुप्रासैः सूनृतैर्वचनैरभिष्टौति । तामेव च निरवग्रहानुग्रहां मातरं शरणं गच्छति -

''नालीकसंभवभवादिसुराभिवन्द्ये नानाविधाकृतकवाङ्मयमौलिवेद्ये ।
पाथोधिपुत्रि पतिवक्षसि नित्यहृद्ये भान्तीमनन्यशरणो भवतीं प्रपद्ये ।।'' इति ।

भगवतः प्रभावादपि लक्ष्म्याः प्रभावोधिक इति सयुक्तिकं स्वमतं स्थापयति

''विश्वातीतो जयति वृजिनह्रासदो वासुदेवः
पद्मे तस्याप्युपरि महिमा भासते तावकीनः ।
क्षेत्रज्ञानां हृदयमनिशं कञ्जनाभोऽधिशेते
तस्यपि त्वं हृततमारोजसे राजसे यत् ॥'' इति ।

करुणायामपि श्रीः पतिमातिशेत इत्याह-

"रामस्तिष्ठतु नाम यो न विदयो जिह्रेति निर्हेतुकं
सुग्रीवैकविरोधिनं क्षितिसुते संहृत्य तं वालिनम् ।
कारुण्याम्बुनिधिस्त्वमेव नियतं क्लृप्तात्मपीडं यतो
रक्षःस्त्रीनिकरं ररक्षिथ तमप्यार्द्रागसं वायसम् ॥"

लक्ष्मीः सर्वशेषिण्यपि स्वयं भगवन्तं प्रति शेषभूतेति संप्रदायसिद्धमर्थं कविरित्थं निबध्नाति —

"नित्यं विश्वं वशयति हरिर्निग्रहानुग्रहाभ्या-
माद्ये शक्तिं विघटयति ते हन्त कारुण्यपूरः ।
ईषन्न्यूनं तदिह दयितादीशितृत्वं भवत्या-
स्तच्छेषत्वं कथमितरथा देवि तुल्येपि भूम्नि ॥"

सदा भगवतोऽनपायिनीं लक्ष्मीमेवं स्तौति —

"यदि नाम विष्णुवक्षः क्षणमत्यक्ष्यः क्षमामयि रमे त्वम् ।
आगस्विनस्तदा नो नैवारक्षिष्यदूष्मलो नाथः ॥"

अत एवावतारदशास्वपि 'राघवत्वेऽभवत्सीता रुक्मिणी कृष्णजन्मनी'ति न्यायेन पतिमेषा नित्यमनुसरतीति तमेवार्थं पुनराह —

"क्षणमप्यसहस्थितौ जनागः कमिता न क्षमितेति सानुकम्पा ।
अवतारदशासु देवि रूपैरनुरूपैरनुगाहसे मुकुन्दम् ॥" इति ।

लक्ष्मीकटाक्षस्य अनन्यसामान्यं प्रभावं वर्णयति —

"क्षमाकुमारि क्षणमीक्षणं त्वं यदृच्छया न्यस्यसि यत्र जन्तौ ।
स ईक्षणानां त्रयमष्टकं वा सहस्रकं वा सहसा दधाति ॥" इति ।

सर्वमंगलसौभाग्यदायिनीं लक्ष्मीं गृणाति —

"भागधेयं भजेयं तत् फणिशैलकुटुम्बिनः ।
मनीषिणो यदेवाहुर्मङ्गलानां च मङ्गलम् ॥
"गरुडध्वजवल्लभे शुभे गणवर्णादिजदोषशान्तये ।
वरदे तव वाचकं पदं कवयः काव्यमुखे प्रयुञ्जते ॥
"कन्ये दुग्धोदन्वतस्तावकीनं मन्ये रूपं मङ्गलं मङ्गलानाम् ।
यत्सावर्ण्यप्राप्तभद्रा हरिद्रा सौमङ्गल्यं संविधत्ते वधूनाम् ॥ इति ।

लक्ष्म्याः सौन्दर्यं विस्तरेण वर्णयन् प्रसङ्गात् रशनामित्थं निरूपयति —

"रतितन्त्ररहस्यमम्ब शब्दै रमणीयैर्विशदं प्रकाशयन्ती ।
रसनैव रतिप्रियस्य नूनं रशनासाविति लेखकप्रमादः" ॥ इति ।

लक्ष्मीचरणसेवकस्य निवृत्तरागता सिध्यतीति विरोधाभासेन समर्थयते —

"पदमाश्रितस्तव पयोधिकन्यके विपदं न जातु भजतीति साम्प्रतम् ।
अपि तत्परागमधिमौलि धारयन्नपरागतां व्रजति जन्तुरद्भुतम् ।।" इति ।

लक्ष्मीनारायणावुभौ दैवतमिति वेदान्ततात्पर्यमयं कविः,

"त्वामेवाहुः कतिचिदपरे त्वत्प्रियं लोकनाथं
किं तैरन्तःकलहमलिनैः किंचिदुत्तीर्य मग्नैः ।
त्वत्संप्रीत्यै विहरति हरौ संमुखीनां श्रुतीनां
भावारूढौ भगवति युवां दम्पती दैवतं नः ।।"

इति वेदान्तदेशिककृतश्रीस्तुतिसूक्तिं प्रमाणमाश्रित्य प्रतिपादयति —

"दम्पत्योरिह युवयोरधीश्वरत्वं व्यासज्य स्थितमिति संमतं मतं नः ।
विश्वाम्ब श्रुतिविहितं विहाय पत्नीं कर्तृत्वं कृतिषु न केवलस्य पुंसः ।।" इति ।
"वैभवं तव मुकुन्दपत्नि यो वेद वेदशिखरानुर्वणितम् ।
वैभवं स भुवि विन्दति स्थिरं दुस्त्यजं त्यजति वै भवं ततः ।।" इति च ।

एवमनेकान् सहृदयविद्वदभिनन्दनीयानर्थविशेषान् विलक्षणप्रकारेण निबध्नान एष कविश्चित्रस्तबके शब्दालंकारनैपुण्यमपि विशिष्य दर्शयति । तत्रेदमपशब्दाभासं नाम चित्रमुदाह्रियते —

"वेदानि सर्वशास्त्राणि विभाव्य भवतीं रमे ।
दास्यं यस्यास्तवोपैति देवि सापि सरस्वती ।।" इति ।

अत्र वेदानीति नपुंसकत्वभ्रमादपशब्दाभासं चित्रम् । वस्तुतस्तु वेदानि जानानीति वेत्तेर्लोटि उत्तमपुरुषैकवचने रूपमिदम् । तथा च क्रियावञ्चनादयमेव क्रियागुप्ताख्यः प्रहेलिकाभेदोपि । इदमपरं क्रियावञ्चनस्योदाहरणम् —

"हरेः प्रिये भगवतो हतसंश्रितसाध्वसा ।
अन्वहं क्रियमाणानामंहसां संहती रयात् ।।" इति ।

अत्र हरेरिति षष्ठ्यन्तपदभ्रमो जायते; किंतु हरतेर्लिङि मध्यमपुरुषैकवचने रूपमिदं बोध्यम् ।

अस्मिन् पद्ये सप्तापि विभक्तयो निगूह्यन्ते —

"पायान्मामुरसावितः श्रियमुनाराध्यां प्रपद्येतमाम्
को वा न स्थिरमश्नुते शमधनोप्यालोकितो जातुचित् ।
वै दान्तैर्विनुताङ्घ्रये न किमुत श्रेयो नतिं तन्वतां
सेवामो रचयामि मानस सदा भक्त्यावहावादरम् ।।" इति ।

अत्र 'असौ उः लक्ष्मीः मां पाया' दिति तात्पर्येण 'पायान्मामुरसावितः' इत्युक्तम् । श्रियमुनाराध्यामित्यत्र यमुनाराध्यामिति पदभ्रमो जायते । उना शंभुना आराध्यां श्रियमिति वास्तवोर्थः । अत्र करणं गुप्तम् । शमधन इति समस्तपदभ्रमो भवति । अधनः को वा लक्ष्म्यालोकितः शं नाश्नुते इति विवक्षितम् । अत्र शमिति कर्म गुप्तम् । तृतीयपादारम्भे "वै" इति पृथक् पदम् । लक्ष्मीवाचकात् उशब्दात् चतुर्थ्याम्, ङिति ह्रस्वश्चेति नदीत्वादाटि "वै" इति रूपम् । अत्र संप्रदानं गुप्तम् । 'न किमुत श्रेयो नतिं तन्वता' मित्यत्र उत इति तसिलन्तं पदम् । एवमपादानं गुप्तम् । सेवामो रचयामीत्यत्र ओरिति षष्ठ्यन्तम् । लक्ष्म्याः सेवां रचयामीत्यर्थः । सेवाम इति परस्मैपदान्तक्रिया-भ्रमात् षष्ठी गुप्ता । 'भक्त्यावहावादर' मित्यत्र भक्त्या, वह, औ, आदरमिति पदच्छेदः । औ इति सप्तम्येकवचनम् । लक्ष्म्यां भक्तिं धारयेत्यर्थः । एवं सप्त-विभक्तिवचनं नाम अपूर्वमेतच्चित्रम् । माघादिकविकृतिष्वपि अदृष्टपूर्वमिदं चित्रमस्य कवेरसाधारणं कौशलं द्योतयतीत्यलं विस्तरेण ।

समस्तकल्याणगुणसीमां लक्ष्मीं वैदर्भरीतिसमामाकलयन् स्तौति —

"औदार्यशेवधिरनिन्दितकान्तिसिन्धु-
रोजःप्रसादनिधिरुज्ज्वलसौकुमार्या ।
वैदर्भरीतिरिव वारिधिराजकन्ये
श्लाघापदं भवसि सारविदां कवीनाम् ॥" इति ।

एवमनल्पगुणविस्तारमलंकारमनोज्ञमुद्वेलितरसं चेदं **लक्ष्मीसहस्रम्** नाम काव्यमेकमेव वेंकटाध्वरिणो महाकवित्वे पर्याप्तं प्रमाणमुत्पश्यामः ।

प्रकृतस्तु उत्तरचम्पूप्रबन्धः, श्रीमद्वाल्मीकिरामायणे उत्तरकाण्डे प्रतिपादिता-मवशिष्टां रामकथामेव संक्षेपेण प्रस्तौति । प्रसिद्धमेव किलैतत् यत् पद्यं गद्यं चम्पूरिति काव्यस्य त्रयो भेदा इति । तत्र केवलपद्यात्मकात् केवलगद्यात्माकाच्च काव्यात् गद्यपद्योभयात्मकस्य चम्पूकाव्यस्य गरीयानुत्कर्ष इति स्वतः सिद्धोयमर्थः । आह चायं कविर्विश्वगुणादर्शे —

"पद्यं यद्यपि विद्यते बहु सतां हृद्यं विगद्यं न तत्
गद्यं च प्रतिपद्यते न विजहत्पद्यं बुधास्वाद्यताम् ।
आधत्ते हि तयोः प्रयोग उभयोरामोदभूमोदयं
सङ्गः कस्य हि न स्वदेत मनसे माध्वीकमृद्वीकयोः ॥" इति ।

नलचम्पूः यशस्तिलकचम्पूरित्यादयो बहवः चम्पूग्रन्थाः संस्कृतवाङ्मयालंकार-भूता जाग्रति । तत्र धाराधीशेन भोजराजेन निर्मितं सरलसरसशब्दसंदर्भरमणीयं चम्पूरामायणमत्युत्तममिति संप्रतिपन्नं सर्वैः । किंतु भोजराजः सुन्दरकाण्डान्त-

मेव सन्दर्भं प्राणैषीत् । ततश्च लक्ष्मणकविर्युद्धकाण्डं विलिख्य ग्रन्थं पूरयामास । तथापि उत्तरकाण्डकथाया अवशेषितत्वादहमिमामुत्तररामचम्पूं संग्रथ्नामीति कविः प्रतिपादयति —

"यः काण्डानि बबन्ध चम्पुविधया पञ्चापि भोजः कवि-
र्यो वा षष्ठमचष्ट लक्ष्मणकविस्ताभ्यामुभाभ्यामपि ।
कारुण्यादवशेषितं किल मम क्षेमाय रामायणे
काण्डं सप्तममुद्गृणातु रसना चम्पूप्रबन्धात्मना ।।" इति ।

अस्मिंश्च चम्पूग्रन्थे, "रावणादीनां वृत्तान्तमगस्त्यो रामाय निवेदयति । कथान्ते च राममाशीर्भिरभिनन्द्य तेनानुमतः स्वमाश्रमं प्रतिगच्छति । ततः सीतासमेतो रामः सुखं विहरती"त्येतावानेव विषयः सन्दर्भोचितसरसवर्णनासंगुम्फितः प्रतिपाद्यते । ग्रन्थमिममदृष्ट्वैव, उत्तरचम्पूरिति नामश्रवणमात्रेण, अस्मिन् ग्रन्थे सीतापरित्यागः लवकुशयोरुत्पत्तिरित्यादयो विषया निरूपिता इति कल्पयतां केषांचिद्विमर्शकानां वचनं प्रत्यक्षविरोधादुपेक्षणीयमेव । सीतापरित्यागादिकं च वस्तु कालिदासभवभूत्यादिभिः सम्यगुपवर्णितमपि नायं कविः प्रतिपादयितुमैच्छदिति प्रतिभाति । भगवतः श्रीरामचन्द्रप्रभोः सीतासमेतस्य सुखविहारान्तमेव वस्तूपाददानोयं कविः तदनन्तरकालिकं करुणप्रधानं वस्तु नातीव रोचयामासेत्युत्प्रेक्षामहे । ग्रन्थान्तस्थे च गद्ये,

"ततः कृतनित्यकृत्यः, तपःफलं तपनकुलस्य, तपोधनानामापद्धनं, सर्वस्वं जनकतनयायाः, संजीवनमञ्जनासूनोः, निखिलजगदभिरामो निखिलगुणाभिरामः श्रीरामचन्द्र, श्चन्द्र इवोदयाद्रिं भद्रासनमधिरूढो **भ्रातृभिरमात्यैः पौरवर्गैश्चोपासितः शतक्रतुरिवामरावतीं शशास चिरमयोध्यानगरीम् ।"**

इति वाक्यसरणिरत्रैव कविना ग्रन्थसमाप्तिश्चिकीर्षितेति निस्संशयमावेदयति । ततश्च "इति श्रीवादिहंसाम्बुदाचार्यवंशावतंसश्रीकाञ्चीनगरनायकतातार्यभागिनेयवाजपेयसर्वपृष्ठाप्तोर्यामादियाजिश्रीश्रीनिवासाचार्यतनूभवस्य श्लेषयमकचक्रवर्तिनः रघुनाथार्ययज्वनस्तनयेन श्रीश्रीनिवासकृपातिशयसुविदितनयेन सीताम्बागर्भसंभवेन श्रीमदात्रेयवेंकटाध्वरिकविना विरचितः उत्तरचम्पूप्रबन्धः संपूर्णः ।।" इति समाप्तिवाक्यमप्युपलभ्यते । तदयमेतदन्त एव कथाभागः कविना प्रतिपिपादयिषितः, समाप्तश्चायं ग्रन्थ इति निर्विवादं सिध्यति ।

एवं स्थितेपि, सीतापरित्यागादिकं वस्तु अत्र नोक्तमिति हेतोः, "ग्रन्थोयमसमाप्तः स्यात्, केनापि हेतुना प्रबलप्रत्यूहबाधितः कविरसमाप्यैव ग्रन्थं विरराम" ति निर्मूलां संभावनां केचिदाद्रियन्ते । तिप्पराजपुरवासिभिः श्रीसुब्रह्मण्यशास्त्रिभिः स्वकृत 'उत्तरचम्पू' ग्रन्थस्य उपोद्घाते एवमावेद्यते —

"एवं भगवतो रामायणकथापुरुषस्य जनकृतक्षेमस्य रामस्य राज्यप्राप्ति-पर्यन्तचरितवर्णनेन सम्पूर्णे चम्पूप्रबन्धे उत्तरश्रीरामायणकथामपि संजिग्रथिषुणा सर्वशास्त्राब्धिपारदृश्वना विश्वकाव्यगुणगरिष्ठविश्वगुणादर्शादिग्रन्थकर्तृतासंपादितयशस्केन श्रीमदात्रेयवेंकटाध्वरिणा प्रौढमधुराभिर्वाग्भिर्जग्रन्थे ग्रन्थ उत्तरचम्पूर्नाम। स च महाकविः, **भूयिष्ठविघ्नविध्वस्ततया वा श्रीरामकृतजानकीपरित्यागादिकथावर्णनविहस्ततया वा** श्रीमदुत्तररामायणपूर्वभागस्थदशाननविजयादिकथान्त एव विररामेति विज्ञायते" इति। अत्र प्रथमो हेतुरनुपपन्न इति पूर्वमवोचाम।

श्रीसुब्रह्मण्यशास्त्रिभिरिदमप्युच्यते — "तेन बालानां रामकथालोलानां च विदुषां समग्रकथाविच्छेदतस्तुद्यमानं हृदयमालोच्य पुनरपि कश्चन उत्तरचम्पूरिति ग्रन्थः, निर्माय प्रकाशितः श्रीवेंकटकविना। सा चेदानीं स्मार्तोत्तरचम्पूरिति प्रतीता पठ्यते पाठ्यते च" इति। अत्रेदमवधेयम्। श्रीवेंकटकविप्रणीता चम्पूः स्मार्तसंप्रदायस्थकविकर्तृकत्वात् स्मार्तोत्तरचम्पूरिति प्रसिध्यतीति किलात्र श्रीशास्त्रिणः संगिरन्ते। श्रीवेंकटकविप्रणीतोयमुत्तरचम्पूग्रन्थो गोमठं श्रीनिवासज्यौतिषकेण महीशूरपुरे मुद्रितः (1880 तमे क्रिस्ताब्दे) लभ्यते। तत्रायं कविः,

"अस्ति श्रीचोलधरणीजानिरद्भुतविक्रमः।
आज्ञा भाति विभोर्यस्य राज्ञामुत्तंसकेतकी॥
यः श्रीभोसलवंशमौक्तिकमणिर्यं शाकराजं विदु-
र्येनैकप्रभुनन्दनेन विदिता दीपाम्बिका वीरसूः।
यस्मै श्रीः स्पृहयत्यरातिरयते यस्माद् भयं यस्य तौ
सौदर्यौ शरभोजितुक्कजिनृपौ यांस्मश्च धर्मः स्थिरः॥
सर्वज्ञचूडामणिना विपश्चित्सन्दोहभाग्योपनतेन तेन।
संचोदितो वेंकटकृष्णयज्वा सन्दर्भयत्यौत्तरकाण्डमर्थम्॥"

इति स्वग्रन्थावतारस्य हेतुं दर्शयति। अस्य पिता वेंकटाद्रि, माता च मङ्गाम्बिकेति ग्रन्थसमाप्तिपद्यादवसीयते, यदाह —

"वाधूलान्वयवार्धिशीतकिरणाद्विद्वद्गुणाग्रेसरात्
मान्यायामिह वेंटकाद्रिविदुषो मङ्गाम्बिकायां गुणैः।
संजातेन विदर्भलक्ष्मणकृते चम्पूप्रबन्धे कृतः
काण्डो वेंकटकृष्णयज्वविदुषा जीयाच्चिरं सप्तमः॥" इति।

अत्र च ग्रन्थान्ते श्रीरामस्य सानुजस्य सपौरवर्गस्य च दिव्यधामप्राप्तिरुपवर्ण्यते —

"सद्यः शङ्खगदासिचक्रसचिवैर्युक्तश्चतुर्भिर्भुजैः
वक्षःसीम्नि वहन् रमां मणिवरश्रीवत्सचिह्नोज्ज्वलः ।
प्रत्युद्गम्य सभाजितो रघुपतिर्ब्रह्मादिभिर्दैवतैः
दिव्यं धाम जगाम देवतनुभिस्संस्तूयमानोऽनुगैः ॥ इति ।

श्रीवेंकटाध्वरि-श्रीवेंकटकृष्णविरचितयोरनयोर्ग्रन्थयोरुत्कर्षापकर्षविषये श्रीसुब्रह्मण्यशास्त्रिणः स्वयमेवं निवेदयन्ति —

"उत्तरश्रीरामायणकथाप्रतिपादकं चम्पूद्वयं विद्यते । तत्र **च** उत्पत्तिक्रमात् **शब्दार्थगतगुणविशेषाच्च प्रथमगणनार्हा श्रीवेंकटाध्वरिकृता चम्पूः** । सा तावत्सुतरां प्रौढार्थत्वात्, चम्पूप्रबन्धपठनयोग्ये काले वर्तमानानां बालानां **नात्युपकारकत्वादसमाप्तकथत्वाच्च साधूनां व्याधूतहर्षं चेतस्तनोति** । द्वितीया पुनः कथासमाप्तिमत्यपि संक्षिप्ततरचरितनिरूपणत्वात् नातीव मोदावहा भवति" इति । द्वितीया तु न केवलं संक्षिप्तार्था, अपि तु अनतिप्रौढार्थापीति ग्रन्थं परिशीलयन्तो विद्वांसः प्रतिजानीयुः । प्रथमा तु असमाप्तकथत्वात् चेतो व्याधूतहर्षं तनोतीति श्रीशास्त्रिण आशेरते । किंतु भोजराजः किमिति सुन्दरकाण्डान्तमेव ग्रन्थमग्रथ्नात् ? कुतश्च लक्ष्मणकविर्युद्धकाण्डमात्रमुक्त्वा विरराम ? यदि स नायकाभ्युदयान्तं काव्यं कवनीयमिति मत्वा तत्रैव विराममुचितं चक्रे, तर्हि तथैव **रावणवालिहनूमदादीनां** वृत्तान्तस्य रामप्रतापपोषकत्वान्नायकवृत्तान्ताङ्गतया तावन्तमेव वर्णयित्वा, ततः परस्य सीतापरित्यागादेः परमपदप्रत्यवाप्तिपर्यन्तस्य वस्तुनः करुणावलम्बनस्य रुचिभेदेन परित्यागं कुर्वन् वेंकटाध्वरी कथं दुष्यति ? न हि कथामात्रश्रवणार्थं विद्वांस एषु ग्रन्थेषु प्रवर्तन्ते, कथाया रामायणादादिकाव्यादेव परिगृहीतत्वात् । किंतु नवनवोन्मेषशालिना प्रज्ञाप्रकर्षेण किमप्यपूर्वमुन्मीलयतः स्वतन्त्रसृष्टिकर्तुः कवेर्वाङ्माधुरीमास्वादयितुमेव सहृदयानां काव्येष्वभिनिवेशो जायते । तादृशश्च रसास्वादः काव्यस्य परमं प्रयोजनमिति **'सद्यः परनिर्वृतये कान्तासंमिततयोपदेशयुजे"** इति वदता मम्मटेन आनन्दवर्धनादिभिश्च सर्वैराचार्यैरङ्गीक्रियते । एतादृशश्च ब्रह्मानन्दसहोदरो रसास्वादः, कथाशेषविहीनादपि सरसालंकारसूक्तिसन्दोहगुम्फितादस्माद्वेंकटाध्वरिप्रबन्धात् निष्प्रत्यूहः प्रजायत इत्यत्र सहृदयानामनुभवमेव प्रमाणीकुर्मः ।

अस्मिन्नुत्तरचम्पूप्रबन्धे प्रतिपादितान् विषयान् क्रमेण संगृह्य प्रदर्शयामः (1) विजितारिवर्गस्य, साकेतपुण्यनगरे इक्ष्वाकुकुलक्रमागतंसिंहासनमध्यासीनस्य, रामस्याभिनन्दनाय अगस्त्यप्रमुखानां महर्षीणामागमनम्, (2) रावणादीनां जन्मपराक्रमादिवृत्तान्तं जिज्ञासो रामस्य प्रश्नः, (3) अगस्त्येन कथाप्रारम्भः, (4) कुबेरस्य उत्पत्तिः, तस्य लोकपालपदप्राप्तिश्च, (5) माल्यवदादीना-

मुत्पत्तिः, (6) लङ्कानिर्माणं, (7) भगवतो वासुदेवस्य वर्णनम्, (8) देव-राक्षसयुद्धवर्णनं, (9) राक्षसानां पराजयः, (10) रावणादीनां जननं, (11) रावणादीनां तपसा संतोषितात् प्रजापतेर्वरलाभः, (12) रावणस्य लङ्काराज्येभिषकः (13) रावणमन्दोदरीविवाहः, (14) रावणस्य देवजयार्थं प्रस्थानं नन्दिशापः च, (15) रावणाय शिवकृतं वरप्रदानं, (16) वेदवती-वृत्तान्तः, (17) अनरण्यशापः, (18) यमपराजयः, (19) रम्भापरिभवहेतुको नलकूबरशापः, (20) इन्द्रपराजयः, (21) विन्ध्यगिरिवर्णनम्, (22) कार्तवीर्य-वालिभ्यां रावणस्य पराभवः, (23) हनूमतो वृत्तान्तः, (24) महर्षिकृता रामप्रशंसा, (25) सूर्यास्तमय-तमःप्रसर-चन्द्रोदयादि वर्णनम्, (26) वैतालिककृतं प्राभातिकं प्रबोधनमित्येते विषयाः कविना वितत्य वर्णिता दृश्यन्ते।

अथ किंचिदस्य ग्रन्थस्य काव्यगुणपरिपूर्तिप्रदर्शनाय प्रयतामहे। मङ्गलश्लोक एव कवेरन्यविलक्षणं चातुर्यं प्रकाशते —

"श्रीमद्धाम समामनन्ति कमलं तद्बान्धवं वा ययो-
रक्षीन्दीवररूपमाहुरथवा तद्बन्धुरूपं बुधाः।
सावर्ण्यं तटितां वपुः शुभतरं धत्तेऽथवा तद्वतां
भूयास्तां भुजगेन्द्रशैलवसती तौ दम्पती संपदे।" इति।

कविरविनयं परिहरन् स्ववाण्या रामकथासंबन्धादेव गुणज्ञविद्वत्परिग्रहार्हत्व-मुपपादयति —

"चित्तं रिक्तगुणापि तत्रभवतां वाणी ममाणीयसी
श्रीमद्रामकथासुधारसपरिष्वङ्गादियं गाहते।
सम्पर्कं नवशर्कराभिरुदकं कूपोद्धृतं याति चे-
दस्वादिष्ठमपि स्वतो रसविदामास्वादनीयं न किम्॥" इति।

श्लेषानुप्राणिताया उपमायाश्चमत्कारमधस्तने गद्ये विभावयन्तु सुधियः —

"त्वया खलु दयापरवशतया गुरुतरदुरितभरितमदमलिनविदयहृदयनिशिचर-निचयकुचरितचकितविशकलितसकलजगदभयवितरणकृते कृतावतारेण निशा-मुखवदस्तमितखरतेजस्कं, निपुणकविप्रबन्धवत् निराकृतदूषणं, निदाघकालिकसर इव शोषितकबन्धम्, निर्मलमुनिमण्डलमिव निगृहीताक्षं, निकेतनाभ्यन्तरमिव शान्तप्रकम्पनम्, प्रोषितभवनमिव भग्नकुम्भम्, शारददिवसवत्समाप्तमेघनादम्, अध्वरदीक्षितवदतिकायशोषणधन्यम् औषधसेविनः शरीरवदपेतमहोदरातङ्कं, नखायुधनखमिव निर्भिन्नसद्वारणकुम्भकर्णं, निर्वाणदीपभाजनमिव निर्दग्धदशमुखं लङ्काराज्यमकारि॥" इति।

अत्र प्रत्युपमानं श्लेषहेतुकं साम्यमुपस्थापयन् कविः स्वस्य नानार्थशब्दघटना-चातुर्यमाविष्करोति ।

पितामहप्रसादात् धनाधिपत्यं लोकपालत्वं च प्राप्तस्य कुबेरस्य वैभवं वर्णयन्नाह —

"आशापूर्ति कृतवत्यपि भगवति पद्मसंभवे देवे ।
उच्चैर्वैश्रवणोऽसावुपलेभे चित्रमुत्तरामाशाम् ॥" इति ।

लोकपालत्वादुत्तरां दिशमुपलेभे इति वास्तवोर्थः । नानाविधोपमारूपकोत्प्रेक्षाद्यर्थालंकारभासुरं च भगवतो वासुदेवस्य वर्णनार्थं गद्य (पृष्ठ 16-24) मस्य कवेरलंकारयोजनानैपुण्यममन्दं प्रकाशयति । अनुप्रासशोभाभूषितमिदं नारायणस्तुतिपरं पद्यमप्यवधार्यताम् —

"श्रिया सह विहारिणे शुभगुणैरलंकारिणे
निशाचरविदारिणे निगममौलिसंचारिणे ।
रथावयवधारिणे रसविदां मनोहारिणे
नताभिमतकारिणे नम इदं मधोर्वैरिणे ॥" इति ।

भगवतो नारायणस्य चक्षुषः सूर्योऽजायतेति, प्राणाद्वायुर्मुखादिन्द्रेण सहाग्निरपि जज्ञ इति च पुरुषसूक्ते शुश्रुम । तमर्थं कविरत्र स्मारयति —

"अग्रे चक्षुः किमपि जगतां यस्य ते चक्षुषोऽभूत्
यस्य प्राणात्समजनि जगत्प्राण इत्यामनन्ति ।
गीर्वाणानां मुखमपि मुखादाविरासीद्यदीयात्
तस्मै तुभ्यं मुरहर नमोवाकमावर्तयामः ॥" इति ।

केकसीगर्भात् कुम्भकर्णस्य शूर्पणखायाश्च संभवं वर्णयन्नयमुचितमुपमानं निबध्नाति —

"कादम्बिनीवाशनिमद्भुतं सा क्रूरं बतासूयत कुम्भकर्णम् ।
दुष्टां ततः शूर्पणखामसूत दुर्वासनेवापथसंप्रवृत्तिम् ॥" इति ।

विभीषणो हि न राक्षसचेष्टितः, अपि तु धर्मात्मेति प्रसिद्धः । तदर्थमुपमान्तरं प्रयुङ्क्ते —

"उद्गते पुनरपत्यकत्रये सा विभीषणमसूत सात्त्विकम् ।
वार्षिके तु कलुषे झरे गते वाहिनीव विमलं शरत्पयः ।" इति ।

दशाननो घोरेण तपसा पितामहमाराधयंस्तद्वशीकरणाय नव शिरांसि समिद्धेऽग्नौ जुहाव । दशमशिरोहवनोद्यममात्रेण तुष्टो धाता स्वयं संनिधाय तस्मै इष्टान्

वरान् वितनार । छिन्नपूर्वाणि मस्तकान्यपि पुनः प्ररोहन्त्विति तमन्वग्रहीत् । एतमर्थं कविः स्वासाधारणधोरण्या निरूपयति ।

"बर्हिषि मुदा हुतानां पितामहोक्त्या पुनः प्ररूढ़ानाम् ।
पौलस्त्यमस्तकानां नवता संख्यातदात्वजननाभ्याम् ।।" इति । ११३

पितामहेन प्रेरितया सरस्वत्या कृतवञ्चनः कुम्भकर्णः कठोरतपस्यातोषितात्तस्मात् निद्रावरं लेभे । तत्र कविश्चमत्कारं दर्शयति —

"न केवलं पङ्क्तिमुखानुजन्मा निद्रामुपादत्त हिरण्यगर्भात् ।
तदागतित्रासविधूतनिद्रो जनः सुखस्वापमवाप सर्वः ।।" इति । १२२

रावणस्य च देवताभिरवारणीये पराक्रमे जृम्भमाणे, लोकेषु धर्मलोपे प्रवर्तमाने, तादात्विकीं दशां परिसंख्यालंकारगर्भैर्वचोभिरेवं प्रकाशयति —

"श्रुत्यन्ताधिगमो धनुर्गुणेषु, दानप्रसङ्गः संग्रामेषु, सहोमता चन्द्रमौलौ, सात्त्विकाभ्युदयः सुरतेषु, सफलत्वं शिलीमुखेषु, सोमग्रहो राहौ, सुराग्रहो राक्षसान्तःपुरेषु, पशुबन्धो गोष्ठेषु, अरण्याकलनं व्याघ्रेषु, इष्टकोपधानं नायिकाप्रणयकलहेषु, स्वाहारावधारणं निर्वृत्तपाकेषु, जपाभ्युदयः काननेषु, सुमनस्संगतिस्सुन्दरीचिकुरेषु, योगाचारोपलालनं वेदबाह्येषु, महातपस्स्फुरणं मध्याह्नेषु, न प्रजास्वासीत् ।।" इति १३६

काममोहितो रावणस्तपःपूतां वेदवतीं बलाद्वशीकर्तुमियेष । सा तु तेन परामृष्टान् स्वकेशान् करवालीभवता करेण च्छित्त्वा तत्स्पर्शदोषापनुत्त्यै अग्निं प्रविवेश । एतं पुराणप्रसिद्धमर्थं कविरनुप्रासेन श्लेषेण च नवीकुर्वन्नाह —

"तपोनिधेरलङ्केशच्छेदस्तस्यास्तदोदितः ।
भाविनं हन्त लङ्केशच्छेदं परमसूचयत् ।।" १६५

सा पुनः सागरकन्यावतारतया विश्रुता कृष्णवर्त्मावगाहनमेव कर्तुकामा भगवती निवदवती वेदवती, 'स्वयमहं पुनरपि भूमावुत्पद्यापि तव विपत्तौ निमित्तं भविष्यामी'ति कृशतनुरशपद्दशमुखम् ।

दोषाकरे तु तस्मिन्नृज्जृम्भति साधुचक्रतोषहरे ।
पद्मप्रिया कृशानौ भास्वन्मूर्तिर्विवेश वेदवती ।।" इति । १६७

अस्मिन् पद्ये 'उज्जृम्भती'ति प्रयोगं वीक्ष्य केचिदाशङ्केरन्—'कथमस्य जृम्भतेरात्मनेपदिनोपि शत्रन्तत्व' मिति । किन्तु वैयाकरणसंमत एवायं प्रयोगः । चक्षिङो ङित्करणाज् ज्ञापकादनुदात्तेत्त्वलक्षणमात्मनेपदमनित्यमिति सिद्धान्तकौमुद्यां स्पष्टम् । 'उदयति विततोर्ध्वरश्मिरज्जौ" इत्यादयः शिष्टप्रयोगाश्च अत्र प्रमाणम् ।

अनरण्येन सह रावणस्य महति संग्रामे प्रवृत्ते, वीरमरणमवाप्तानां योधानां स्वर्गगमनं वर्णयति —

"हा कष्टमतनुयुद्धे निहतानां धन्विनां तदीयानाम् ।
अनवरतमप्सरोभिः साकं नाकेप्यभूदतनुयुद्धम् ॥" इति । १८४

अत्र अतनुशब्दे श्लेषो द्रष्टव्यः ।

युद्धे पराजितः, मदान्धेन रावणेन परिहसितश्चायं क्षत्रियोऽनरण्यः, 'मम वंशेऽवतरिष्यति रामाभिधानः कश्चित्, स च ते वधं करिष्यती' ति रावणं शशाप । तं शापं कविरेभिरक्षरैरावेदयति —

"दशरथात्प्रथितो मम संततावतरिष्यति राम इति प्रभुः ।
दशमुखस्य तवापि स पञ्चतां रचयिता नियतं चतुराकृतिः ॥"इति । १८९

अत्र संख्याकृतश्चमत्कारः स्पष्टः । एवमनरण्यशापग्रस्तं तं रावणं त्वमवधीरिति मुनयो रामं प्रशंसन्ति —

"अङ्कूरितः शापमुखेन योयं पुरानरण्येन दशास्यनाशः ।
तद्वंशजश्चापमुखेन रामः सारण्य एनं समपूरयस्त्वम् ॥" इति । १९१

रावणापहृतानां पतिव्रतानां विलापानुपवर्णयन् भारतीयकौटुम्बिकजीवनमेवं चित्रयति —(२२४-२२६)

"अग्नीन् प्रणीय बहिराह्निककर्म कर्तुं यातो बताग्निशरणं पुनरेत्य होतुम् ।
अप्रास्तधूलिकमगोमयलेपनं तत् पत्नीविहीनमवलोक्य पतिः कथं स्यात् ॥

"नेतुं मां श्वशुरादिभिर्निजगृहानाप्ते जने प्रेषिते
कष्टं भाविवियोगचिन्तनपरिप्लुष्टं ययोरङ्गकम् ।
नेत्रद्वन्द्वमुदश्रु दीर्घनिगलन्निश्वासशुष्कं मुखं
तौ मातापितरौ किमद्य कुरुतामेवंविधायां मयि ॥
व्यापारैर्मदनस्य यः क्षणमिव क्षिप्त्वा निशामद्भुतैः
प्रत्यूषे गुरुसाध्वसेन शयनादुत्थाय बाह्याङ्गणम् ।
यास्यन्तीमनुमन्यते बत चिरात्संश्लिष्य संश्लिष्य मां
कान्तः सोयमनन्यदृष्टिरधुना कां कामवस्थां गतः ? ॥" इति ।

एवं रावणेन बलादानीतासु कन्यकासु न कापि तं स्वयं वव्रे, केवलमस्य कामुको नीच इति दुष्कीर्तिराविरासीदित्याह —

"सुरासुरव्यालनराशराणां बलाद्गृहीतासु विलासिनीषु ।
न कापि तं कामयते स्म पापमकीर्तिरेका स्वयमेव वव्रे ॥" इति । २२८

चन्द्रोदये स्वच्छन्दं प्रवृत्तां कामक्रीडां शृङ्गारसारज्ञः कविरित्थं वर्णयति

"तन्वङ्ग्याः प्रथमं कचग्रहविधौ यत्नं महान्तं व्यधात्
रोमाञ्चश्लथसंधिबन्धनजुषा प्रीत्योल्ललन्तौ कुचौ ।
यत्नेनाथ लघीयसैव जगृहे हन्त स्वतो निर्गल-
न्नीवीकं जघनं ग्रहीतुमभवन्निर्यत्न एव प्रियः ॥ २३९
श्रमजलकणैः पाद्यार्घ्यादीन् वधूर्मधुपर्कम-
प्यधरमधुभिर्दत्त्वा कन्दर्पदैवतपूजने ।
श्लथकचमुखेनैव व्यातन्वती कुसुमाञ्जली-
नुरसि पतिता भर्तुः कर्तुं प्रणाममिवान्ततः ॥" इति । २४१

एवमस्य रतिरहस्यवेदित्वमपि व्यञ्जितम् । रम्भाया रूपश्रियमालोक्य मोहितस्य रावणस्यैषा कामवासनावासितोक्तिः —

"त्वदङ्गे संलीनं मन इव विचेतुं दृगधुना
निमज्ज्योन्मज्जन्ती महिमवति नाभीसरसि ते ।
समारुह्योत्तुङ्गं स्तनगिरिमधश्चावतरितुं
न जानाना मार्गं ननु सुमुखि तत्रैव वलते ।" इति । २४६

अनुभयनिष्ठा हीयमाभासरूपा रतिः । तदाह रावणः —

"मयि चण्डकरो निशाकरो हिमरश्मिस्त्वयि हन्त सुन्दरि ।
कुलिशायुध एव मय्यसौ कुसुमेषुस्त्वयि मीनकेतनः ॥" इति । २५२

रावणेन बलाद् भुक्तमुक्तां रम्भां वर्णयति —

"तेन भुक्तोज्झिता रम्भा ददृशे निष्प्रभाकृतिः ।
रात्रेरन्ते विमुक्तेव राहुणा मूर्तिरैन्दवी ॥" इति । २६०

ततः चन्द्रास्तमयं प्राभातिकसमयं चैवं कविश्चित्रयति — (२६५-२६९)

"अथ 'स्नुषागमनदूषितो दशकन्धरः करेण मया स्पृष्ट' इति सानुशयश्चन्द्रमाः पश्चिमसागरे स्नातुकाम इव प्राचेतसीं दिशमुपानशे ।

स्वयमेव गुरुतल्पगामितया शाश्वतकलङ्कस्य मित्रोदयासहिष्णोरेतस्य स्वल्पे निमित्ते कोयं प्रायश्चित्तारम्भ इति विकासच्छद्मना पद्मिनी परिजहास ।

ततः स्वभर्तृदोषोद्घाटने प्रत्युत्तरं वक्तुमशक्तेव कुमुद्वती म्लानमुखी मौनमभजत ।

प्रतिपक्षमूकीभावसंपादनतः प्रविशदामोदां पद्मिनीं स्तुवन्त इव मुखरित-हरिन्मुखाः चञ्चरीकास्तामेवाभिजग्मुः ।

सर्वमेतदुच्चस्थलात्प्रेक्षितुमिव कर्मसाक्षी स्वयमुदयगिरिशिखरमध्यारुक्षत् ॥" इति ।

अत्र उत्प्रेक्षापह्नुत्यादीनां वैलक्षण्यं सहृदयैः स्वयमेव विभाव्य संतोष्टव्यम् ।

सूर्ये उदीयमाने, अस्तं गते च चन्द्रे, कालरूपोऽध्वर्युः होममाचरतीति रूपयति —

"मन्त्रांस्तारमुदीरयत्स्वलिगणेष्वस्ताचलग्रावभिः
सोमं द्रागभिषुत्य तद्द्युतिमयान् सद्यो गृहीत्वा रसान् ।
प्राक्शैलोत्तरवेदिमूर्ध्नि विधिना सम्यक् प्रतिष्ठापिते
कालाध्वर्युरहो जुहोति विपुलज्वाले पतङ्गानले ॥" इति । २७२

एतच्च रूपकमस्य ग्रन्थकर्तुर्याज्ञिकप्रक्रियावेदित्वं सूचयतीति स्पष्टम् । सूर्यमुद्यन्तं दृष्ट्वा कविः, प्रातः स्नात्वा विहितकर्मानुष्ठानेन वैदिकमार्गबद्धश्रद्धेन विप्रोत्तमेन तमुपमिमानो रूपकालंकारक्रमेण वर्णयति —

"स्नात्वा सिन्धुजले समापिततमाः साम्नामृचां वासभूः
अध्यास्य प्रथमाचलासनमसावब्जाक्षमन्तर्भजन् ।
हंसो हन्त पवित्रभास्वरकरो नूनं समभ्यस्यति
प्राणायामशतान्यनुक्षणमहो द्यामुत्पतन्नासनात् ॥" इति । २७३

सूर्यमण्डलमध्यवर्ती नारायण इति श्रौतमर्थं मनसि निधायैव 'अब्जाक्षमन्तर्भज' न्नित्याह । उदयभूभृत् स्वकटकात् स्वशत्रोरस्ताचलस्य कटके प्रत्यहमायसमस्त्र-विशेषं क्षिपतीति उत्प्रेक्षते —

"प्राक्तनस्वकटकादवनीभृत् पश्चिमक्षितिभृतः कटके किम् ? ।
प्रत्यहं प्रदिशति प्रतिकूले तप्तमर्कमयमायसपिण्डम् ॥" इति । २७४

रावणाद्भीताः शरणार्थिन्यो देवता भगवन्तं नारायणमित्थमभिष्टुवन्ति —

"अष्टश्रुतेः किल विधातुरभूदहो प्राक्
आन्ध्यं हरे चतसृणां हरणाच्छ्रुतीनाम् ।
तस्यापनोदनकृते तव मत्स्यमूर्ति-
रन्यादृगञ्जनविशेष इवाविरासीत् ॥" इति । २८२

कूर्मावतारेण भगवता अमृतप्राप्तौ देवतानां साहाय्यं व्यधायि । तेनैव बराहरूप-धारिणा राक्षसपीडिताया भूमेरुद्धारः कृतः । तदाह —

"वहता काच्छपं रूपं वाराहं च श्रियः पते ।
त्वया पुरा नवसुधा वसुधा च समुद्धृता ॥" इति । २८३

नवसुधा वसुधेत्यत्र यमकविरोधाभासौ दर्शनीयौ ।

भक्तस्य प्रह्लादस्य रक्षणार्थं 'नरसिंहाकृतिं' भजता नारायणेन स्तम्भादेव

साऽकृतिः प्राकाश्यमनीयत । अन्यत्र सर्वत्र नरसिंहाकृतिरद्यापि अनुवर्तते इति भगवान् वेदान्तदेशिकः,

"भक्तस्य दानवशिशोः परिपालनाय
भद्रां नृसिंहकुहनामधिजग्मुषस्ते ।
स्तम्भैकवर्जमधुनापि करीश नूनं
त्रैलोक्यमेतदखिलं नरसिंहगर्भम् ।"

इत्याह । तदनुयायी वेंकटाध्वरी तु भगवता पूर्णतया सिंहरूपं कुतो न स्वीकृतमिति विचारयन् तत्रेदं कारणमुत्प्रेक्षते —

"दासत्रासकदैत्येन्द्रदलनत्वरया तव ।
कण्ठीरवाकृतिः कण्ठादधस्तादेव कुण्ठिता ॥" इति । २८४

"भगवतस्त्वरायै नम" इति वयमेतदनुमोदामहे । क्षत्रान्तकस्य परशुरामस्य स्तुतिं करोति —

"जामदग्न्याकृतिं प्राप्ते जगतामीश्वरे त्वयि ।
नक्षत्रवृत्तिमापेदे चित्रं द्यौरिव भूरपि ॥" इति । २८६

देवताः भगवतो विष्णोः सकाशे, रावणस्य दौर्जन्यमेवं विज्ञापयन्ति —

"हिंसैकाग्रमतिः स मध्यममहो गृह्णन् पुमर्थद्वयं
त्रीन् लोकान् व्यथयन् चतुर्मुखवरात्पञ्चत्वभीतिं जहत् ।
क्रीडाशैलमुदस्य षण्मुखपितुः सप्ताश्वतेजा दिशा-
स्वष्टासु क्रमते रसं तु नवमं लुम्पन् दशास्यो हरे ॥" इति । २८७

अस्मिन् पद्ये 'एक'शब्दादारभ्य 'दश' पर्यन्तं संख्यावाचकानां प्रयोगः किमपि रामणीयकं पुष्णाति ।

'द्रव्यमिव गुणाश्रय' मित्यादौ पृथुगद्ये कवेः तर्क-मीमांसा-व्याकरण-योग-सांख्यादिविविधशास्त्रपारंगतत्वं भगवद्गुणवर्णनपरैः श्लिष्टैर्विशेषणैस्सुव्यक्तं विदुषः आनन्दयति [अस्य गद्यस्य व्याख्याने व्याख्यातुः तत्तच्छास्त्रप्रक्रियापरिचयोपि स्फुटमवभासते]

संग्रामवर्णनेप्यस्य नैपुण्यमीक्षणीयम् —

"केनचिद्युधि सकृत्प्रयोजिताप्युच्चकैरसिररेर्गलं तथा ।
अच्छिनत्त्वरितमाहवे समं तत्कलत्रगलसूत्रमप्यहो ॥ ३०४
धनुष्मते तत्र रिपून् प्रहर्त्रे दत्त्वाञ्जलीन् केचिदसून् ररक्षुः ।
ये नाम तस्मै ददुरञ्जलीन् न स्वानामगृह्णन्नुदकाञ्जलींस्ते ॥" इति । ३०६

अत्र ज्ञातिवाचकस्वशब्दस्य 'स्वमज्ञातिधनाख्यायां' मिति पर्युदासेन सर्वनामसंज्ञा-विरहात् स्वानामिति षष्ठीबहुवचने रूपं प्रयुञ्जानः कविः स्वस्य व्याकरण-सारार्थवेदित्वमपि सूचयतीव ।

युद्धे रावणेन पराजितं व्रीडावनतवदनमिन्द्रं प्रति प्रजापतेरयमुपदेशः चिरस्मरणीयो विलसति —

"हन्त स्वादूभवति यदसत्कर्म निर्माणकाले
नीचानां तत् पचनसमये यातनामातनोति ।
मन्दाग्नीनां निगरणदशास्वेव संतोषहेतु-
र्माषापूपः किमथ न दिशत्यक्षयं कुक्षिरोगम् ॥ ३२२
स्वात्मन्येव स्थितमविदितं हन्त जन्तोः पुराणं
पापं भूयः प्रथयति फलं पक्त्रिमं कालयोगात् ।
वीटीचूर्णप्रकृतिरिह या शर्करा तत्र गूढ़ो
वह्निर्दाहं दिशति समये व्यञ्जितो वारिसेकैः ॥" इति । ३२५

अत्र द्वयोरपि पद्ययोरुपात्ते लोकप्रसिद्धे निदर्शने पामराणामपि मोदमावहतः । अन्ते च प्रजापतिः सुत्रामाणं सान्त्वयन्नेवमुपदिशति —

"प्रतिकूलेनुकूले वा प्राप्ते विधिविपाकतः ।
न खेदं न च संमोदं पण्डितः प्रतिपद्यते ॥" इति । ३२७

एवं रावणस्य पराक्रमं विजयं च श्रुत्वा विस्मितो रामभद्रः, किं तस्यापि जेता कश्चिदासीदिति तत्त्ववेदिनमगस्त्यं पृच्छति । सोयं प्रश्नः पर्यायोक्तविधया कविना निबद्धः कामपि रम्यतामृच्छति —

"अशेषविजयित्वं यदुत्सृष्टं तस्य रक्षसः ।
तस्यापवादं शुश्रूषे तवैव वचनादिति ॥" ३३१

विन्ध्याचलमसौ कविस्त्रयोदशभिः पद्यैः कुलकेन वर्णयति । प्रथमे पद्ये तं यति-तुल्यमाह —

"गृहीतवेणुं तरुजालबालप्रवालकाषायपटं वसानम् ।
मुहुर्घनाम्भःकलिताभिषेकं यांतं रविं भेत्तुमिव प्रवृत्तम् ॥ इति । ३३६

अयं विन्ध्यो राजलक्षणयुक्तत्वात् स्वां महीभृदाख्यामन्वर्थयतीति श्लेषमुपजीव्यो-पपादयति —

"सुशोभनागं दधतं हि शृङ्गं सिंहासनाञ्चच्छरभारवन्तम् ।
उच्चामरं पुष्पवदातपत्रच्छायावृतं सार्थमहीभृदाख्यम् ॥" इति । ३३७

समाधिस्थेन योगिवर्येण साम्यमापादयति —

"हरिं गुहाशायिनमाकलय्य निरुद्धमत्ताशयनागचेष्टम् ।
सत्त्वाश्रयं सत्पथमाश्रयन्तं स्थितं समाधाविव निश्चलाङ्गम् ॥ इति ।३३९

अत्रैव शृङ्गारमपि स्वादयति —

"गात्रोपरि न्यस्तपयोधरोरुभारां परिभ्रान्तमहोडुमालाम् ।
चुम्बन्तमुत्फुल्लसुधांशुवक्त्रां वीरायमाणां वनितामिव द्याम् ॥" इति । ३४१

वामनावतारेणास्य गिरेः सादृश्यं स्थापयति —

"विरोचनोद्भूतवसुप्रतापहरागमं प्राप्तदिगम्बरान्तम् ।
पादाग्रसंलग्नसुपर्वसिन्धुं त्रैविक्रमं देहमिव प्रवृद्धम् ॥" इति । ३४२

श्लेषचक्रवर्तिनः पुत्रः किलायं कविः । तदस्यापि श्लेषनिपुणत्वं स्वाभाविकं प्रतीमः । नर्मदां (एषैवे रेवेति नामान्तरेणाप्युच्यते) श्लेषेण धेनुतुल्यां निरूपयति —

"पयः प्रवाहैः परितापहन्त्रीं पुण्यां वृषोल्लासकरावलोकाम् ।
समांसमीनां स ददर्श रेवां धीरारवां धेनुमिवोच्चलन्तीम् ॥" इति । ३५०

अत्र 'समांसमां विजायते' इति सूत्रेण पाणिनिना व्युत्पादितस्य समांसमीनाशब्दस्य प्रयोगः, तस्यापि समांसा मीना यस्यां सेति सभङ्गश्लेषानुकूलव्युत्पत्त्यन्तरेण अर्थान्तरबोधकत्वं चेति पण्डिता एतादृशाय व्युत्पन्नशब्दप्रयोगाय स्पृहयेरन् ।

विरोधाभासस्य चैषा छटा दर्शनीया—

"विहृत्य स स्त्रीषु विलासभेदैर्विहर्तुमस्त्रीषुविलासभेदैः ।
नदीप्रवाहं परिहाय तस्मात् सदीप्रवाहं प्रविवेश सैन्यम् ॥ इति । ३५८

एवमर्जुनेन कार्तवीर्येण पराभूते रावणे, कविः सचमत्कारमतिशयं द्योतयति —

"दोषाकरः स बलवानद्भुतमुद्धूतनैकनालीकः ।
अपजयमेव प्रायादर्जुनपक्षे विजृम्भमाणेपि ॥" इति । ३६१

कार्तवीर्यं प्रसाद्य रावणबन्धमोक्षमभ्यर्थयमानस्य भगवतः पुलस्त्यस्य वचस्यपि श्लेषो द्रष्टव्यः —

"मार्गं सतां कलयितुं विगलत्तामस्कं प्राप्तोदयस्य परिशोषितशत्रुकीर्तेः ।
सर्वोत्तरं तव सहस्रकरस्य तेजः नक्तंचरोर्हति न सोढुमितीह युक्तम् ॥" इति ३६७

पर्यायोक्तस्य चमत्कारस्तत्रैव कार्तवीर्यगुणानां वर्णने स्वस्यासामर्थ्यं कथयतः पुलस्त्यस्य वचने इत्थं द्रष्टव्यः —

"आस्यं चेन्नाकलोकस्य नागलोकस्य चेशताम् ।
ततस्तेऽद्रक्ष्यमस्तोष्यं दोःसहस्रगुणान् पृथक् ॥" इति । ३६८

वालिना सह योद्धुकामं रावणमस्माद्दुस्साहसात् वारयन्नाह तदमात्यस्तारः —

"अमरपतिविजेतुस्तत्सुतो मे कियानि-
त्यहह तव युयुत्सा वालिना रावणाभूत् ।
अरणिमहमगृह्णां पाणिनैवेति गर्वात्
तदुदितमपि वह्निं धारयेत्कः करेण ॥" इति । ३७७

वालिरावणयोः परस्परजयापेक्षिणोर्वर्णने कीदृशमुपमानं कविर्योजयतीति सुधियोऽवदधतु —

"परस्परं वञ्चयितुं चिरेण प्रतीक्षमाणाववकाशमेवम् ।
विदिद्युताते कपिराक्षसेन्द्रौ विवेकमोहाविव सावधानौ ॥ इति । ३८४

वालिनि कक्षान्ते रावणं बलाद् गृहीत्वा धावति, तस्य वेगमनुगन्तुं न कोपि शशाकेति वर्णयति —

"रक्षःपतिं व्योमनि कक्षलम्बं विधाय धावन्तमथानुगन्तुम् ।
न तं कुरङ्गो न च तत्तुरङ्गो न तद्भुजां शत्रुरपि क्षमोभूत् ॥" इति । ३८६

अयमपि पर्यायोक्तस्यैव विषयः ।

रावणोपि वालिना पराजितस्तेन साकं सख्यमिच्छन् तमेवं श्लेषप्रक्रियया स्तौति —

"भवानिवासौ भगवान् पतङ्गः शाखामृगात्मानमुपैति मूर्तिम् ।
नित्यं चतुःसागरयायिनस्ते स किं नु सिन्धुद्वयगो हि तुल्यः ॥" इति । ३९२

अत्रोत्तरार्धे औपम्यनिषेधे तात्पर्यात्प्रतीपभेदः । कश्चिद्राजानुग्रहकामी कविस्तमेवं स्तुतवान् —

"किं वृत्तान्तैः परगृहगतैः किं तु नाहं समर्थः
तूष्णीं स्थातुं प्रकृतिमुखरो दाक्षिणात्यस्वभावः ।
गेहे गेहे विपणिषु तथा चत्वरे पानगोष्ठ्या-
मुन्मत्तोव भ्रमति भवतो वल्लभा हन्त कीर्तिः ॥" इति ।

एतच्च पद्यमभिनवगुप्ताचार्यैः 'लोचन' टीकायामुदाहृतं प्राचीनं सूक्तिरत्नम् । तदुपजीव्य वेंकटाध्वरिणापि रावणमुखेन वाली एवं स्तूयते —

"क्रमेण चतुरर्णवाक्रमणतो मदो मास्तु ते
भवन्तमपि हन्त निर्जयति संततं त्वद्यशः ।
यदेतदवगाहते युगपदेव देवापगां
धरास्वपि दुरासदानपि च सप्तरत्नाकरान् ॥" इति । ३९३

मायामानुषरूपेणावतीर्णो रामः, 'आत्मानं मानुषं मन्ये रामं दशरथात्मज' मिति स्वस्मिन् मानुषत्वं भावयन्नपि सेतुबन्धनजटायुमोक्षप्रदानादिभिर्विचित्रैश्चरित्रैः परमपुरुषत्वमपि तत्र तत्र प्रकटयामासेति संप्रदायविदां संमतमेतत् । तदेवागस्त्यमुखेन कविर्निबध्नाति —

"विचित्रं चारित्रं ननु मनुजतागुप्तमपि ते
कृपारम्य श्रीमन् पिशुनयति पारम्यमतुलम् ।
अपि च्छन्नं पर्णैः कुसुमपटलं पाटलतरोः
प्रगल्भं सौरभ्यं प्रकटयति दूरात्प्रसृमरम् ॥" इति । ४०२

आञ्जनेयस्य बाल्ये एव सूर्यमपि ग्रहीतुमुत्पतितस्य असाधारणं महत्त्वं भगवत्प्रसादलब्धमेवेति तर्कयति —

"मध्यं रवेरधिवसन् मधुसूदनस्त-
मभ्याशमागतमलोकत जातमात्रम् ।
सर्वोत्तमत्वमखिलैरभिनन्दनीयं
शाखामृगस्य भविता कथमन्यथास्य ॥" इति । ४१८

हनूमान् सूर्यादेव सर्वाणि शास्त्राणि जग्राहेति रामायणोक्तमर्थं श्लेषेण प्रकारान्तरेणाह —

"सूर्याभिमुख्यमुच्चैर्विना न वैदुष्यमिति निदर्शयता ।
अग्राहि शास्त्रमसमादहरीशादप्यहो हरीशेन ॥ इति । ४४०

अत्र शिष्यो हरीशः, गुरुस्तु अहरीश इति शब्दविन्यासकृतो विरोधः, 'अहो' इति पदेन सूच्यते । भगवान् श्रीरामः आराम एवेति रूपयति —

"मरुत्पोतोपेतो मधुसरसशब्दालिरुचिरः
सदावल्ल्यावासः श्रितसुरभिरुत्कान्तिकपिकः ।
भवान् प्रौढामोदः श्रितधरणिजाश्लेषरुचिरः
सदारामः श्रीमान् शमयति परीतापममितम् ॥ इति । ४४५

उपनिषत्सु भगवान् भक्तानन्दकारी शीतलो ह्रद इवेत्युपमीयते । 'एष ब्रह्म प्रविष्टोस्मि ग्रीष्मे शीतमिव ह्रद' मिति प्रसिद्धमौपनिषदं वाक्यं महाभारतेप्यनूदितं पश्यामः । एतदेवोपजीव्य देवनायकपञ्चाशति **श्रीवेदान्तदेशिकोपि "मम धीर्भवन्तं ग्रीष्मे तटाकमिव शीतमनुप्रविष्टा"** इत्यन्वग्रहीत् । तथा च वेंकटाध्वरी महर्षिमुखेन रामं विज्ञापयति —

"निर्मलं प्रतिगृहीतलक्ष्मणं त्रातहंसकुलमार्ततृप्तिदम् ।
त्वां गभीरमतिशीतलं ह्रदं जानकीरमण जानते बुधाः ॥" इति । ४४७

रामस्य शौर्यौदार्यादिकल्याणगुणगणप्रशंसायां कविः स्वस्य सामर्थ्यमाविष्कुर्वाणस्तस्मिन् मानवाकारे परस्मिन् ब्रह्मणि निरतिशयां भक्तिमपि संसूचयति । तत्रेदं प्रतापवर्णनम् —

"वृद्धिं क्षयं प्राप्तवतोः प्रतापप्रतीपयोस्ते रणमूर्ध्नि चित्रम् ।
लोकान्तरास्कन्दनशक्तिभाजोरादित्यभेदित्वमभूत्समानम् ।।" इति । ४५२

भगवतो नीलमेघश्यामलत्वे किमपि कारणमुत्प्रेक्षते कविः —

"पर्यङ्कं श्वशुरं च वामनयनं पादाम्बु तद्वारिणो-
प्यावासश्वशुरौ तनूभववधूवाहावपि स्वस्य च ।
प्रत्यर्थित्वधिया त्वदीययशसा दृष्ट्वा जितानि स्वयं
सत्त्वात्मापि हरिर्भयादिव तनुं धत्ते घनश्यामलाम् ।।" इति । ४५६

रामस्यौदार्यमनन्यसामान्यं श्लाघमानः कविः कल्पवृक्षं चिन्तामणिं वा तदुपमानतानर्हं मत्वा सयुक्तिकं स्वमतं प्रतिष्ठापयति —

"पत्रं च पुष्पमथवा फलमाश्रितेभ्यः केभ्यश्चिदेव परिदाय वृथोन्नतेन ।
दातुं त्वमत्र चतुरश्चतुरः पुमर्थान् देवद्रुणा दशरथात्मज नोपमेयः ।। ४६१
काठिन्यैकास्पदमिह मणिः कश्चिदास्तां जडात्मा
चिन्तापूर्वं जगति विबुधा यस्य गृह्णन्ति नाम ।
सर्वज्ञं त्वां सदयहृदयं नित्यदौर्गत्यचिन्ता-
संतापघ्नं रघुकुलपते संश्रयन्ते गुणज्ञाः ।।" इति । ४६२

प्रतीपव्यतिरेकयोरयमद्भुतश्चमत्कारः सहृदयानामानन्दकारी ।

अयं विरोधाभासोपि पुण्यश्रवणकीर्तनस्य धर्मप्रतिष्ठापनार्थमवतीर्णस्य भगवतो रामभद्रस्य महिमानमबाधं प्रकाशयति —

"यदीश्वरोप्यञ्चसि राघवत्वं नराघवत्वं तदपाकरोषि ।
सीतापते युक्तमिदं तु चित्रं यशोधनस्त्वं नयशोधनोपि ।। इति । ४६५

असंगतेरिदं सुन्दरमुदाहरणं दृश्यताम् —

"कोदण्डस्य गुणेन तत्रभवतः कर्णान्तमास्कन्दता
ताटङ्कप्रकरास्तमीचरवधूकर्णान्ततश्च्याविताः ।
किंचैनं रघुनन्दन त्वयि बलाद् दूरं समाकर्षति
त्रुट्यन्ति प्रतिकूलराजमहिषीमाङ्गल्यसूत्राण्यहो ।।" इति । ४६९

रामे राज्ञि (चन्द्रे च) सति तद्विरुद्धानि कार्याणि जगति संभवन्तीति वदन् विस्मापयति —

"त्वयि रामचन्द्र सति राज्ञि जृम्भिते विकचीभवन्त्यपि च नीरजश्रियः ।
भुवि साधुचक्रपरितोष एधते परिशोशुषीति जलधी रयादहो ।।" इति । ४८०

सूर्यास्तं वर्णयन् कविरुत्प्रेक्षते —

"द्विजराजवसुहरोसौ तीक्ष्णकरैः कलितकुवलयग्लानिः ।
अन्ते सानुशयः किं पूषा काषायमंशुकं धत्ते ।।" इति । ४८८

प्रत्यक्षरश्लेषमयप्रपञ्चनिर्माणदक्षस्य सुबन्धोः प्रतिभासम्पत्तिं वेंकटाध्वरिण्यपि

अविकलां पश्याम इति नैयमतिशयोक्तिः । अस्तं गते सूर्ये जगति सर्वत्र व्याप्नुवदन्धं तमो दृष्ट्वा कविरेवमुत्प्रेक्षते —

"निर्मज्जितं हि विधिना निजतातमब्धौ
निर्धार्य सूर्यतनया निशि जातरोषा ।
मन्ये समस्तमपि मज्जयितुं प्रपञ्चं
ध्वान्तात्मना परिससर्प दिगन्तरेषु ॥" इति । ४९७

एतच्च चन्द्रिकाया वर्णनमीक्ष्यताम् —

"दिक्सौधप्रकरमुधाद्रवायमाणः कन्दर्पक्षितिपयशोभरायमाणः ।
चाकोराननकुहरे सुधायमानः चान्द्रीणामथ रुरुचे रुचां प्रचारः ॥"इति । ५०२

याज्ञिकप्रक्रियामनुरुध्य चन्द्रं वर्णयति —

"सपत्नीकैरेव प्रणयिनि निषेव्यो युवजनैः
सतां मार्गं पुष्णन् ग्रहपरिवृतः शश्वदमृतैः ।
सुरान् धिन्वन् सोमः सुरजनिकरोयं विजयते
क्रतुध्वंसी त्वेनं कथमिव शिरो भूषणयति ॥" इति । ५०९

तत्रैव चन्द्रवर्णनप्रसङ्गे श्लेषोपस्थापितमेतद् वैचित्र्यमवधार्यताम् —

"स्वयं कुवलयस्वापहारी हृतसदंशुकः ।
दोषाकरस्तथाप्येष पाटच्चरभयंकरः ॥
तुषारभानौ त्रिपुरारिचूडापीडाकृतिख्यातिविराजमाने ।
कृष्णान्तरङ्गे कथमर्जुनेस्मिन् नक्षत्रनेतेति ननु प्रवादः ॥" इति । ५१०-५११

आकाशे विहरन्तं चन्द्रमसमालोक्य कविरेवं संभावयति —

"लक्ष्मीपतिं लक्ष्ममयं घनाभमुच्चैः स्वयं भूरुडुपे मनोज्ञे ।
आरोप्य पुष्णात्युडुपद्मभाजि प्लवोत्सवं पुष्करपुष्करिण्याम् ॥ इति । ५१३

दक्षिणनायकस्य चरितमिन्दावारोपयति —

"आशाः प्रसाधयति हासयति प्रबुद्धा-
मामोदिनीं कुमुदिनीमभिचुम्बति द्याम् ।
स्पृष्ट्वा करेण सरसीकुरुते शिलां स्वा-
माभाति दक्षिण इव क्षणदाधिनाथः ॥ इति । ५१६

क्षणदाया नाथ इति विशेष्यपदेपि चमत्कारमाधत्ते । दोषाकरश्चन्द्र इति कोशकारोक्तिमन्यथा समर्थयते —

"पान्थानन्धान् विधत्ते प्रभजति नियतं हन्त मालिन्यमन्तः
भग्नं त्रैलोक्यमातुः कलयति निलयं बाधते साधुचक्रम् ।
कुर्वन् पादप्रचारं बत सदसि सतां प्राप्तकामाभिवृद्धौ
राजा मुग्धावतंसो वहति समुचितामेष दोषाकराख्याम् ॥" इति । ५१८

चन्द्रमपि मीमांसंकयाज्ञिकप्रक्रियया वर्णयति —

"स्नातः सिन्धुजले द्युदेवयजनं सार्धं प्रविश्योडुभिः
पत्नीभिर्नवनीतपाण्डरतनुर्धृत्वाङ्ककृष्णाजिनम् ।
पीनः पर्वणि दीक्षितः कुवलयक्षेमाय सोमाध्वरी
प्राप्तः कार्श्यमनुक्षणं नवसुधाहव्यैर्यजिष्णुः सुरान् ॥" इति । ५२२

रात्रेरवसाने पश्चिमां दशामापन्नः चन्द्रमा एवं वर्ण्यते —

"अहह दधदवस्थामम्बरभ्रंशदुःस्थां
निबिडतमतमोभिर्न्यक्कृतालोकशक्तिः ।
तरलतरकराग्रस्तारकेशस्तदानी-
ममृतरुचिरवाक्षीद्वार्धकं वार्धिबन्धुः ॥ इति । ५३२

अत्र चन्द्रस्य वृद्धत्वं श्लिष्टैर्विशेषणैः साधितं चमत्कारमावहति —

रामं प्रभाते प्रबोधयतां वैतालिकानां वचसि, सूर्योदयसमये विकासमश्नुवत्या नलिन्या वासकसज्जिकात्वमित्थमुपपाद्यते —

"गन्धं वहन्ती नलिनी सरागा मन्दं हसन्ती दधती मधूनि ।
भासां निधेरागमनं प्रियस्य प्रतीक्षते वासकसज्जिकेव ॥" इति । ५३७

प्रभाते किंचिदत्यद्भुतं दर्शयति वैतालिकः —

"आरोहति प्रथमशैलमनूरुरुच्चै-
रस्ताद्रिमिन्दुरपि कुण्ठितपादशक्तिः ।
श्लिष्यत्यनङ्ग इह राम रथाङ्गचित्तं
तूर्णं तदेतदवलोकय मुक्तनिद्रः ॥" इति । ५४१

एवमुद्बोधितो रामः प्रातरनुष्ठेयानि कर्माणि यथाशास्त्रमनुतिष्ठन् गायत्रीं तु सबहुमानं बहुतरं जजापेति कविस्सहेतुकमाह —

"धनुर्वेदाभ्यासे मम गुरुरमुष्या ऋषिरभूत्
श्रुतीनामेषास्मत्कुलपतितनूनां च जननी ।
वरेण्यं भर्गस्तद्वदति च तदन्तःस्थितमिति
प्रमोदाद्गायत्रीं बहुतरमजापीद्रघुपतिः ॥" इति । ५४८

एवमनेकालंकारभासुरं श्लेषचमत्कारमेदुरं शृङ्गारादिरसप्रपञ्चस्वञ्चितमेतच्चम्पूकाव्यमुत्तमकाव्यकोटिमाटीकत इति दिङ्मात्रमुपदर्शितम् ।

अस्य ग्रन्थस्य द्वे संस्करणे उपलभ्येते । प्रथमं तावत् बंगलूर् नगरे 1888 तमे क्रिस्ताब्दे मण्डयम् चक्रवर्ति पेरियस्वामि तिरुमलाचार्येण विरचितया भावबोधिन्याख्यया संक्षिप्तव्याख्यया परिष्कृतमान्ध्रलिप्यां सम्मुद्रितं विलसति । द्वितीयं तु मुम्बापुर्यां गोपालनारायणजनतया स्वकीये मुद्रालये नागराक्षरैर्मुद्रितं दृश्यते । अस्मिन् संस्करणे शीर्षकपत्रस्याभावात् 'अयं ग्रन्थः कस्मिन् वर्षे प्रका-

शित' इति न ज्ञायते । एतच्च संस्करणमपूर्णं, "दशरथनृपदुग्धोदन्वतः शीत-भानो·····जनकदुहितृजाने भावनत्वावधेयम्"* इत्यन्तमेव मुद्रितम् । इतः परं पञ्चसप्ततिः गद्यपद्यभागाः अवशिष्टास्सन्तीति प्रेक्षावन्तः विजानन्तु । अपि च, तत्र तत्र बहुषु स्थलेषु ग्रन्थः त्रुटितः; बहवश्च असमीचीनाः पाठाः संयोजिताः । ग्रन्थान्ते च "एतत्पुस्तकं ग्वालियर् राजधानीतः श्रीमन्महामहोपाध्यायेति राजसन्मानधारिभिः गोपालाचार्यैः प्रेषितम् । तेषामाज्ञया तन्निर्दिष्टस्थलेपि एतत्पुस्तकान्तरप्राप्तौ यत्ने वैफल्यमाफलितम्, अतस्तथैव मुद्रणमिति ज्ञेयम् । एतदपूर्णं कतिचित्कथावशेषादिति भाति" इति दृश्यते । अनयोरुभयोरपि संस्करणयोः संप्रति दुर्लभत्वात्, रसिकानां प्रमोदाय एतस्य प्रबन्धस्य पुनर्मुद्रणमावश्यकमिति मत्वा पूर्वव्याख्यायाः अतीव संक्षिप्तत्वात् श्रीभूतपुरीसंस्कृतकलाशालाभूतपूर्वन्यायवेदान्ताध्यापकैः न्यायवेदान्तशिरोमणिभिः 'वेदान्तप्रदीपा'दि बिरुदालंकृतैः श्रीकृष्णताताचार्यैः विलिखितया विशदतरव्याख्यया सह प्रकाश्यते । सर्वोत्तरस्य चास्य उत्तरचम्पूकाव्यस्य प्रकाशनेन संस्कृतप्रेमिसमाजस्य महान्तमुपकारं कृतवतः सुहृन्मणीन् श्रीमदनन्ताचार्यान् सहर्षमभिनन्दामि ।

वी० कृष्णस्वामी अय्यङ्गार्

---

* अस्मन्मुद्रितग्रन्थे, 'जनकदुहितृजाने जीवनं त्वां विजाने' (476) इति पाठस्समादृतः ।

एतद्भूमिकायां —(a) तृतीयपृष्ठे द्वाविंशपङ्क्तौ 'निरवद्याः' इत्यस्मादनन्तरं "शब्दाः श्लेषमर्यादया सम्यगुल्लिखिताः । एष कविः" इति पठनीयम् ॥
(b) पञ्चमपृष्ठे षष्ठपङ्क्तौ 'समाप्तौ' इत्यस्य स्थाने, 'प्रारम्भे' इति पठनीयम् ॥
(c) अष्टमपृष्ठे ऊनत्रिंशपङ्क्तौ 'यादवराघवीय' मित्यस्य स्थाने 'श्रीराघवयादवीयम्' इति पठनीयम् ॥
(d) अष्टादशपृष्ठे स्थितस्य 'पायान्मा' मित्यादेः पद्यस्य पाठान्तरं [खरनामसंवत्सरे (1891 AD) ग्रन्थलिप्यां मुद्रिते लक्ष्मीसहस्रस्य संस्करणे] एवमुपलभ्यते —

"पायान्मामुरसावितश्रियमुमाराध्यां प्रपद्येतमां
को वा न स्थिरमश्नुते शमधनोप्यालोकितो जातुचित् ।
वेदान्तैर्विनुताङ्घ्रये न किमुतश्श्रेयो नतिं तन्वतां
सेवामो रचयामि मानस सदा भक्त्यावहावादरम् ॥" इति ।

अत्र "असौ उः मां पायात्, आराध्यां उं प्रपद्येतमाम्, वा आलोकितः, दान्तैर्विनुताङ्घ्रये वे, उतः श्रेयः, ओः सेवां रचयामि, औ आदरं वह" इति लक्ष्मीवाचकस्य 'उ' शब्दस्य सप्तापि विभक्तयः गूढाः । एवं कश्चित् सप्तविभक्तिवञ्चनाख्यः चमत्कारः प्रस्तूयते । 'उरसा, उमाराध्यां को वा, वेदान्तैः किमुत श्रेयः, सेवामः, वहावादरम्' इति सर्वत्र अविवक्षितशब्दान्तरभ्रमः जायते । 'वे' इत्यत्र चतुर्थ्येकवचने 'घेर्ङिति' इति प्राप्तो गुणः, संज्ञापूर्वकोविधिरनित्यः इति परिभाषया अनित्यत्वात् न प्रवर्तते । तथा च यणि कृते, 'वे' इति रूपं निष्पन्नमिति तत्र व्याख्याने स्पष्टम् ।

व्याख्यानकर्तुः विज्ञप्तिः

लोके तावद् विविधाः प्रबन्धाः प्रथन्त एव; तेषु कान्तासंमिततया अतिगहनानप्यर्थान् सरसीकृत्य अक्लेशेन प्रतिपादयतां काव्यप्रबन्धानां परमुत्कर्षः सर्वविदितो जागर्ति । तान्यपि काव्यानि दृश्यश्रव्यभेदेन गद्यपद्यभेदेन च बहुधा भिन्नानि विलसन्ति । गद्यपद्योभयात्मकाः चम्पूप्रबन्धाः संस्कृतभाषायामनेके उपलभ्यन्ते । तेषु चम्पूरामायणं चम्पूभारतं नलचम्पूरित्यादयः केचिदेव प्रबन्धाः रसभावादिसर्वाङ्गपरिपुष्टत्वात् सहृदयानां हृदयङ्गमा इति प्रसिद्धाः । श्रीवेङ्कटाध्वरिकविप्रणीतः उत्तरचम्पूरिति ख्यातोऽयं ग्रन्थोऽपि तेषां प्रकृष्टग्रन्थरत्नानां कोटिमाटीकते ।

वेङ्कटाध्वरी चायं महाकविः, विश्वगुणादर्शलक्ष्मीसहस्रादिकाव्यग्रन्थानां विधित्रयपरित्राणादिशास्त्रग्रन्थानां च प्रणेता पण्डितानाममन्दमानन्दं विदधानया सरससरण्या विषयान् प्रतिपादयतीत्यत्र अयमेव ग्रन्थः पर्याप्तः साक्षी । अस्मिन् हि ग्रन्थे अन्यैरपरिशीलिता उत्प्रेक्षाद्यलंकारविशेषाः विद्वज्जनरञ्जनाः सन्ति । अयं चापरो विशेषः, यदसौ महाकविः श्रीमन्निगमान्तमहादेशिकादिभिर्महद्भिः क्षुण्णं मार्गमनुसरन् वेदान्तशास्त्रार्थानपि काव्यमध्ये सरलतया निवेशयतीति । 'शक्तिर्निपुणतालोकशास्त्रकाव्याद्यवेक्षणात्' इति वदन् मम्मटः तत्र तत्र काव्येषु शास्त्रार्थानां प्रकाशनमनुमन्यत इति प्रतिभाति । श्लेषयमकानुप्रासादीनां निबन्धे विलक्षणमस्य कवेर्नैपुण्यं रसिकाः स्वयमनुभवेन जानीयुः ।

अस्य अतिप्रौढग्रन्थस्य व्याख्याने सुहृत्तमैः साहित्यसारज्ञैः श्रीमदनन्ताचार्यैः प्रेरितः मन्दमतिरपि अहं एतं भगवन्नियोगं मत्वा अत्र साहसे प्रावर्तिषि । अस्य च आन्ध्रलिप्यात्मकः प्राचीनव्याख्यानकोशः कश्चित् संग्रहेण वर्तते । सोऽपि दासस्योपकारकः आसीत् । सामान्यतः मूलार्थज्ञानोपयोगितयैवेदं व्याख्यानं कृतम् । अत एवेतरव्याख्यानवदन्ये विशेषा न लिखिताः । प्रमादमतिमान्द्यादिभिरत्र बहवो दोषास्संभावितास्स्युः । तानविगणय्य गुणपक्षपातिनस्साधवः गुणलेशसन्तुष्टास्सन्तः दासमनुगृह्णन्तिवति सप्रश्रयं प्रार्थये ।

भगवान् श्रीरामचन्द्रः प्रीयताम् ।

इत्थं विद्वज्जनविधेयः न्यायवेदान्तशिरोमणिः

श्री० कृष्णताताचार्यः

विषयानुक्रमणिका

		पृष्ठम्
१.	मङ्गलाचरणम्	१
२.	रामचन्द्रस्याभिनन्दनाय अगस्त्यादीनां महर्षीणामागमनम्	६
३.	रावणादीनां जन्मपराक्रमादिवृत्तान्तं जिज्ञासो रामस्य प्रश्नः, अगस्त्येन कथाप्रारम्भः च	९
४.	कुबेरस्य उत्पत्तिः, तस्य लोकपालपदप्राप्तिश्च ...	१०
५.	माल्यवदादीनामुत्पत्तिः ...	१२
६.	लङ्कानिर्माणं तद्वर्णनं च	१२-१३
७.	राक्षसवधाकाङ्क्षिणां देवानां सपिनाकिनां नारायणोपगमनम्	१६
८.	भगवतो वासुदेवस्य वर्णनम् (गद्यम्) ...	१६-२४
९.	देवराक्षसयुद्धारम्भः ...	२६
१०.	राक्षसानां पराजयः पलायनं च ...	२८
११.	रावणस्य तदनुजानां च जन्म ...	३०
१२.	रावणाय तपःसंतोषितेन प्रजापतिना वरदानम् ...	३२
१३.	विभीषणकृता धार्मिकत्ववरप्रार्थना ...	३३
१४.	कुम्भकर्णाय वरप्रदानम्	३४
१५.	रावणस्य लङ्काराज्ये अभिषेकः	३५
१६.	रावणमन्दोदरीविवाहः	३६
१७.	रावणस्य देवजयार्थं प्रस्थानम्	३९
१८.	नन्दिशापः	४१
१९.	रावणाय शिवकृतं वरप्रदानम्	४३
२०.	वेदवतीवृत्तान्तः	४४
२१.	मरुत्तयज्ञे रावणस्योपद्रवः	४८
२२.	अनरण्यशापः	५१
२३.	यमनगरीवर्णनम्	५३
२४.	यमस्यान्तर्धानं रावणस्य जयघोषश्च ...	५६
२५.	वरुणस्य पराभवः	५७
२६.	पतिव्रतानां विलापप्रकाराः	५८
२७.	चन्द्रोदये रावणस्य कामपीडा	६१

पृष्ठम्

२८. रावणकृतो रम्भापरिभवः ६३
२९. नलकूबरशापः ६७
३०. सूर्योदयवर्णनम् ६८
३१. देवकृता श्रीमन्नारायणस्तुतिः ७२
३२. देवासुरसंग्रामवर्णनम् ७४
३३. मेघनादेन इन्द्रस्य बन्धनं, पितामहप्रार्थनया रावणेन तस्य मोचनं च ८७
३४. पितामहकृतं इन्द्रस्योद्बोधनम् ८८
३५. रामेण 'किं रावणस्यापि केचित् जेतारो बभूवु'रिति प्रश्नः ८९
३६. विन्ध्यगिरिवर्णनम् ९०
३७. नर्मदानदीवर्णनम् ९९
३८. कार्तवीर्येण रावणस्य पराभवः १००
३९. वालिवृत्तान्तप्रस्तावः १०२
४०. वालिपराजितेन रावणेन सविनयं तत्सख्यप्रार्थनम् ... १०६
४१. हनूमद्विषये रामस्य प्रश्नः १०८
४२. हनूमत उत्पत्तिः १०९
४३. सूर्यग्रहणकामस्य हनूमतो बाल्यचेष्टावर्णनम्
देवताभ्यः वरप्राप्तिश्च १११
४४. हनूमतावाप्तो महर्षिशापः ११४
४५. हनूमतः सूर्याद्विद्याभ्यासः ११५
४६. श्रीरामस्य प्रतापकीर्त्यौदार्यादिप्रशंसा ... ११६
४७. महर्षिकृतं आशीर्वचनम् १२९
४८. महर्षिभिर्निजाश्रमपदं प्रतिगन्तुमिच्छद्भिः अनुज्ञाभ्यर्थना १३०
४९. सूर्यास्तमयवर्णनम् १३२
५०. अन्धकारवर्णनम् १३४
५१. चन्द्रोदयः १३७
५२. रामकृतं चन्द्रवर्णनम् १३८
५३. सीतारामशृङ्गारकेलिवर्णनम् १४६
५४. वैतालिककृतं प्राभातिकप्रबोधनम् ... १४७
५५. रामकृतनित्यकर्मानुष्ठानवर्णनम् १५०
५६. श्रीरामेण अयोध्याराज्यस्य चिरं परिपालनम् ... १५१

॥ श्रियै नमः ॥

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत-
श्रीरघुनन्दनपरब्रह्मणे नमः

श्रीमदात्रेयवेङ्कटाध्वरिकविविरचितः

उत्तरचम्पूप्रबन्धः

श्रीमद्धाम समामनन्ति कमलं तद्बान्धवं वा ययो-
रक्षीन्दीवररूपमाहुरथवा तद्बन्धुरूपं बुधाः ।
सावर्ण्यं तटितां वपुश्शुभतरं धत्तेऽथवा तद्वतां
भूयास्तां भुजगेन्द्रशैलवसती तौ दम्पती सम्पदे ॥ १ ॥

उत्तरचम्पूव्याख्या

श्रीशैलशिखरशेखरमाश्रितसर्वार्थदं दयासिन्धुम् ।
वन्दे रमासमेतं बृन्दारकमुनिबृन्दसेवितं देवम् ॥

१. अथ तत्रभवान् आत्रेयवंशजलधिकौस्तुभः श्लेषयमकचक्रवर्ती चतुस्तन्त्रनिष्णातः वेङ्कटाध्वरिनामा कविः उत्तरचम्पूनामकं ग्रन्थं चिकीर्षुः तस्य निर्विघ्नपरिसमाप्तये शिष्टाचारप्राप्तमिष्टदेवतानमस्काररूपमङ्गलमादौ निबध्नाति—श्रीमदित्यादिना । ययोः दम्पत्योः श्रीश्रीनिवासयोः श्रीमत् कान्तिमत् सम्पद्युक्तं वा कमलं पद्मं यद्वा तद्बान्धवं कमलबन्धुं सूर्यं धाम स्थानं समामनन्ति बुधाः । अत्र यथासम्भवमुभयोरन्वयः । उत्तरत्राप्येवम् । ययोः अक्षि नेत्रम् इन्दीवररूपम् अथवा तद्बन्धुरूपम् तद्बन्धुश्चन्द्रः तद्रूपमाहुः । ययोः शुभतरं मङ्गलतरं वपुः शरीरम् तटितां विद्युताम् अथवा तद्वताम् तटिद्युक्तानां मेघानाम् सावर्ण्यम् समानरुचिं धत्ते बिभर्ति । लक्ष्म्या विद्युद्वर्णत्वात् भगवतश्च नीलमेघश्यामलत्वात् । भुजगेन्द्रशैलः शेषाचलः तत्र वसन्तौ तौ प्रसिद्धौ दम्पती श्रीश्रीनिवासौ सम्पदे श्रेयसे लोकानामिति शेषः । भूयास्तामित्यन्वयः ।

वैदेहीरघुनाथयोः परिणये कल्याणवेदीमणि-
स्तम्भालम्बमिहानुबिम्बयुगलं बोभोतु नः सम्पदे ।
व्रीळाविघ्नितदर्शनावपि चिरं यत्रैव दत्तेक्षणा-
वेतावालिखिताविवान्वभवतामन्योन्यवीक्षासुखम् ॥ २ ॥

अपि च —

श्रीमान् पुष्यतु जानकीप्रियतमः श्रेयांसि भूयांसि नः
पादाम्भोजरजःकणैरपि शिलां प्रागारचय्याऽबलाम् ।

अत्र कविः अभीप्सितसिद्धिसूचकेन श्रीश्रीशयोः ययोरित्येकशेषेण ऐकमत्यप्रकटनेन कमलतद्बान्धवादिशब्दैः नलिनसूर्ययोः कुवलयचन्द्रमसोः विद्युन्मेघयोः विकल्पार्थक-'वाऽथवा'शब्दाभ्यां पर्यायत्वाभिधानद्वारा अभेदाध्यवसायेन वासस्थाननयनदिव्यमङ्गलविग्रहादिष्वानुरूप्यं कमलतद्बन्ध्वादिवदानुकूल्यं चाभिव्यनक्ति। दम्पत्योरन्योन्यमानुकूल्ये खलु प्रार्थितार्थसिद्धिरिति भावः । अत्र आदौ श्रीशब्दस्य मगणस्य प्रयोगात् प्रबन्धस्य सर्वोत्तमत्वमिति भावः ॥

२. श्रीश्रीनिवासविषयाशीरूपमङ्गलं कृत्वा प्रकृतप्रबन्धप्रतिपाद्ययोः श्रीसीतारघुनन्दनयोर्निर्देशरूपं च मङ्गलमाबध्नाति— **वैदेहीति** । वैदेहीरघुनाथयोः सीतारामयोः परिणये विवाहे कल्याणवेदी विवाहार्थवेदी । तस्यां ये मणिस्तंभाः रत्नमयस्तम्भाः तदालम्बम् तत्र स्थितम् अनुबिम्बयुगलं तयोः प्रतिबिम्बद्वयं नः अस्माकं सम्पदे बोभोतु अतिशयेन भवतु । यत्रैव उक्तप्रतिबिम्ब एव व्रीळया ह्रिया विघ्नितदर्शनौ निरुद्धप्रेक्षणावपि चिरं चिराय दत्तेक्षणौ न्यस्तदृष्टी सन्तौ आलिखिताविव चित्रार्पिताविव अन्योन्यवीक्षासुखम् परस्परप्रेक्षणानन्दम् अन्वभवताम् अनुभूतवन्तावित्यर्थः । अत्र वैवाहिकसमये वधूवरयोरनयोर्महानन्ददशानुसन्धानेन स्वाभीष्टसिद्धिर्निराबाधेति सूच्यते । आलिखितावित्यनेन परस्परानुरागजनितः स्तम्भात्मकस्सात्त्विकभावः सूच्यते ॥

३. **श्रीमान्** सम्पन्नः जानकीप्रियतमः सीताकान्तः भूयांसि बहूनि श्रेयांसि नः अस्माकं पुष्यतु वर्धयतु । येन श्रीरामचन्द्रेण पादाम्भोजरजःकणैः स्वपादसंबद्धरजःस्पर्शादित्यर्थः । अत्र अपिशब्दात् रजःकणानामपकर्षं सूचयन् सामग्रीवैकल्येऽपि कार्यसिद्धिकथनात् प्रबन्धप्रतिपाद्यस्य महिमानं प्रकटयति ।

एनां प्लावयतैव येन जलधावश्मप्लवोल्लापिनो
वेदस्यापि यदर्थवाद इति तन्निर्वापितं दुर्यशः ॥ ३ ॥
नन्दद्बृन्दारकाणि क्षपितकुपितहृत्ताटकानाटकानि
क्रन्दत्सुन्दात्मजानि क्षणकृतबलवद्बालिकेलिक्षयाणि ।
क्षुब्धस्तब्धाब्धिकानि क्षतनिशिचरराट्कण्ठकाण्डच्छटानि
प्रत्यूहव्यूहभङ्गं दधतु रघुपतेः पत्रिणां नर्तनानि ॥ ४ ॥

तथा चोक्तम्, "क्रियासिद्धिस्सत्त्वे भवति महतां नोपकरण" इति । शिलाम् गौतमशापात् शिलारूपापन्नाम् अबलां प्राग्वत् शापात्पूर्वमिव स्त्रियमहल्यां कृत्वा । तथा एनां शिलाम् जलधौ समुद्रे प्लावयता नलहस्तेन सेतुबन्धनावसरे अनिमग्नां कारयित्रा अश्मप्लवोल्लापिनः वेदस्य "ग्रावाणः प्लवन्ते" इति श्रुतेरपि । अपिरत्र अप्राधान्यगन्धानर्हतां सूचयति । अर्थवाद इति विध्युक्तार्थप्रशंसामात्रपरः न तु मुख्यार्थ इति । यद्दुर्यशः वेदोपसर्जनत्वेन अप्राधान्यजन्या या अपप्रथा तत् तादृशायशः निर्वापितम् प्रमृष्टम् । अत्र मीमांसकाः—विध्यर्थवादादिरूपेषु वेदेषु विधिवाक्यस्य परं यथाश्रुतार्थत्वम् । अर्थवादवाक्यानां तु श्रूयमाणार्थपरित्यागेन विधेयप्राशस्त्यपरत्वमेव । अन्यथा, 'अप्सु ग्रावाणः प्लवन्त' इत्याद्यर्थवादवाक्येषु मुख्यार्थस्य बाधितत्वेन विवक्षाऽसम्भवात् । विधेयप्राशस्त्यपरत्वं तु सर्वत्र सम्भवतीति अर्थवादवाक्यानां विधिशेषत्वेनाप्राधान्यं वदन्ति । श्रीरामचन्द्रेण सेतुबन्धनसमये ग्राव्णामपि जलोपरिस्थापनेन पूर्वोक्तार्थवादवाक्यस्य मुख्यार्थस्य सम्भवप्रदर्शनेन मीमांसकोक्ताऽप्राधान्ययुक्त्यसम्भवेन विधिवत् मुख्यार्थत्वसंभवेन तैरापादितमयशः दूरोत्सारितमिति भावः ॥

४. **नन्ददिति** । नन्दन्तः सन्तुष्यन्तः बृन्दारका देवा यैस्तानि देवानां सन्तोषजनकानीत्यर्थः । तथा क्षपितानि नाशितानि कुपितहृदयायास्ताटकायाश्चेष्टितानि यैस्तानि क्रन्दन्तौ बाणहत्या क्रोशन्तौ सुन्दात्मजौ सुबाहुमारीचौ यैस्तानि । तथा क्षणेन कृतः बलवतो वालेः केलिक्षयः युद्धकेळिहानिः यैस्तानि । क्षुब्धः पूर्वं भयाच्चलितः पश्चात् क्षामणेन स्तब्धः निश्चलः अब्धिः समुद्रः यैस्तैर्नर्तनैरित्यन्वयः । समुद्रशरणागतिसमये समुद्रराजानागमनेन कुपितेन रामेण

नत्वा पितुः पदयुगं रघुनाथसूरे-
भक्त्या प्रपद्य च पितामहमप्पयार्यम् ।
आत्रेयवेङ्कटकविर्नवगद्यपद्यै-
रुज्जृम्भते फणितुमुत्तररामवृत्तम् ॥ ५ ॥

श्रुतिचक्षुर्योगिजनश्चक्षुश्श्रुतिरपि न पण्डितो यत्र ।
तत्र हि रामचरित्रे कविर्भविष्यन् कथं न लज्जेऽहम् ॥ ६ ॥

चित्तं रिक्तगुणापि तत्रभवतां वाणी ममाणीयसी
श्रीमद्रामकथासुधारसपरिष्वङ्गादियं गाहते ।

समुद्रशोषणाय बाणप्रयोगकाले समुद्रस्तथाभूत इत्यर्थः । क्षताः छिन्नाः निशिचरराजः रावणस्य कण्ठा एव काण्डास्तेषां छटा यैस्तानि । रघुपतेः श्रीराघवस्य पत्रिणां बाणानां नर्तनानि नृत्यानि प्रत्यूहानां विघ्नानां व्यूहभङ्गं समूहनाशं दधतु जनयन्त्वित्यर्थः । विरोधिनिरसनाय तादृशदशायां तत्प्रार्थनं क्रियते ॥

५. **नत्वेति** । रघुनाथसूरिनामकस्य पितुः पदयुगं चरणद्वन्द्वं भक्त्या नत्वा अप्पयसूरिनामकं पितामहं च प्रपद्य शरणं गत्वा आत्रेयवंश्यवेङ्कटयज्वनामा कविः नवैः अपूर्वैः गद्यपद्यैः उत्तररामचरित्रं फणितुं वर्णयितुं उज्जृम्भते उत्सहत इत्यर्थः । पितृपितामहप्रणामबलेन अभिवृद्धोत्साहशक्तिः प्रबन्धं करोमीति स्वनैच्यानुसन्धानम् । 'गद्यपद्यैश्चरित्रमि'त्युक्त्या "गद्यपद्यात्मकं काव्यं चम्पूरित्यभिधीयते' इति लक्षणसूचनेन उत्तरचम्पूरिति ग्रन्थनाम च भङ्ग्या सूच्यते ॥

६. **श्रुतिचक्षुरिति** । श्रुतिचक्षुः वेदचक्षुः सूक्ष्मविप्रकृष्टदर्शनकुशल इत्यर्थः । योगिजनः मुनिजनः चक्षुश्श्रुतिः चक्षुःश्रवाः सहस्रवदनः शेषश्च । यत्र रामचरित्रे न पण्डितः "ऊहापोहक्षमा बुद्धिः पण्डेति परिकीर्त्यते" इत्युक्तज्ञानविशेषवान् न भवति । तादृश रामचरित्रविषयकाव्यप्रवृत्तः कथं न लज्जास्पदोऽहम् । अतीन्द्रियार्थद्रष्टॄणां योगिनां विदितविषयविवरणविचक्षणस्य शेषस्याप्यसामर्थ्यप्रदर्शनात् अवाङ्मनसगोचरं रामचरितमिति भावः ॥

७. **चित्तमिति** । मम अणीयसी अत्यल्पा रिक्ताः गुणाः माधुर्यगाम्भीर्यादयः काव्यगुणाः यस्याः तादृश्यपि वाणी वाक् । रामकथैव सुधा पीयूषम्

सम्पर्कं नवशर्कराभिरुदकं कूपोद्धृतं याति चे-
दस्वादिष्ठमपि स्वतो रसविदामास्वादनीयं न किम्? ॥ ७ ॥
यः काण्डानि बबन्ध चम्पुविधया पञ्चापि भोजः कवि-
र्यो वा षष्ठमचष्ट लक्ष्मणकविस्ताभ्यामुभाभ्यामपि ।
कारुण्यादवशेषितं किल मम क्षेमाय रामायणे
काण्डं सप्तममुद्गृणातु रसना चम्पूप्रबन्धात्मना ॥ ८ ॥
आनन्दतुन्दिलमना दमनादरीणां
सामन्तमौलिमणिशोणपदारविन्दः ।
नाके महेन्द्र इव भूसुतयैव साकं
साकेतपुण्यनगरे विजहार रामः ॥ ९ ॥

तस्या यो रसः तत्सम्बन्धात् तत्प्रतिपादनादित्यर्थः । तत्रभवतां काव्यरसज्ञानां महतां साधूनां चित्तं गाहते रञ्जयति । स्वतः अस्वादिष्ठममधुरमपि कूपोद्धृत-मुदकं नवशर्कराभिस्संबन्धं प्राप्नोति चेत् रसज्ञानां किं नास्वादनीयम्? अपि तु आस्वादनीयमेव यथा तद्वन्मदीया वाण्यपि बुधास्वाद्यैव भवेदिति भावः ॥

८. **य इति** । यः भोजकविः रामायणे आदितः पञ्च काण्डानि चम्पूप्रबन्धे न्यबध्नात् । यश्च लक्ष्मणकविः तत्रैव प्रबन्धे अवशिष्टं षष्ठं काण्डं योजितवान् । ताभ्यामुभाभ्यामपि मम क्षेमाय मयि कारुण्यादेव रामायणे अवशे-षितम् अनुक्तम् सप्तमं उत्तरकाण्डम् मम रसना चम्पूप्रबन्धरूपेण वदतु । अत्र भोजलक्ष्मणाभ्यां सप्तमकाण्डावशेषस्य स्वकारुण्यमूलकत्वासम्बन्धेऽपि तत्सम्बन्धोक्त्या अतिशयोक्तिभेदोऽलंकारः । एवमुत्प्रेक्षापि । अत्र चमत्कार-विशेषस्सहृदयहृदयामोदकारी कवेरुक्तिविशेषेण परिस्फुरति ॥

९. **आनन्देति** । अरीणां शत्रूणां रावणादीनाम् दमनात् संहारात् आनन्दपरिपुष्टमनाः सामन्तानाम् रिपूणां मौळिमणयः शिरःस्थरत्नानि तैः शोणं रक्तं पदारविन्दं यस्य सः राम इत्यन्वयः । नाके स्वर्गलोके महेन्द्र इव भूसुतया सीतयैव साकम् साकेतपुण्यनगरे अयोध्यापुरे विजहार विहारं चकार । भूसुतयैवेत्येवकारेण एकपत्नीव्रतमाविष्कृतम् । अत्रानुप्रासविशेषश्शब्दालंकारः हृद्यः । अस्य कवेस्सर्वत्रायं विशेषः अन्यादृशः अतिरसावहश्च ॥

तदानीं पुनः — उदारविक्रमन्यक्कृतशक्रादिक्रतुभुक्चक्राणां, व्याघ्राणामिव निर्घृणानां नक्राणामिव महाजलौघसंसर्गिणां केसरिणामिव दिग्दन्तिनिर्दलनविलासशीलानां, व्याळानामिव समुन्मिषद्विषदन्तानां, दुर्दिनानामिव बहुकन्धरानुबन्धसन्धुक्षितान्धतमसानां मेघनाथविजृम्भणहिंसितराजहंसजातानां च, चण्डवातानामिव रजोव्रजधूसराणां, कासराणामिव गन्धर्वविरोधिनां, कासाराणामिव सत्तरवारिजातपरिपालितमधुपराजीनां, राजयक्ष्मणामिव समुत्थापितमहागदानां, त्रिभुवनभीषणवेषविशेषाणां दोषाचराणां निश्शेषनिर्मूलनश्रवणपरिशोषितविषादसागराः सादरमगस्त्यवसिष्ठप्रमुखाः काष्ठासु चतसृषु विश्रुता अपि बहुश्रुतास्तपोधनाः रिपुजनप्रशमनस्वस्थकाकुत्स्थप्रतिनन्दनास्थया तदीयमास्थानमुपस्थातुमनसो निजाश्रमेभ्यो निश्चक्रमुः ॥ १० ॥

---

१०. **तदानीं पुनरिति** । तदानीं तस्मिन् समये उदारैः गम्भीरैः विक्रमैः पराक्रमैः तिरस्कृतेन्द्रादिदेवसमूहानाम् । व्याघ्राणामिव निर्घृणानाम् । घृणा दया जुगुप्सा च । तद्रहितानामित्यर्थः । सर्वेषां षष्ठ्यन्तानां उत्तरत्र दोषाचराणामित्यत्रान्वयः । महाजलौघसंसर्गिणामिति । जलेत्यत्र लडयोरभेदः । तथा च नक्राः जलसमूहवासिनः । राक्षसास्तु जडसमूहसंसर्गवन्त इत्यर्थः । दिग्दन्तिनः तत्तद्दिक्षु वर्तमाना गजाः दिग्गजाश्चेत्यर्थः । व्यालाः सर्पाः समुन्मिषद्विषदन्तेत्यत्र अनचि चेति दकारद्वित्वाश्रयणेन सर्पपक्षे विषयुक्तदन्ता इति राक्षसपक्षे द्विषदां शत्रूणामन्तकारिण इत्यर्थद्वयलाभः । दुर्दिनानि मेघच्छन्नदिनानि, बहुकन्धराः बहुमेघाः । अन्यत्र दशग्रीवः । अन्धतमसं तिमिरं अज्ञानं चेत्यर्थः । मेघनादः इन्द्रजित् मेघध्वनिश्च । राजहंसाः हंसश्रेष्ठाः राजश्रेष्ठाश्च । रजः धूलिः रजोगुणश्च । कासराः महिषाः । गन्धर्वाः अश्वाः देवयोनयश्च । कासाराः सरांसि तरवारिः खड्गः जातं समूहः तेन रक्षिताः मधुपाः मद्यपाः तेषां राजिः कासारपक्षे वारिजातं पङ्कजं तेन रक्षिता भ्रमरराजिरित्यर्थः । महागदाः महारोगाः गदाख्या आयुधविशेषाश्च । दोषाचराणां नवतंचराणाम् । स्वयं शोषितसागरत्वात् अगस्त्यस्य शोषितविषादसागरेषु प्रामुख्यमिति भावः ।

पद्माकरमिव हंसाः, पयसां निधिमिव सरित्प्रवाहाः, प्रपोद्देशमिव तृषिताः, सनीतिकमिव सम्पदः, सविवेकमिव सद्गुणाः, गुरुकुलक्लिष्टमिव वेदाः, गुप्तमन्त्रमिव कार्यसिद्धयः, महावीरमिव जयश्रियः, मकरन्दमिव मिलिन्दाः, दानशीलमिव कीर्तयः, दमवन्तमिव धर्माः निखिल-भुवनपालनकलानिस्तन्द्रं रामचन्द्रं महर्षयः सहर्षमभिजग्मुः ॥ ११ ॥

स्तनभरानतया सहसीतया कनकपीठमनर्घमधिष्ठितम् ।
रघुपतिं कृतकृत्यमवेक्ष्य तैरतितरां समहर्षि महर्षिभिः ॥ १२ ॥

ततः —

उत्थाय भद्रासनतस्सपर्यां कृत्वा स पर्यायसुरद्रुरेषः ।
ननाम तान् सम्यगनामयोक्तैरानन्दयामास च रामचन्द्रः॥१३॥

प्रत्यूचुश्चैनं ब्रह्मर्षयः, "जय वत्स काकुत्स्थ!" ॥ १४ ॥

विश्रुताः प्रसिद्धाः श्रुतरहिताश्च । तथापि बहुश्रुताः बहुशास्त्रज्ञाः इति विरोधः, विश्रुताः प्रसिद्धा इति तत्परिहारः । तपोधनाः महर्षयः । शत्रुजनसंहारेण स्वस्थस्य रामचन्द्रस्य नमस्कारे आशया उपस्थातुं प्रवेष्टुं मनः येषां ते तथाभूता-स्सन्तः । शेषं सुगमम् ॥

११. **पद्माकरमिवेति** । हंसाः पद्मास्पदं सर इव, समुद्रमिव नदीप्रवाहः, तृष्णातुराः पानीयशालामिव, सम्पदः नीतिसम्पन्नमिव, विवेक-शालिनमिव समीचीनगुणाः, आचार्यकुलक्लेशभाजमिव वेदाः । अप्रकाशितः मन्त्रः आलोचनं चेत्यर्थः, उद्दिष्टकार्यसिद्धय इत्यर्थः । मिलिन्दाः भ्रमराः । दमवन्तं दान्तम्, उपात्तेषु बहूपमानेषु विद्यमाना गुणाः सर्वे एकत्र रामे स्थिता इति सूचनाय बहूपादानम् ॥

१२. **स्तनभरेति** । समहर्षीति भावे । हृष्टा बभूवुरित्यर्थः ॥

१३. **उत्थायेति** । सपर्यां पूजां, पर्यायसुरद्रुः कल्पवृक्षसदृशः अनामयोक्तैः कुशलप्रश्नैः । आनन्दयामास सन्तुष्टान् चकारेत्यर्थः ॥

स्वस्त्यस्तु स्वत एव सर्वविदुषे तापिञ्छमञ्जुत्विषे
सर्वब्राह्मणवर्गदुर्गतिमुषे साम्राज्यमासेदुषे ।
रक्षश्शोणितपानपीनधनुषे रक्षैकदीक्षाजुषे
हर्षोन्नीतजटायुषे मुनिजनैराशास्यदीर्घायुषे ॥ १५ ॥

त्वया खलु दयापरवशतया गुरुतरदुरितभरितमदमलिनविदयहृदय-निशिचरनिचयकुचरितचकितविशकलितसकलजगदभयवितरणकृते कृतावतारेण निशामुखवदस्तमितखरतेजस्कं, निपुणकविप्रबन्धमिव निराकृतदूषणं, निदाघकालिकसर इव शोषितकबन्धं, निर्मलमुनिमण्डलमिव निगृहीताक्षं, निकेतनाभ्यन्तरमिव शान्तप्रकम्पनं, प्रोषितभवनमिव भग्नकुम्भं, शारददिवसमिव समाप्तमेघनादं, अध्वरदीक्षितमिव अतिकाय-शोषणधन्यं, औषधसेविनः शरीरवदपेतमहोदरातङ्कं, नखायुधनरवमिव निर्भिन्नसद्वारणकुम्भकर्णं, निर्वाणदीपभाजनमिव निर्दग्धदशमुखं लङ्का-राज्यमकारि ॥ १६ ॥

---

१५. **स्वस्त्यस्त्विति** । तापिञ्छमञ्जुत्विषे तमालकान्तरुचये दुर्गतिः दुरवस्था तद्वारिणे इत्यर्थः । हर्षेण स्वविषये प्राणत्यागजन्येन महानन्देन उन्नीतः "गच्छ लोकाननुत्तमान्" इत्यूर्ध्वलोकं प्रापितः । आशास्यमानदीर्घायुषे ।

१६. **त्वयेति** । निशामुखे सायंसन्ध्यायामिव अस्तमितः अस्तं प्राप्तः । खरतेजाः सूर्यः । लङ्काराज्यपक्षे खरस्य राक्षसस्य तेजः इत्यर्थः । दूषणं दोषः अन्यत्र दूषणनामकराक्षसः । शोषितानि कबन्धानि उदकानि, अन्यत्र शोषितः कबन्धासुर इत्यर्थः । अक्षानि इन्द्रियाणि अक्षकुमारश्च । प्रकम्पनं भयम् प्रकम्पनाख्यराक्षसश्च । प्रोषिताः देशान्तरं गताः तेषां गृहं भग्नाः छिन्नाः घटाः अन्यत्र भग्नः नाशितः कुम्भाख्यराक्षसश्च । समाप्तः सम्यक् प्राप्तः मेघनादः मेघ-घोषः । अन्यत्र समाप्तः अवसानं प्राप्तः इन्द्रजित् । अतीव कायस्य शोषणेन अन्यत्र अतिकायाख्यराक्षसविनाशेन । महोदरः तदाख्यः उदररोगः, महोदरनामा राक्षसश्च । सद्वारणाः श्रेष्ठगजाः तेषां कुम्भस्थलम् कर्णाश्च । अन्यत्र सतां साधूनां वारणपरिपन्थी कुम्भकर्णः । निर्दग्धा दशा वर्तिः यस्मिन् तादृशं मुखं

गत्वा हन्त वनं सह क्षितिजया भित्त्वा खरादीन् बलान्
कृत्वा सेतुमथाम्बुधौ दशमुखं हत्वा समं बान्धवैः ।
अध्यासीनमुपेत्य पार्थिवकुलाराध्यामयोध्यां पुनः
वीक्ष्य त्वां किल नानटीति चटुलं विस्मेरमस्मन्मनः ॥१७॥

इति मुनिजनफणितीराकर्ण्य भूकन्यया साकं कन्दलितकुतूहले मनुकुलेश्वरे, "येषां वधमनुचिन्त्य भवन्तो विस्मयन्ते तेषाममीषां रावणप्रभृतीनां दोषाचराणां कुतो जन्म? किमुपज्ञा देवतावज्ञा? किमुपक्रमश्च पराक्रमस्तादृशः?" इत्यनुयुञ्जाने समस्तलोकवृत्तविदगस्त्यः पौलस्त्यप्रभृतेः नक्तञ्चरवर्गस्योत्पत्तिवरप्राप्तिविक्रमादीननुक्रमेण कथयितुमुपचक्रमे ॥ १८ ॥

अस्तीह विस्तीर्णयशा दिशासु काकुत्स्थवंशेन्द्रपुलस्त्ययोगी ।
मोहादिदोषान्मुहुरेधमाने योऽयं तपोऽग्नौ युगपज्जुहाव ॥१९॥

तं कदाचिदरविन्दसंभवहृदयानन्दनाय तपस्तप्यमानं पुलस्त्यमुनीन्द्रमभ्येत्य स्तुत्या च प्रसाद्य निरवद्यगुणसिन्धुस्तृणबिन्दुर्नाम राजर्षिरात्मनस्तनयामुदानीय मुदा परमया ददावुदारमनाः ॥ २० ॥

यस्येति बहुव्रीहिगर्भो बहुव्रीहिः । अन्यत्र दशमुखः दशवदनः । एवम्भूतं लङ्काराज्यं त्वयाऽकारीत्यन्वयः ॥

१७. **गत्वेति** । नानटीति अतीव नर्तनं करोति । सन्तोषातिशयात् महर्षिसन्निधौ यथाप्रतिज्ञातं कृतवन्तमुद्वीक्ष्य हर्षोद्रेकान्नर्तनमिति भावः ॥

१८. **इतीति** । का उपज्ञा यस्यास्सा 'उपज्ञा ज्ञानमाद्यं स्यादि'त्यमरः । किमुपक्रम इति । कः उपक्रमः यस्य कीदृशज्ञानमूलको देवतातिरस्कारः । कीदृशारम्भश्च पराक्रम इति प्रश्नद्वयार्थः ॥

१९. **अस्तीति** । पुलस्त्याख्यो योगी । मोहादीति । तपसा निर्जितमोहादिदोष इत्यर्थः ॥

२०. **तमिति** । अरविन्दसम्भवस्य चतुर्मुखस्य मनस्तुष्टये उदानीय अभिमुखं नीत्वेत्यर्थः ॥

पुत्रं शुभं किल पुलस्त्यमुनेः प्रसादाद्
विख्यातशीलमथ विश्रवसं प्रसन्ना ।
धन्या चिराय सुषुवे तृणबिन्दुकन्या
भानोः करादिव पतङ्गशिला कृशानुम् ॥ २१ ॥

अनन्तरमचिरेणैव कालेन गुरुमुखादधिगतनिखिलविद्यस्तपः-प्रभावेन पितरमतिशयानः श्रुतिसरणिहितमधुरफणितिपरितोषितश्रवा अपि विश्रवा वृद्धश्रवा इव शचीमाम्नायविधिमाश्रित्य नाम्ना धाम्ना च देववर्णिनीं भरद्वाजकन्यकामुद्वह्य सत्पुरुषचित्तवृत्तौ सत्त्वगुणं कैटभारेः कटाक्ष इव तस्यामद्भुतरूपमजनयत् तनयम् ॥ २२ ॥

विश्रवस्तनयोऽपि विनयोपपन्नः प्रतिपन्नश्रुतशीलादिसकलगुण-गणो वैश्रवणः पितृचरणमनुचकार सम्यगाचचार च धातारमुद्दिश्य दुष्कराणि तपांसि निस्समानि बह्वीः समाः ॥ २३ ॥

नृप सादरेण तपसा प्रसादितात् प्रपितामहादपि पितामहात्ततः ।
स धनाधिपत्यमथ नाकनाथवत्पदलोलुपोऽलभत लोकपालताम्॥२४॥

---

२१. **पुत्रमिति** । विश्रवस्संज्ञं पुत्रं भानोः करात् सूर्यस्य किरणात् पतङ्गशिला सूर्यकान्तशिला । पितुरसमानगुणं पुत्रं लेभे इत्यर्थः ॥

२२. **अनन्तरमिति** । वेदसम्मतमधुरभाषणेन श्रोतृणामानन्दकरः । विगते श्रवसी श्रोत्रे यस्येति विरोधाभासः । वृद्धश्रवाः इन्द्रः । धाम्ना कान्त्या देववर्णिनीं तन्नाम्नीं देवसमानकान्तिं चेत्यर्थः । चित्तवृत्ताविति स्त्रीलिङ्गेन कटाक्ष इति पुंलिङ्गेन च प्रकृतानुरूप्यं दर्शयति ॥

२३. **विश्रवसिति** । प्रतिपन्नः प्राप्तः, धातारं ब्रह्माणम् दुष्कराणि तपांसि आचचारेत्यन्वयः ॥

२४. **नृपेति** । पितामहात् वेधसः नाकनाथवत् देवेन्द्रवत् । देवेन्द्रः यथा त्रिलोकाधिपत्यादिमहदैश्वर्यं प्राप्तोपि पदलोभात् दिक्पालतामलभत तथा विशेषसंपदं प्राप्तोपि कुबेरः लोकपालपदमप्यासवानिति भावः ॥

आशापूर्तिं कृतवत्यपि भगवति पद्मसम्भवे देवे ।
उच्चैर्वैश्रवणोऽसावुपलेभे चित्रमुत्तरामाशाम् ॥ २५ ॥

ततस्तामरसजन्मना निहितं दुष्प्रापं पुष्पकाभिधानं विमानं कामचरं समारुह्य निजगुरुनिर्दिष्टां विचित्रकर्मणो विश्वकर्मणो निर्माण-नैपुण्यमनन्यसामान्यं त्रिविक्रमचक्रभयनिबन्धनेन पूर्वाध्युषितपलाश-कुलपलायनेन निष्कलङ्कां लङ्कां त्रिकूटशिखरालङ्कारभूतां गन्धर्वसुन्दरी-परिकलितसङ्गीतभङ्गीनिशमनसुखितश्रवणो वैश्रवणश्शरणयामास वासव इव दिवम् ॥ २६ ॥

इत्यागस्त्यं वचनममृतस्वादु काकुत्स्थवीरः
श्रुत्वा तत्रोन्मिषितकुतुकस्तं स पप्रच्छ भूयः ।
लङ्कां प्रागप्यधिगतवतां राक्षसानां प्रवृत्तिं
शिक्षां चैषां तत उपनतां श्रीहरेर्व्याहरेति ॥ २७ ॥

प्रत्युवाच चैनमित्थं ब्रह्मर्षिर्मैत्रावरुणिः ॥ २८ ॥

पुरा खलु प्रजासर्गे प्रजापतिर्हेतिप्रहेतिनामानौ मिथस्समानौ भ्रातरौ शुभेतरौ राक्षसावस्राक्षीत् ॥ २९ ॥

---

२५. **आशेति** । आशापूर्तिम् इच्छापूर्तिम् उत्तराम् अधिकाम् दक्षिणेतरां च आशां वाञ्छां दिशं च । आशापूर्तावपि पुनराशा समजनीति विरोधाभासः । उत्तरदिशं लेभ इति तत्परिहारः ॥

२६. **तत इति** । अन्यसामान्यं न भवतीत्यनन्यसामान्यम् निर्माण-नैपुण्यं रचनाकौशलम् । लङ्कामित्यभेदाध्यवसायः । चक्रभयं निबन्धनं कारणं यस्य तादृशेन पलाययेनेत्यन्वयः ॥

२७. **इतीति** । उन्मिषितं प्रवृद्धं कुतुकम् सन्तोषः यस्य । प्रवृत्तिं वृतान्तम् । वार्ता प्रवृत्तिर्वृत्तान्तः इत्यमरः ॥

२८. **प्रत्युवाचेति** । मैत्रावरुणिः मित्रावरुणसम्भवः अगस्त्य इत्यर्थः ॥

२९. **पुरेति** । शुभेतरौ अशुभौ असृक्षीत् सृष्टवान् ॥

तत्र हेतिरखिलभयावहायां भयाह्वायां परेतराजभगिन्यामपन्याय इव मोहं मूर्तिमन्तमिव निखिलभुवनक्लेशं विद्युत्केशं नाम तनयमजनयत् ॥ ३० ॥

विद्युत्केशस्य सुकेशस्सूनुरभवत् ॥ ३१ ॥

स च सकलहृदयङ्गमरामणीयकां ग्रामणीनाम्नो गन्धर्वस्य दुहितरं वेदवतीं नाम विलासवतीमुपयेमे ॥ ३२ ॥

त्रीन् लोकानिव निर्दग्धुं त्रीनस्यामात्मजानसौ ।
माल्यवन्तं व्यजनयन्मालिनं च सुमालिनम् ॥ ३३ ॥

आसाद्य मेरुमाचेरुरथ सौकेशयस्त्रयः ।
पुष्करासनमुद्दिश्य दुष्कराणि तपांसि ते ॥ ३४ ॥

सुप्रसन्नाच्च लोकेशात् सुकेशतनयास्त्रयः ।
ऐश्वर्यं चिरजीवित्वमजय्यत्वं च लेभिरे ॥ ३५ ॥

माल्यवानिन्द्रतुल्यश्रीर्भ्रातृभ्यां सममादृतः ।
विश्वकर्माणमाहूय पुरनिर्माणमादिशत् ॥ ३६ ॥

अपगतरिपुशङ्कामाज्ञया तस्य लङ्कां
कृतवियदुपरोधैरुज्ज्वलां रत्नसौधैः ।
सुखविहृतिपराणां सोऽथ नक्तंचराणां
विहितनयनशर्मा निर्ममे विश्वकर्मा ॥ ३७ ॥

---

३०. तत्रेति । भयेत्याह्वा नाम यस्याः परेतराजः यमः अपन्यायः अनीतिः यथा पुरुषस्य मोहं अज्ञानं करोति तद्वदित्यर्थः । अपन्यायमोहाविव पितृपुत्रौ सरूपाविति भावः ॥

३१. त्रीन् लोकानिति । त्रैलोक्यत्रयपीडनात् तथोत्प्रेक्षा ॥

३४. आसाद्येति । सौकेशयः सुकेशसुता इत्यर्थः । पुष्करासनम् ब्रह्माणम् दुष्कराणि तपांसि ते आचेरुरित्यन्वयः ।

३७. अपगतेति । स विश्वकर्मा तस्य माल्यवतः आज्ञया अपगतेति । शत्रुभिर्दुष्प्रवेशामित्यर्थः । कृतेति । आकाशव्याप्तैरित्यर्थः । विहितेति । विहितं नयनयोः शर्म सुखं येन रमणीयपुरनिर्माणेन द्रष्टृणां नयनानन्दकारीत्यर्थः । लङ्कां निर्ममे निर्मितवान् ॥

भीतो यद्गोपुराग्रस्थप्रतिमासिंहदर्शनात् ।
बलादुन्मूलितालानो भ्रमत्यभ्रमतङ्गजः ॥ ३८ ॥

किञ्च—

यत्तुङ्गमन्दिरपरिद्रवदिन्दुकान्त-
व्याकन्दलज्जलजळज्झळयोच्छलन्तम् ।
पातुं पयोधिमपटुर्बडवानलोऽपि
चन्द्रोदयेषु मुहुरर्थयते सहायम् ॥ ३९ ॥

अपि च—

सूर्यो नभोन्तरगतः स्वकरानुविद्ध-
दुःस्पर्शयद्वरणभानुशिलाग्नितप्तः ।
प्लोषापनोदनकृते रजनीमशेषां
वारांनिधेरुदरमेष विगाहते किम् ॥ ४० ॥

---

३८. **भीत इति** । यस्या लङ्कायाः गोपुरस्य पुरद्वारस्य अग्रे स्थितकृत्रिमसिंहदर्शनात् उन्मूलितं उच्छिन्नं आलानं पादबद्धशृंखला येन सः । अभ्रं मेघः स एव मतङ्गजः गजः साम्यात् मेघः गजत्वेन रूपितः । भ्रमति भ्रमणं करोति सिंहदर्शने गजानां भयप्रसिद्धेः । अभ्रङ्कषगोपुराग्रस्थप्रतिमारूपसिंह-दर्शनेन तत्रस्थमेघसञ्चारस्य मेघे गजाभेदाध्यवसायेन तादृशदर्शनहेतुकत्वोत्प्रेक्षा ॥

३९. **यत्तुङ्गेति** । यस्यां लङ्कायां यानि तुङ्गानि उन्नतानि मन्दिराणि गृहाणि तेभ्यः द्रवन्तः स्रवन्तः चन्द्रकान्ताः तेषां संमेलनेन अतिप्रवृद्धतरङ्गतया शब्दायमानं विशेषतः चन्द्रोदयेषु पयोधिं समुद्रं पातुं स्वेनैकेनैवोक्तरीत्या द्विगुणं प्रवृद्धं समुद्रं पातुमशक्यतया तदर्थमन्यं सहायं प्रार्थयते इत्यर्थः । चन्द्रोदये इन्दु-कान्तशिलाः स्रवन्तीति प्रसिद्धिः । समुद्राभिवृद्धिकरजलवर्षीन्दुकान्तोपलसदनानि लंकायां सन्तीत्यतिशयोक्तिः ॥

४०. **सूर्येति** । नभोमध्यंगतस्सूर्यः स्वकिरणसम्पर्कात् दुःस्पर्शः अतितप्ततया स्पष्टुमशक्यः यस्या लङ्कायाः वरणः प्राकारः तत्रत्या या भानुशिलाः सूर्यकान्ताः तत्सम्बन्धिना अग्निना भृशं तप्तस्सन् तादृशतापजनितनिजशोषणशान्तये कृत्स्नां रात्रिं वारांनिधेः समुद्रस्य उदरं मध्यभागं अवगाहते किमित्युत्प्रेक्षा । अस्तमयसमये सूर्यस्य समुद्रमध्यावगाहदर्शनात् तस्य मध्याह्नसूर्यस्य लङ्कापुर-

किं बहुना ?

यद्घोटकूटखुरपाटनजोर्ध्वगामि-
भूमीरजोव्रजनिपातकषायिताक्षाः ।
स्वर्गे सहस्रनयनाद्यनिमेषवर्गा
हा हन्त जन्म किल मानुषमर्थयन्ते ॥ ४१ ॥

तस्यां किल समुच्छ्रितसालसमाक्रान्तरोदस्यामजहदन्योन्यानुकूल्या माल्यादयस्सुखोदयजुषस्सुचिरं व्यहरन्त ॥ ४२ ॥

माल्यवान् गुणतो नामतश्च सुन्दर्यां गन्धर्वकन्यकायां वज्रमुष्टिविरूपाक्षादीन् राक्षसान् अनलाह्वयां च तनयां अजनयत् ॥ ४३ ॥

सुमाल्यपि कुसुमाळीसुकुमारगात्र्यां केतुमत्यां प्रहस्तधूम्राक्षादीन् विश्रुतदुश्चरित्रान् पुत्रान् केकसीकुम्भीनसीनामधेयं कन्याद्वयमप्युदपादयत् ॥ ४४ ॥

माली च वसुधायां स्ववनितायामनलादीन् विभीषणामात्यांश्चतुरांश्चतुरः पुत्रान् उदपादयत् ॥ ४५ ॥

भवनानां सूर्यमण्डलपर्यन्तोन्नततया तदानीं स्वकिरणसन्तप्ततत्रत्यसूर्यकान्तशिलाभिः सान्निध्यादधिकतापं प्राप्तस्य तच्छान्तिरूपफलहेतुकत्वमुत्प्रेक्ष्यते । सूर्यकान्तशिलामयभवनानि सूर्यमण्डलपर्यन्तोन्नतानि तस्यां सन्तीति तन्महिमवर्णनमिति भावः ॥

४१. **यद्घोटेति** । यस्यां लङ्कायां स्थिताः घोटाः अश्वाः तेषां कूटं समूहः तस्य खुरैः पाटनं भूमेर्विदारणं तेन उत्पाद्यमानो ऊर्ध्वगामिधूलीपटलनिपातेन कलुषिताक्षाः देवेन्द्रप्रभृतिदेवगणाः । मानुषं जन्म स्वेषां प्रार्थयन्ते हन्तेति खेदे । मानुष्यापेक्षया स्वर्गलोके देवानामतिशयितानन्द इति प्रसिद्धिः । तथा च श्रुतिः " ते ये शतं मानुषा आनन्दाः " इत्यादौ । किंच तेषामसकृत् मनुष्याणामिव नेत्रस्पन्दोपि नास्तीति तेषु च इन्द्रस्य सहस्रनयनत्वमिति च विशेषः । स्वर्गस्थित्यादिकं सर्वं उक्तरीत्या धूलिधूसरिताक्षत्वसम्पादनहेतुतया क्लेशायैवाभवत् । मनुष्यत्वे सर्वमेतन्न भवेत् । तदाहि धूलिनिर्गमेपि पक्ष्माच्छादनेन तत्परिहारः सुकरः स्यात् । सहस्रनयनं च न स्यादित्यादिबह्वानुकूल्यमिति भावः ॥

तेषु च बलोद्धतेषु तृणीकृतसुरग्रामणीकेषु रक्षसामनीकेषु त्रिलोकीमपि पुलाकीकृत्य भक्षयत्सु ॥ ४६ ॥

प्रलीनवेदं परिभूतभूतं पलायिताशेषमहर्षिजातम् ।
तथा कथाशेषितयागहोमं त्रैलोक्यमालोक्यत वासवेन ॥ ४७ ॥

अनन्तरं पुरन्दरस्तु बृन्दारकबृन्दानुगतो जगतो निरङ्कुशनिशाचरनिचयकृतातङ्कनिरासचिकीर्षया प्रणतजनविमतमर्दिनं कपर्दिनमभिगम्येत्थमर्थयामास ॥ ४८ ॥

"वामदेव! मदेनसां फलैरिव मदेन सान्द्रबलैः पलाशकुलैरिदानीमखिलमपि भुवनमभिभूयते; तेषामुदग्रशासनानां नानाविधैरुपायैरपायस्त्वया सानुकम्पेन सम्पाद्यः" इति ॥ ४९ ॥

एतच्च दिविषत्पतिभाषितमाकर्ण्य शैलकन्यासहायः सहासमेवं व्याजहार ॥ ५० ॥

हा हन्त नाहं तरसाशनानां निहन्तुमीशे निवहन्तु देवाः ।
एकस्स लोकस्य पतिर्हरिर्नस्त्रातुं हि यातुप्रवरेभ्य ईष्टे ॥ ५१ ॥

इति सर्वज्ञफणितिं शिरसि निधाय विबुधाः पुरान्तकं पुरस्कृत्य चिरन्तनं पुरुषमभिगन्तुमैहन्त ॥ ५२ ॥

---

४८. **अनन्तरमिति** । बृन्दारकानां देवानां बृन्दैः समूहैः निरङ्कुशानां निष्प्रतिद्वन्द्वानां राक्षसानां समूहेन कृतस्य आतंकस्य निराकरणेच्छया । प्रणतेति । विमतमर्दिनं अनिष्टनिवारकं कपर्दिनं रुद्रम् ॥

४९. **वामदेवेति** । मदेनसां मदंहसां फलभूतैः मदेन दर्पेण निबिडबलैः राक्षसकुलैः उदग्रशासनानां उग्रशासनानां अपायः अपगमः दयावता त्वया कार्य इत्यर्थः ॥

५०. **एतच्चेति** । दिविषत्पतेः इन्द्रस्य शैलकन्यासहायः उमापतिः ॥

५१. **हा हन्तेति** । हे देवाः! तरसाशनानां मांसभोजिनां राक्षसानामित्यर्थः । नेशे न शक्नोमि । यातुप्रवरेभ्यः राक्षसश्रेष्ठेभ्यः ॥

५२. **इतीति** । सर्वज्ञस्य रुद्रस्य फणितिं भाषितं पुरान्तकं त्रिपुरारिं चिरन्तनं पुरुषं पुराणपुरुषं नारायणमित्यर्थः । ऐहन्त ऐच्छन् ॥

अवधाय वधाय रक्षसा-
मनपायं तमुपायमच्युतम् ।
सपिनाकिभिरापि नाकिभिः
सदनं भास्वदनन्तशायिनः ॥ ५३ ॥

तत्र किल विचित्रतरवितानलम्बितविकसदनल्पकल्पकस्तबक-मकरन्दरसपरिपानसमदभ्रमरमिथुनकेलिसमरविसृमरकलरुतद्विगुणित-निजवदननिस्सरदनवद्यस्तुतिवचनरचनस्सुरजनः सञ्चरन्तमिव नयनानन्दं सचेतनमिव सकलजगदुत्सवं साकारमिव भक्तभाग्यपरिपाकं मूर्तिमन्त-मिव मुनिजनमनोरथं जङ्गममिव सुधाशनाङ्गनासौमङ्गल्यं प्रत्यक्षमिव पद्मालयाहृदयानुरागं प्रकटितरूपमिव सुरद्विषां विषादं सुकुमारमिव चिन्तामणिं सुशीतलमिव सूर्यं सर्वकालवर्तिनमिव कालमेघं सम्भाषणमिव मरकतशैलं निःश्वसन्तमिव मन्दरं परुषघोषोज्झितमिव पयसां निधिं कल-ङ्कासङ्गिनमिव कलानिधिं स्वनिकटजातचरसुरतटिनीफेनकगौरिव संलग्नै-र्निदिध्यासनपरायणसत्त्वोत्तरतापसमानसप्रवेशदशासंक्रान्तैरिव सत्वगुणै-

---

५३. **अवधायेति** । अनपायं अमोघं उपायं साधनं सपिनाकिभिः रुद्रसहितैः नाकिभिः देवैः भास्वत् प्रकाशमानं सदनं समुद्रं आपि प्राप्तम् । आप्नोतेः कर्मणि लुङ् ॥

५४. **तत्रेति** । आनन्दस्य अमूर्तत्वेन सञ्चाराभावेपि सञ्चारकथनात् । उत्सवस्य अचेतनस्य सचेतनत्वोक्तिरपि तथा । भाग्यस्य पुण्यस्य परिपाकः फलोन्मुखावस्था । निराकारापि साकारेति वर्णनात् मूर्तिरहितस्य मनोरथस्यापि तथैव । सुधाशनानां देवानां अंगनानां स्त्रीणां मांगल्यं स्थावरमपि जंगममिति विरोधः । पद्मालयायाः महालक्ष्म्याः, अनुरागः इतरेषामप्रत्यक्षः प्रत्यक्ष इत्युच्यते । नीरूपस्य विषादस्य रूपवत्वमसंभावितम् । शिलारूपत्वेन कठिनस्य चिन्तामणेः सुकुमारत्वं मृदुत्वं विरुद्धम् । उष्णरश्मेः सूर्यस्य शैत्यं नास्ति । वर्षाकालवर्तिनः नीलमेघस्य सर्वकालवृत्तित्वं विरुद्धम् । मरकतशैलस्य अचेतनत्वात् संभाषणमसंभवि । मन्दर-पर्वतस्याप्येवमेव निःश्वासोऽसंभावितः । सर्वदा शब्दायमानस्य समुद्रस्य तीव्रघोष-त्यागः अनुपपन्नः । कलानिधेः चन्द्रस्य कलङ्कराहित्यं न स्यात् । अयं तु तथाविध

रनर्घनखकिरणैः किम्मीरितेन प्रणिपतन्मृडमकुटविलुठदुडुपरिबृढ-
शकलकलनावसरपरिहसितसहंससरसिजेन प्रणिपतदमरवरमणिकिरीट-
शिखररुचित शुद्धमुक्ताफलमेलनकालविडम्बित नवकुड्मलपरिचयरुचिर-
सुरतरुकिसलयेन शरणागतभवजलधितरणानुगुणप्लवेन चरणयुगळेन
भद्रासनवेषं शेषं परिभूषयन्तं तदीयफणामणिघृणिगणद्विगुणितया
पीताम्बरश्रिया चरणकमलकलनाकृतार्थस्वर्धुनीस्पर्धोपनतया तदुपरि
पतनाभिलाषेण जङ्घोरुवलग्नाद्यङ्गसङ्गिन्या सरस्वत्येव कृतावतारया
सन्ध्याकान्तिकदम्बचुम्बिताम्बराडम्बरं विडम्बयन्तं बडबानलज्वालासं-
वलितं मकरालयं च तुलयन्तं पीताम्बरशोभासरस्वतीप्रत्यासन्नकालिन्दी-
प्रवाहविभ्रमं बिभ्रता समरेषु करेण गृहीते तस्मिन् जयश्रियोऽभिमुखी-
भावान्नूनमसौ तस्या एव वेणीति संभाव्यमानेन दानवप्राणपवनप्राप्त-
दर्पेण कृष्णसर्पेणेव सजातीयशेषसौहार्दादुपगतेन निजसोदरस्य निशा-
करस्य कादाचित्कराहुमहोरगपीडनानुचिन्तनादुन्मिषितामुदधिदुहितुरा-
ननम्लानिमुपशमयितुं कोशात्मनि कारागृहे विनिपात्य बद्धेनेव स्वर्भानुना
गभीरनाभीह्रदस्फुरदरविन्दरसालेहनचापलादुपस्थितेनेव भ्रमरनिकुरुम्बेण

इति विशेषः । पूर्वेष्वपि सर्वत्र हरेरेव तथा तथा रूपणात् सर्वोपपत्तिरूह्या । स्वनिकटजातचरायाः भगवतो नखकिरणसमीपे पूर्वमुत्पन्नायाः गंगायाः फेन-बिन्दुभिरिव तद्वत् नखरश्मीनां धवलत्वमित्यर्थः । ध्यानतत्पराणां सत्त्वगुण-पूर्णचित्तप्रवेशसमये संगतैः सत्त्वगुणैः, सत्त्वगुणस्य शुक्लत्वात् तथात्वेन नखरश्मि-वर्णनम् । मृडः रुद्रः तस्य मकुटे परिसरन्त्याः चन्द्रकलायाः संबन्धसमये परिहसितं हंससहितं पद्मं येन । भगवत्पादनिकटे प्रणामसमये चन्द्रकलासंगात् तथा वर्णनम् । सुरतरुकिसलयातिशयसौन्दर्यवतेत्यर्थः । शरणागतानां संबन्धी यो भवजलधिः संसारसागरः तदुत्तारणानुगुणेन चरणद्वन्द्वेन कृतावतारया सरस्वत्येव स्थितया पीतांबरश्रियेति पूर्वेणान्वयः । भगवच्चरणसंबन्धः गंगाया इव स्वस्या नास्तीति रोषेण तस्या उपरि पतितुम् । पादोपरिस्थितेषु अंगेषु संबद्ध-पीतांबरकान्तिः सरस्वतीत्युत्प्रेक्ष्यते । अम्बराडम्बरं आकाशवेषं विडंबयन्तं अनु-कुर्वन्तम् । पीताम्बरशोभैव सरस्वती तस्यां प्रत्यासन्ना सन्निहिता यमुना तत्प्रवाह-

प्रौढप्रतापपावकधूमस्तोमेनेव समुपसृत्वरेण सकलजगदानन्दकेन नन्दकेन संघटितकटितटसुषमाविशेषं, नाभीसरोरुहकुहरविहरमाणद्रुहिणमाणवक-क्रियमाणसामगानानुगुणमुपगानमिव कुर्वाणया तदुपरिपातुकया मधुकर-परम्परया पुनरुक्तदीप्तिकां नाभीनलिनतलशायिनं निजशिशुं चतुर्मुखं मुहुर्मुहुर्वत्सलतया विलोकमानाया वक्षस्स्थलमध्यमध्यासीनाया लोक-मातुर्लोचनेन्दीवरोचिर्वीचिकामिवाधः प्रवहन्तीं स्वस्वामिनः प्रिय-तमयोः भूमिकमलयोर्भूमिं शिरसि धृतवता मया कमलाचरणकमलमपि शिरसि निधाय धन्यता सम्पादनीयेति तन्निलयाद् भुजान्तरादधस्तादुप-स्थितां मरकतद्युतेरुदरस्य महोभिरुपाहितश्यामलिमानमिव शेषमूर्तिं भगवदङ्घ्रिपङ्कजनिस्सरणसञ्जातगर्वां गीर्वाणतरङ्गिणीति तदीर्ष्यया तदु-रस्स्थलस्थिततद्दयितापादारविन्दतो निष्यन्दमानामिव कलिन्दकन्यकां तनीयसीं रोमलतां निखिलभुवनब्रह्माण्डभरणनिराकुलेन निजोदरेण बिभ्राणं कोकनदगर्भमिव कुवलयवनं, कल्हाराटवीनिबिडमिव कालिन्दीह्रदं किंशुककुसुमपुञ्जपिञ्जरिताभ्यन्तरमिव तमालगहनं मन्दे-तरबालातपचुम्बितमिव मरकतगिरिगह्वरं, विजृम्भितकदम्बरजःकदम्ब-

---

श्रियं वहता भगवता समरेषु युद्धेषु तस्मिन् नन्दके करेण गृहीते जयलक्ष्म्या आभि-मुख्यात् असौ श्यामा दीर्घाकृतिः दृश्यमाना जयलक्ष्म्या एव वेणीति संभाव्यमानेन नन्दकाख्यखड्गेन शत्रुवधसमये दानवानां प्राणरूपपवनहरणं प्राणपातं तेन संजात-दर्पेण। सर्पाणां वाताशनत्वात् स्वर्भानोरपि सर्पत्वात् तत्सजातीयत्वं निजसोदरस्य लक्ष्मीसहोदरस्य चन्द्रस्य उभयोः क्षीरसागरसंभूतत्वात् सोदरत्वम्। अपराधिनां दण्डः कारागृहप्रवेशः खडगस्य निधानस्थानं कोशः स कारागृहत्वेन रूप्यते। नाभीनालीकरसास्वादाय समागतभ्रमरपुंजवत्स्थितेन नन्दकेनेत्यन्वयः। द्रुहिणः ब्रह्मा स एव माणवकः तेन क्रियमाणेत्यर्थः। पुनरुक्तदीप्तिकां द्विगुणितकान्ति स्वस्वामिनः भगवतः भूमिकमलयोर्मध्ये भूमिं परं धृतवतेत्यर्थः। तन्निलयात् लक्ष्मीवासस्थानात् भुजान्तरात् वक्षसः। **मरकतद्युतेरिति** इन्द्रनीलश्यामलत्वा-द्भगवदुदरस्य शेषमूर्तेः स्वभावतश्शुभ्रतया तत्र श्यामलत्वसंपादनाय मरकत-द्युतेरित्यादिविशेषणम्। गीर्वाणतरङ्गिणी गंगा तदीर्ष्यया तस्यामसूयया॥ **तदुरस्स्थलेति।** भगवत्पादतलात् ऊर्ध्वस्थानस्थितत्वे श्रियः भगवदपेक्षया

करम्बितमिव प्रावृड्दिवसं, निस्तुलकौस्तुभमहस्तरङ्गपिशङ्गितं, गारुत्मत-रत्नकवाटकल्पमुरस्तटमधिष्ठितया कल्पवल्ल्येव सदानन्दनस्थित्या, कामधेन्वेव श्रीवत्साभ्यर्णवासरसिकया, विद्युतेव घनप्रकाशावह्या, वीरुधेव सुमनोभिरामोदितया, वसन्तश्रियेव प्रदीपितकाननया, नवोद्यानभुवेव सत्तमालकान्तया, राजीवपरम्परयेव रमणीयालिकया, रामधनुर्वल्ल्येव रक्षोपायसम्पादिकया, त्रिविक्रमचरणवल्लोकमात्रा, आगमाल्याभिष्टुतयापि नागमाल्याभिष्टुतया, दीपजातामिख्ययापि नदीप-

---

अतिशयः द्योतितः । उरसः अधस्तात् विद्यमानायाः स्वभावतः श्यामायाः रोमावल्याः कलिन्दकन्यकात्वेन उत्प्रेक्षा । उरस्थलस्य स्वतः श्यामस्य कौस्तुभमणिकिरणसंपर्कात् कोकनदगर्भकुवलयवनमिवेत्युत्प्रेक्षा । कल्हारेत्यत्राप्येवमेव । किंशुककुसुमस्य पलाशपुष्पस्य रक्तत्वात् तत्संगितमालवत् कौस्तुभमणिसक्तवक्षः उत्प्रेक्ष्यते । एवमेव मन्देतरेत्यत्रापि ॥ **सदानन्देति** । सतामानन्दिनी आनन्दजननी स्थितिः यस्याः; कल्पलतापक्षे सदा नन्दनवने स्थितिः यस्या इति ॥ **श्रीवत्सेति** । श्रीयुक्तः कान्तिमान् वत्सः तर्णकः तत्समीपवासरसिकया; अन्यत्र श्रीवत्साख्यः हरिवक्षःस्थलस्थितो लाञ्छनविशेषः तत्समीपस्थया ॥ **घनेति** । घनस्य सान्द्रस्य प्रकाशस्य प्रभायाः आवहा उत्पादिका विद्युत्पक्षे घनानां मेघानां प्रकाशावहा प्रकाशजननी ॥ वीरुत् लता ॥ **सुमन इति** । सुमनोभिः कुसुमैः आमोदितया वासितया अन्यत्र सुमनसां देवानां अभिरामं हृद्यं उदितं उक्तिः उदयश्च यस्याः । वदधातोः इण्धातोश्च भावे क्तप्रत्यये उदितमिति रूपम् ॥ **वसन्तश्रियेति** । प्रदीपितं प्रकाशितं काननं अरण्यं यया सा । अन्यत्र प्रदीपितं स्वदर्शनानन्देन विकासितं कस्य ब्रह्मणः आननं यया सा ॥ **नवोद्यानेति** । **सत्तमेति** । सद्भिः समीचीनैः तमालैः कान्तया अन्यत्र सत्तमैः अतिशयेन सद्भिः अलकैः अन्तया मनोहरया अथवा सत्तमाः अलकान्ताः अलकाग्राणि यस्या इति ॥ **राजीवेति** । रमणीयाः अलयः भ्रमराः यस्याम् । अन्यत्र रमणीयं अलिकं ललाटं यस्याः इति च ॥ **रक्षोऽपायेति** । रक्षसां राक्षसानामपायः विनाशः, अन्यत्र रक्षायाः उपायः तत्संपादिका इति ॥ **लोकेति** । माता जननी प्रमाता च ॥ **आगमाल्येति** । आगमानां वेदानां आल्या परंपरया अभिष्टुता । नागमेत्यादिना विरोधः । नागाः सर्पाः माल्यं, यस्य तादृशेन शिवेनाभिष्टुतेति

जाताभिख्यया, तमोदावहरणमूलभूतयापि नतमोदावहरणमूलभूतया, अङ्गदविलसितयापि अनङ्गदविलसितया, सरसार्थपोषकगिरापि नरसार्थपोषकगिरा, वनजाभ्यधिकप्रीत्यापि नवनजाभ्यधिकप्रीत्या, अकार्यारम्भनिवारिकयापि नाकार्यारम्भनिवारिकया दयासरिता परितापहृतेव प्रियतमया प्रतिकलमुपलम्भितैरनुरागभरतरङ्गितैरिङ्गितैककण्ठैर्नवैर्विलास-

---

परिहारः ॥ **दीपेति** । दीपानां जातं समूहः तस्येवाभिख्या शोभा यस्याः ॥ नदीपः समुद्रः तज्जातेति क्षीरसागरकन्यकेति अभिख्या नामधेयं यस्या इति च । "अभिख्या नामशोभयोः" इति ॥ **तम इति** । तमः अज्ञानमेव दावः तस्य हरणस्य परिहारस्य मूलभूता कारणभूता अज्ञाननिरासनेन चैतन्यस्तन्यदायिनीत्यर्थः ॥ **नतेति** । नतानां प्रणतानां देवादीनां मोदस्य रावणादिविनाशजनितानन्दस्य आवहः संपादको यो रणः रामरावणादियुद्धं तस्य मूलभूता सीतादिरूपेणावतीर्य कारणीभूता । "राघवत्वेऽभवत्सीता रुक्मिणी कृष्णजन्मनि" इति वचनात् ॥ **अंगदेति** । अंगदैराभरणविशेषैः । अनंगदं कामप्रदं विलसितं यस्याः ॥ **सरसेति** । शृङ्गारादिरसगर्भस्य अर्थस्य पोषिका संपादिका गीः वाक् नर्मोक्तिः यस्याः । यद्वा रसः भगवान् तत्सहितः अर्थः परमपुरुषार्थः । तदनुभवरूपः तस्य पोषिका संपादयित्री गीः मन्त्रोपदेशरूपो यस्याः । भगवन्मन्त्रोपदेशे लक्ष्म्याः प्रथमाचार्यत्वस्य शास्त्रप्रसिद्धत्वात् ॥ **नरेति** । नराणां मनुष्याणां सार्थः समूहः तस्य पोषिका वात्सल्यातिशयेन आश्रितदोषमर्षणपूर्वकं तदुज्जीविका । "कार्यं करुणमार्येण न कश्चिन्नापराध्यति" इत्यादिरूपा गीः यस्याः । **वनजेति** । वनजं पद्मं नवनं नुतिः तज्ज्ञेत्यादि । **नाकेति** । नाकारयः स्वर्गशत्रवः असुराः । परितापाः आध्यात्मिकाधिदैविकाधिभौतिकाः, सरित्पक्षे ग्रीष्मादिजास्तापाः तदपहारिण्या दयासरितेव स्थितयेत्यन्वयः । **प्रतिकलमिति** । कला कालभेदः । उपलंभितैः अनुभवपथं नीतैः अनुरागभरेण तरंगितैः कन्दलितैः । इंगितं मनोभावः तस्य एककण्ठैः सहचरैः भावानुगुणैरित्यर्थः । **परादिकालमिति** । परो नाम चतुर्मुखस्य जीवितकालः । "चतुर्युगसहस्राणि ब्रह्मणो दिनमुच्यते" इत्यादिभिः परिमितः शतवर्षात्मकः निमेषवन्नीतो येन तादृशम् । उक्तं च श्रीमद्यामुनाचार्यैः

विशेषैः निमेषवन्नीतपरादिकालं, सोदरीसदनविरोधोन्मिषदयशःप्रशमनाय तत्सख्यचिकीर्षया करकमलमुपागतस्येव सुधाकरस्य निजबलार्जितदनुजभुजबलविजयविजृम्भितस्य, पुञ्जीभूय भुजाग्रे जाग्रत इव यशःपुञ्जस्य हस्तारविन्दसौन्दर्यातिशयन्यस्तस्यात्रैव लग्नस्य, प्रत्यक्षस्येव सत्त्वगुणजटिलसाधुजनमनःपुण्डरीकस्य, सव्यकरे सरळमराळमिळितनलिनसौभाग्यं मञ्जुलमञ्जरीपरिचुम्बितसम्फुल्लपल्लवाडम्बरविडम्बकत्वं च सम्पादयतः सहस्रारसमभिव्याहारधन्यस्य पाञ्चजन्यस्य निर्जितोर्जपर्जन्यवर्णाभिर्हस्तारविन्दनिस्सरदपूर्वगङ्गातरङ्गशङ्कावहाभिः नित्यसूरिनिकरलोचनचकोरचन्द्रिकाभिराभाझरीभिस्स्मेरीकृतहरिदन्तरं भुजभुजङ्गमोत्तमाङ्गसङ्गतदिव्यरत्नेन कङ्कणखचितमरतकशकलगणकिरणप्रकरणद्विगुणितमेचकितदक्षिणबाहौ यमुनाप्रवाहमोहेन दुहितृस्नेहेन दूरादापतितेनेव दिनपतिना भजतामपवर्गमार्गमुपदर्शयितुमुद्धृतेनेव सत्यप्रदीपेन तेजोविशेषदुर्निरीक्ष्येणापि सुदर्शनेन दूरीकृतबाह्याभ्यन्तरतिमिरं, अहङ्काराभिमानित्वेऽपि विनम्रं वल्लीविशेष-

---

स्तोत्ररत्ने "क्षणाणुवत्क्षिप्तपरादिकालये"ति। **सोदरीति**। सोदरी लक्ष्मीः तत्सदनं कमलं तस्मिन् विरोधः तन्मुकुलनात्मकं करकमलं करात्मकं कमलम्। षष्ठ्यन्तपदानां उत्तरत्र पाञ्चजन्यस्येत्यत्रान्वयः। **निजबलेति**। आत्मभुजेत्यर्थः। **हस्तेति**। तत्सौन्दर्यविषयध्यानयुक्तस्येत्यर्थः। **सत्त्वेति**। सत्त्वगुणस्य धवलत्वात् पाञ्चजन्यस्य च धवलत्वात्। साधुजनमनःपुण्डरीकं भगवत्करसौन्दर्यपरवशं तत्रैव लग्नं किमित्युत्प्रेक्षा। **सव्येति**। मराळः हंसः। **संफुल्लेति**। पुष्पितेत्यर्थः। पुष्पस्य धवलत्वात् पल्लवस्य रक्तत्वात् तत्साम्यं करपाञ्चजन्ययोः। **सहस्रारेति**। सहस्रारं सुदर्शनं तस्य समभिव्याहारः साहचर्यम्। **निर्जितोर्जेति**। ऊर्जपर्जन्यः शारदो मेघः। **अपूर्वेति**। पादारविन्दतः प्रसृता प्रसिद्धा गंगा। इयं तु न तथेत्यपूर्वेत्यर्थः। **चन्द्रिकाभिः**। तत्त्वेन उत्प्रेक्षा। आभाझरीभिः कान्तिपूरैः। **संगतेति**। संगतदिव्यरत्नेनेवेति गम्योत्प्रेक्षा। किरणानां प्रकिरणं प्रसरणं तेन द्विगुणितेत्यादि। **यमुनेति**। यमुनायाः श्यामत्वात् तत्प्रवाहभ्रमः। **दुहितृस्नेहेनेति**। यमुनायाः विवस्वत्तनयात्वात् सुदर्शनस्य कोटिसूर्यसमप्रभत्वात् तथोत्प्रेक्षा। **सत्यप्रदीपेनेति**। स्थिरप्रदीपेनेत्यर्थः। **अहङ्कारेति**। अहंकारः

मिव शिलीमुखासनं श्रुत्यन्तकलनार्हगुणविशेषशालितया समरेषु स्वाश्रितानां क्रूराणामपि महाशराणां मुक्तिं विदधानं शार्ङ्गाभिधानं चापमादाय विबुधनयनसुखावहेन विग्रहेण प्रतिस्पर्धिनं जिष्णुधनुर्धरं, सत्तरवारिधरं भक्तजनप्रीतिलतिकोपघ्नयष्टिं दुष्टमार्गगमनप्रतिरोधनार्गळां प्रपदनकृतां वैकुण्ठदिव्यनगरकवाटिकोद्घाटनशलाकां मुनिजनमनोगजालानं जगदवनसवनाङ्गपिशिताशनपशुनियोजनयूपरूपां अतनुसमरलीलानुकूलां प्रियतमामिव कौमोदकीं पाणिग्रहणेन कृतार्थयन्तं मृदुतुलसीदामसमागमपरिमिळितपरिमळतया पारिजातमाल्यादगृह्यमाणविशेषया, नवमौक्तिकस्रजा भुजान्तरं कन्धरां च परिरम्भमाणया शङ्खगर्भस्रुतशुद्धदुग्धधारयेव अभिषिच्यमानवक्षस्थलस्थितलक्ष्मीकं सेवाकृतां संसारकाळरात्रेरवसानसूचकेनेव हरिहयहरिद्धवळिम्ना रसनाग्रजाग्रदमृतकरावदातवाग्देवताविग्रहकान्तिझरीपरीवाहेनेव बहिर्विसृमरेण पयोजसदनावदनेनेवाविरताधरदळचुम्बनमाचरतास्थिरमेव मन्दत्वमधरसङ्गिन इति निदर्शयता मन्दहासेन चन्द्रिकाशीतलेन निवर्तितार्तजनतापत्रयं विरोधानुविद्धा विष्णुपदे स्थितिरावयोरासीदविरोधेनैव विष्णुमुखे स्थेयमावाभ्यामित्यास्थयेव तत्र नेत्रात्मनावस्थिताभ्यां सूर्याचन्द्रमोभ्यां प्राचीनवासनोपनतया विहायसा कलनस्पृहयेव कर्णशष्कुल्यभ्यर्णमश्नुवानाभ्यां परस्पराविरोधस्थिरीकरणार्थमिव तुल्यमेव पुण्डरीकसौहार्दं रजनीचरचक्रभयङ्करत्वं च भजमानाभ्यां, प्राणिनां प्रबोधैकहेतूनालोकांश्च प्रददानाभ्यामुपगतसुषमाविशेषं नाभीकञ्जं परितस्संचरन्तश्चंचरीकाः पुण्डरीक-

---

तृतीयं तत्त्वं तदभिमानिदेवता शार्ङ्गमिति शास्त्रप्रसिद्धम्। अन्योऽर्थः अहङ्काराभिमानः अहमित्यभिमानः गर्वापरपर्यायः। **शिलीमुखेति**। शिलीमुखाः बाणाः तेषां असनं क्षेपकम्। वल्लीपक्षे शिलीमुखाः भ्रमराः तेषामासनं आश्रयस्थानमित्यर्थः। **श्रुत्यन्तेति**। वेदान्तप्रतिपाद्यसौलभ्यवात्सल्यसौशील्यादिगुणविशिष्टत्वेन स्वाश्रितानां महाशराणां राक्षसानामपि मुक्तिं मोक्षं विदधानम्। अत्यन्तसुगुणत्वेन आश्रितदोषानपरामृश्यैव तेषां मोक्षप्रदमित्यर्थः। अर्थान्तरं तु कर्णान्ताकर्षणीयज्यायुक्ततया महाशराणां महतां बाणानां मुक्तिं क्षेपम् इति।

मोहेन नयनयोरुपरि पतिष्यन्तीति तदन्तिके निहितचम्पककुसुममेवेद-मिति सम्भाव्यमानया, निःश्वसितमयनिगमशब्दनिष्पादकवेणुविशेष-रूपया सौष्ठवेन समाकृष्टसभ्यजनमनसा नसा प्रसाधितेन, नयनाभ्यां कर्णाभ्यर्णदेश इव ऊर्ध्वदेशोऽपि माक्रम्यतामिति निक्षिप्ताभ्यामिव

प्रतिस्पर्धिनं शत्रूणां पुरतो योद्धारं 'अभियाता प्रहर्ते'ति प्रसिद्धः। **जिष्णुधनुरिति**। जयशीलधनुर्धारिणम्। सत्तरः जलभरितत्वादुत्तमो वारिधर एव सन्। निशितः तरवारिः खड्गः तद्धारिणम्। भक्तजनप्रीतिरेव लता तस्या धारकदण्डम्। **प्रपदनेति**। प्रपन्नानां वैकुण्ठद्वारकवाटोद्घाटनसाधनाय सशलाकामित्यर्थः। आलानं गजबन्धनयूपम्। पिशिताशनाः राक्षसाः ते एव पशवः तेषां बन्धनयूपम्। अतनुः मन्मथः तस्य समरलीला प्रणयकलहः। अन्यत्र अतनुसमरः पृथुल-समरः। पाणिग्रहः बिवाहः। अन्यत्र पाणिना ग्रहणं स्वीकारः। **शंखगर्भेति** कण्ठे शंखत्वोत्प्रेक्षा, नवमौक्तिकहारे दुग्धधारात्वोत्प्रेक्षा च। हरिहयहरित् ऐन्द्री दिक्। तस्यां धवलिम्नः राज्यवसानसूचकत्वं प्रसिद्धम्। अमृतकरः चन्द्रः तद्वदवदातः वाग्देवताविग्रहः हयग्रीवः। हयग्रीवस्य श्वेतत्वात्। **अधरसंगिन इति**। नीचसंसर्गिणः मन्दत्वं मूढत्वं निदर्शयता दृष्टान्तप्रदर्शनेन बोधयता। प्रकृतार्थस्तु अधरं ओष्ठं मन्दहासः स्मितं। विष्णुपदं आकाशं विष्णोः पदं च। **विरोधेति**। आकाशे चन्द्रसूर्ययोर्युगपदवस्थानाभावात्। "चक्षुषी चन्द्रसूर्या"विति प्रसिद्धेः। **कर्णशष्कुलीति**। कर्णशष्कुलीमध्ये आकाशस्य विद्यमानत्वादिति भावः। पुण्डरीकसौहार्दं चन्द्रमसो नास्ति। तथैव चक्रवाकभयङ्करत्वं च सूर्यस्य नास्ति। चक्रवाकपक्षिणां दिवैव सन्तोषात्। भगवन्नयनात्मकतायां तु उभयमप्यु-भयोरप्युपपद्यत इति भावः। नेत्रपक्षे रजनीचराणां राक्षसानां चक्रं मण्डलं तद्भयङ्करेत्यर्थः। पुण्डरीकसौहार्दं पद्मसादृश्यमित्यर्थः। **प्रबोधेति**। प्रबोधस्य वस्तुविज्ञानस्य एकहेतून् मुख्यकारणीभूतान् आलोकान् प्रकाशान्; अन्यत्र आत्मज्ञानसाधनभूतान् वीक्षणविशेषानित्यर्थः। "जायमानं हि पुरुषं यं पश्येन्मधु-सूदनः। सात्त्विकस्स तु विज्ञेयः स वै मोक्षार्थचिन्तकः॥" इति भगवत्कटाक्षस्य आत्मज्ञानहेतुत्वात्। **चम्पकेति**। चम्पककुसुमस्य भ्रमरविरोधित्वात्। **निःश्वसि-तेति**। "यस्य निःश्वसितं वेदाः" इति प्रसिद्धेः। **सौष्ठवेनेति**। 'उन्नस'मिति

सीमान्तशिलाभ्यां नयनाम्बुधिचुम्बिशैवालरेखाभ्यां स्वकिङ्करीभूत-शङ्करपङ्कजासनादिदेवताभ्यामपि विनताभ्यां भ्रूभ्यां भूषितेन, सरसिज-बन्धुनापि सुधाकरावतारेण, पावकप्रभवदेशेनापि परमशीतलेन, ब्राह्मणा-भ्युदयस्थानेनापि महाराजलक्षणैकसीम्ना, शुद्धसत्त्वलोध्रतरुशाखाभ्यामिव सितोर्ध्वपुण्ड्ररेखाभ्यां भूषितेन वक्त्रबिम्बेन वन्दारूणाममानमानन्द-सन्दोहं सन्दुहानं, मुकुन्देन कदाचिदधिचरमाङ्गधारणान्मन्दरोऽयं मद-भरोत्सिक्त इति तदीर्ष्यया नित्यमेव तदुत्तमाङ्गमधिवसता मेरुणेव सर्व-रत्नसमावेशचारुणा हाटककिरीटेन विभास्वरीकृतलोकं, विलोकयामास भगवन्तं वासुदेवम् ॥ ५४ ॥

श्रिया सह विहारिणे शुभगुणैरलङ्कारिणे
निशाचरविदारिणे निगममौलिसञ्चारिणे ।
रथावयवधारिणे रसविदां मनोहारिणे
नताभिमतकारिणे नम इदं मधोर्वैरिणे ॥ ५५ ॥

भगवन्नासिकाया आकर्षकत्वात् । नसा नासिकया । **स्वकिङ्करेति** । शंकरादीनां भगवद्भ्रुकुटिकिङ्करत्वात् । **विनताभ्यामिति** । स्वस्य नन्तव्याभावात् विरोधः । धनुराकारतया प्रवणमिति परिहारः । **सरसिजेति** । सरसिजबन्धुः सूर्यः सरसिज-सदृशमित्यर्थान्तरम् । **सुधाकरेति** । सुधाकरश्चन्द्रः । तस्य अवतारदेशेन नारायणनयनाभ्यां चन्द्रसूर्योदयस्य पुराणेषु प्रसिद्धत्वात् । अथवा सुधा अमृतं करे यस्य सः । समुद्रमथनावसरे स्ववशीकृतसुधाकलशः इन्द्रः तदवतारेण अवतारदेशेन । **पावकेति** । पावकस्य अग्नेः प्रभवदेशः उत्पत्तिस्थानम् । **ब्राह्मणेति** । महाराजलक्षणं क्षत्रियलक्षणम् जगदीश्वरलक्षणं च । अत्र "मुखा-दिन्द्रश्चाग्निश्च । ब्राह्मणोऽस्य मुखमासीत् " इत्यादिश्रुतिः प्रमाणम् । **शुद्ध-सत्त्वेति** । शुद्धसत्त्वं नित्यविभूतिः स एव लोध्रतरुः इति धावल्याद्रूपणम् । तस्य शाखाभ्यामित्युत्प्रेक्षा । भगवद्दिव्यमङ्गलविग्रहस्य शुद्धसत्त्वपरिणामरूपत्वं शास्त्रप्रसिद्धम् । **कदाचिदिति** । समुद्रमथनावसरे कूर्मरूपिणा विष्णुना मन्दर-पर्वतस्य धारणात् । हाटककिरीटेन स्वर्णकिरीटेन ॥

५५. **श्रिया सहेति** । रथावयवेति चक्रेत्यर्थः । रसेति । "रसो वै सः" इति श्रुतेः रसविदः ब्रह्मविदः तेषां मनोहारिणे ।

अग्रे चक्षुः किमपि जगतां यस्य ते चक्षुषोऽभूत्
यस्य प्राणात् समजनि जगत्प्राण इत्यामनन्ति ।
गीर्वाणानां मुखमपि मुखादाविरासीद् यदीयात्
तस्मै तुभ्यं मुरहर नमोवाकमावर्तयामः ॥ ५६ ॥

इति भगवन्तं नारायणं शरणमुपगम्य रम्यैश्च स्तुतिशतैराराध्य सुराध्यक्षा रक्षोभिरुत्पाद्यमानं जगत्क्षोभं कृत्स्नमाचचक्षिरे ॥ ५७ ॥

सोऽपि तापिच्छमेचको भक्तजनभयमोचको वाचमेषां दिविषदामाकर्ण्यार्णवकन्यासहचरो निशाचरोत्तमान् दमयितुकामस्सार्धमेव सुरध्वजिन्या त्रिविष्टपयात्रां निराशङ्कस्सङ्कल्पयामास ॥ ५८ ॥

पद्मालयासहचरेऽथ पुरात्सुराणां
यातुं प्रवृत्तवति यातुपुरं सरोषे ।
लक्ष्मीः पुनर्व्यवसिता रजनीचराणां
गेहादहो सुरगणस्य गृहाण्युपैतुम् ॥ ५९ ॥
रक्षोवधाय भगवान् रचितत्रिलोकी-
रक्षोऽवधाय विजयं मरुतां रमेशः ।
आरुह्य शत्रुभिरसह्यजवं सुपर्णं
सन्नह्य साधु समराभिमुखं प्रतस्थे ॥ ६० ॥

तदानीन्तु मदापनीतविवेका रजनीचरलोकाः परेण ब्रह्मणापि सह प्रतियोद्धुमुद्धतबुद्धयो मालिप्रभृतयो जवान्निजवाहिनीं समनीनहन् ॥ ६१ ॥

---

५६. **अग्र इति** । अग्रे सृष्ट्यादौ, जगतां चक्षुः सूर्यः, जगत्प्राणः वायुः, गीर्वाणानां मुखं अग्निः । "अग्निमुखा वै देवाः" इति श्रुतेः । आवर्तयामः पुनः पुनः सहस्रशो वदामः ॥

५९. **पद्मालयेति** । लक्ष्मीरिति । लक्ष्म्याः भगवदविनाभूतायाः, भगवतः यातुधानपुरप्रवेशे भगवन्तं विना सुरगृहप्रवेशादाश्चर्यम् । राक्षसानां पराजयनिश्चयात् जयलक्ष्मीर्देवपार्श्वगतेत्यर्थः ॥

६०. **रक्षोवधायेति** । रक्षोवधाय राक्षसवधाय रचिता त्रिलोक्याः रक्षा येन सः । अवधायेति पदच्छेदः निश्चित्येत्यर्थः ॥

६१. **तदानीमिति** । समनीनहन् सन्नद्धां चक्रुरित्यर्थः ॥

नासाबिलात्प्रविपुलात्कुपितस्य मृत्योः
श्वासा इवोग्रविशिखा इव तूणगर्भात् ।
वल्मीकरन्ध्रत इव क्षुधिता भुजङ्गा
लङ्कापुरान्निरगुराशु पलाशसङ्काः ॥ ६२ ॥
चकासितं चक्रधरस्य केतौ
तार्क्ष्यं तदा वीक्ष्य तदीर्ष्ययेव ।
प्रत्यर्थिनां तत्र पलाशनानां
केतुष्वतिष्ठन् पथि गृध्रभेदाः ॥ ६३ ॥
अपरश्चायमुत्पातस्तदाशरैर्ददृशे ॥ ६४ ॥
प्रद्वेषं सुमनःपङ्क्तौ पलाशेषु च सौहृदम् ।
माल्यवानप्यहो मालिसुमालिभ्यां समं दधौ ॥ ६५ ॥
स्फुटं नटद्घोटखुरप्रहारक्षुभ्यत्क्षितौ संयति राक्षसानाम् ।
तेषां मनीषेव तदा रजोभिः क्रमात्तमोभिश्च समावृता द्यौः ॥६६॥
तदा दृढतोमरखड्गकोदण्डमुद्गरचण्डभिण्डिवालकुन्तमुखैरन्तकदन्त-
कल्पैरखिलभुवनहिंसोपकरणैः समेधितविबुधबाधा यातुधाननाथा निर्जर-
परिषज्जन्यनिर्जयजन्ययशःप्रकटनाय विश्रुतोर्जितदौर्जन्याः पर्जन्या
इव गर्जन्ति स्म ॥ ६७ ॥

---

६२. **नासाबिलादिति** । निरगुः निर्जग्मुः ॥

६३. **चकासितमिति** । गृध्राणां ध्वजेष्वस्थानमनिष्टसूचकम् ॥

६५. **प्रद्वेषमिति** । सुमनसां देवानां पुष्पाणां च । पलाशेषु पत्रेषु राक्षसेषु च । माल्यमस्यास्तीति माल्यवान् । माला अस्यास्तीति माली । तथैव शोभना माला अस्यास्तीति सुमाली । एतेषां त्रयाणां मालावतां पुष्पेषु द्वेषस्या-युक्तत्वादाश्चर्यम् । तथैव पत्रेषु प्रीतिश्चाद्भुतेति भावः ॥

६६. **स्फुटमिति** । घोटाः अश्वाः रजोभिः रजोगुणैः धूलिभिश्च तमोभिः तमोगुणः अंधकारैश्च ॥

६७. **तदेति** । निर्जराणां परिषदः समूहस्य जन्ये युद्धे निर्जयः नितरा-मुत्कर्षप्राप्तिः, तज्जन्यं यत् यशः तत्प्रकटनाय । विश्रुतं प्रसिद्धं ऊर्जितं महत् दौर्जन्यं दौष्ट्यं येषां तादृशाः ॥

तदानीन्तु—

महाशरेषु मुक्तेषु मधुकैटभवैरिणा ।
अर्दितास्तैरथाधावन् हन्त मुक्ता महाशराः ॥ ६८ ॥
उन्मीलितं निजबलं युधि रोषशाली
माली विलोक्य वनमालिनि सावलेपः ।
बाणान्मुमोच पुरतस्तदनु क्षणेन
प्राणान्मुमोच हरिचक्रनिकृत्तमौलिः ॥ ६९ ॥

तदनु सदनुग्राहको विग्रहव्यग्रमहोग्रक्रव्यादवर्गनिग्रहेण परितोष-भरितोऽयमधिकमधिजन्यं पाञ्चजन्यमादध्मौ पद्मनाभः ॥ ७० ॥

युद्धक्षुब्धाशरान्तःपुरजनकरुणाक्रन्दनद्विस्त्रिरुक्ताः
बह्निष्ठैः स्वालिघातैर्बधिरितभुजगग्रामणीकर्णरन्ध्राः ।
श्लाघाघोषा इवाब्धेर्मुदमिह दधतः प्रेक्ष्य जामातृशौर्यं
काष्ठास्वष्टासु चेरुः कलितसुरपथोल्लङ्घनाः शङ्खनादाः ॥

अथ विबुधविपक्षोद्वेगदयागदयादयागन्धबन्ध्येन ज्वालामालाभि-रपहसितोदयदर्केण चक्रेण शार्ङ्गमुक्तेन शरेण परिह्रियमाणान् अभिरक्षि-तुमशक्नुवन्तौ भयेन प्रथमं साशङ्कमालोक्य पलायनमाकलय्य पुनरमर्षा-त्प्रत्यावृत्य, शक्त्या महत्या दृढतरं ताडयन्तौ सुमालिमाल्यवन्तौ निशाम्य सम्यगुन्मिषितरोषो वैनतेयः प्रकटितसुरपक्षपातान् स्वपक्ष-पातानद्भुतानुद्भावयामास ॥ ७२ ॥

तूर्णं संघूर्णमानत्रिदिवतरुशिरःपुष्पनिष्पातनिर्य-
द्गन्धप्रच्छन्नयुद्धक्षतपलभुगसृग्वर्गदुर्गन्धसर्गाः ॥
उग्राश्चेरुर्गरुत्मद्गरुदुरुमरुतो वेगनिर्भिन्नवेध-
स्सौधप्राकारकूटस्फुटनचटचटात्कारवाचाटिताशाः ॥ ७३ ॥

---

६८. महाशरेष्विति । महाबाणेषु, महाशराः महान्तो राक्षसाः प्राणैर्मुक्ताः ॥

७०. तदन्विति । अधिजन्यं अधियुद्धम् ॥

७१. युद्धेति । जामातृशौर्यं विष्णुशौर्यम् ॥

७३. तूर्णमिति । बृहद्रूपधारिणा वैनतेयेन तथा कृतमित्यर्थः ॥

किञ्च—

वेगाघातोर्ध्वनीतोत्तरलजलनिधिस्फालकल्लोलमाला-
निक्षेपक्षाल्यमानप्रथनभवरजश्छन्नमार्ताण्डबिम्बाः ।
स्वस्थानोत्थापितोर्ध्वव्यतिपतनदशायोजिताशागजोद्य-
त्कुम्भाकुम्भिप्रणादैर्मुखरितवियतः पक्षिराट्पक्षवाताः ॥७४॥

तैरेतैर्गारुत्मतैः पक्षवातूलैर्माल्यवान्दूरतरमुत्क्षिप्य निपातितो विश-
कलितकरणसमूहो मुमोह ॥ ७५ ॥

तत्पक्षवातैस्तरलीकृताद्रि-
शृङ्गैस्सुमाली शिथिलीबभूव ।
किमद्भुतं कालवशाद्विशीर्ण
पलाशबृन्दं च पलायतेति ॥ ७६ ॥

ततस्तौ सुकेतुपुत्रौ प्राणत्राणमेव कर्तुकामौ परित्यज्य लङ्काराज्यं
पातालकुहरमनुप्रविष्टौ तत्रैव चिरमासामासतुः ॥ ७७ ॥

तरसाशनधौरेयः कदाचन रसातलात् ।
सुमाली बहिरुत्तस्थौ वसुमालीव सागरात् ॥ ७८ ॥

धरणीतले तत इतो दुहित्रा केकस्या सह सुचिरमचरत्
सुमाली ॥ ७९ ॥

तत्रान्तरे रात्रिचरो धनेशं
दिष्ट्या चरन्तं दिवि पुष्पकेण ।
विद्युत्प्रभाभिर्वृतमङ्गनाभि-
र्ददर्श तिग्मांशुमिव द्वितीयम् ॥ ८० ॥

ततस्सुमाली धनदं रविप्रभं
विलोक्य तं विस्मयमानमानसः ।
प्रविश्य भूयो बलिसद्म केकसीं
बभाण पुत्रीं किल बन्धुतावृतः ॥ ८१ ॥

---

७६. तत्पक्षवातैरिति । गरुत्मत्पक्षवातैः पलाशानां पत्राणां राक्ष-
सानां च बृन्दम् । जीर्णपत्राणां महावाते सति पलायनस्य प्रसिद्धत्वात् । पलायत
रलयोरभेदालङ्कारः, परेत्युपसर्गः । अयगताविति धातोर्लुङ् ॥

वत्से! हन्त! तव विवाहकालोऽतिवर्तते। तदद्यैव रसातलादुद्गम्य तपोधनाग्रगण्यस्य विश्रुतानुभावस्य विश्रवसो मुनेः पत्नी भवतु भवती ॥ ८२ ॥

तथा सति धनाधिनाथप्रख्याः प्रख्यातविक्रमास्तव तनयाः सेत्स्यन्ति यैर्वयं सर्वे पूर्वमिव निर्विषादं निवत्स्याम इति ॥ ८३ ॥

पितुराज्ञाश्चेमामुपादाय मुदा परमया केकसी विश्रवसो मुनेराश्रममगमत् पतङ्गमूर्तिश्च पश्चिममुदन्वन्तम् ॥ ८४ ॥

ततो विश्रवसं दीप्तं सप्तार्चिषमिवापरम्।
अग्निहोत्रमुपासीनमासीदत् केकसी मुनिम् ॥ ८५ ॥

अथ चरणनखाग्रैर्मन्दमुर्वीं लिखन्ती-
मवनतवदनाब्जामग्रतस्तिष्ठमानाम्।
विचिततटिदभिख्यां विस्मितो वीक्ष्य बालां
विनयभरविनम्रां विश्रवा वाचमूचे ॥ ८६ ॥

बाले किन्नामासि? कस्य चापत्यम्? कस्य वा हेतोरिहागतासि? इति ॥ ८७ ॥

केकसी प्रत्यब्रवीत् सानन्दमेवं मन्दाक्षमन्दाक्षरेण वचसा महर्षिम् ॥ ८८ ॥

आमनन्ति मम नाम केकसी-
मात्मजाऽहमनघा सुमालिनः।
आगतेरिह फलं स्वतो भवा-
नाशयस्थमवगन्तुमर्हति ॥ ८९ ॥

इति तदुक्तिं श्रुत्वा तत्त्वावलोकनाय क्षणमनुध्याय पुलस्त्यात्मजः पुरस्तादुपस्थितां पुनस्तामेवमवादीत् ॥ ९० ॥

---

८६. अथ चरणेति। तिष्ठमानां स्वाशयं प्रकाशयन्तीम्। ष्ठाधातोः आशयप्रकाशनार्थे "प्रकाशनस्थेयाख्ययोश्च" इत्यात्मनेपदिनो लटश्शानच्॥

८८. केकसीति। मन्दाक्षेण लज्जया मन्दाक्षरेण मृदूच्चरिताक्षरेण।

बाले दारुणकाले त्वमागता मां यतस्सुतप्राप्त्यै ।
तनयास्ततो भवत्यां क्रूराक्षा राक्षसा जनिष्यन्ते ॥ ९१ ॥

एतद्वचनाकर्णनतः खिन्नतरमुखीं मोघीभूतमनोरथामेनां सदयहृदयस्स मुनिरालक्ष्य वैलक्ष्यनिरुद्धवाचमेवमुवाच ॥ ९२ ॥

मा नाम ते मनसि मानिनि साध्वसं भूत्
द्वावेव निर्जितनयौ तनयौ तव स्ताम् ।
पुत्रोऽपरस्त्वयि पुलस्त्यकुलानुकूलः
सर्वाभिनन्द्यचरितः समुदेष्यतीति ॥ ९३ ॥

ततः कतिपयानि वासराणि केकसी तनयोदयमेव प्रतीक्षमाणा तत्रैवाश्रमेऽसाववतस्थे ॥ ९४ ॥

अथ तु,

दशाननं दारुणतैकतान-
विलोचनं विंशतिबाहुमुच्चैः ।
सुमालिपुत्री सुषुवे कुमार-
ममानिशेव स्थिरमन्धकारम् ॥ ९५ ॥

कादम्बिनीवाशनिमद्भुतं सा
क्रूरं बतासूयत कुम्भकर्णम् ।
दुष्टां ततश्शूर्पणखामसूत
दुर्वासनेवापथसम्प्रवृत्तिम् ॥ ९६ ॥

तदनु दिवौकसां तेजोभिस्साकं महोल्कास्सुरपथात् परिपेतुः ॥ ९७ ॥

---

९१. बाल इति । क्रूराक्षाः क्रूरदृशः । जनिष्यन्ते भविष्यन्ति ॥

९३. मा नामेति । साध्वसं भयम् । निर्जितनयौ न्यायाननुसारिणौ ॥

९५. दशाननमिति । अमानिशा अमावास्यारात्रिः ॥

९६. कादम्बिनीति । कादंबिनी मेघमाला । दुर्वासनेति । दुष्कर्माचरणजन्यवासनायाः पुनरपि दुष्पथप्रवृत्तिहेतुत्वात् ॥

प्राणिनां शोणितानि पास्यते दशास्याय प्रथमोपहारप्रतिपादनार्थमिव वारिधरा रुधिरधारामवर्षन् ॥ ९८ ॥

रजसां तमसां च निवासभूतस्य दशग्रीवस्य त्रासादनुवर्तिन इव रजसा धूसराः प्रभञ्जना ववुः ॥ ९९ ॥

तपनश्च तमोऽनुबभूव ॥ १०० ॥

उद्गते पुनरपत्यकत्रये
सा विभीषणमसूत सात्त्विकम् ।
वार्षिके तु कलुषे झरे गते
वाहिनीव विमलं शरत्पयः ॥ १०१ ॥

ततः कदाचन तातचरणस्य विश्रवसस्सेवनाय पुष्पकेणोपयान्तमेयविभवमपरमिव सूर्यं कुबेरमवेक्ष्य तस्मै भृशमसूयन्त्याः केकस्या वचनेन समुत्पादितधनदाधिक्योत्कण्ठो दशकण्ठो भ्रातृभ्यां सहितो गोकर्णं नाम सिद्धाश्रमं प्रविश्य वेधसमुद्दिश्य निष्कासितनिखिलेन्द्रियवृत्तितौपवस्त्यशुष्कवपुरतिदुष्करं तपस्तेपे ॥ १०२ ॥

सहस्रे सहस्रे च संवत्सराणां
स निर्लूय निर्लूय धीरश्शिरांसि ।
नवाब्जोद्भवार्थं दशास्यः कृशाना-
वकम्प्यस्वभावो जुहावोग्रविघ्नैः ॥ १०३ ॥
येनास्येन प्रथममुदितस्स्वावदानाय मन्त्र-
स्तद्भिन्नास्यैस्स पुनरभणत् तस्य होमार्थमन्त्रम् ।
मन्त्रानुक्त्या दशमहवनं पुष्कलं नेति मत्वा
शीर्षं नूनं दशममुना शेषितं रावणेन ॥ १०४ ॥

---

९८. प्राणिनामिति । रुधिरधारावर्षादिकमनिष्टसूचकम् ॥

१०१. उद्गत इति । वर्षाकालिकप्रवाहस्य धूसरत्वात् तदपगमनानन्तरमेव नद्यां यथा निर्मलपयस्संभवः तद्वत् दुष्टापत्यप्रादुर्भावानन्तरं सत्पुत्रोदय इत्युपमा ॥

१०२. तत इति । समुत्पादिता धनदादाधिक्ये उत्कण्ठा यस्य सः । औपवस्त्यं उपवासः ॥

१०३. सहस्र इति । नवायाः अब्जायाः लक्ष्म्याः उद्भवार्थम् । यद्वा नवेति पृथक्पदं शिरांसीत्यत्रान्वेति । अब्जोद्भवः चतुर्मुखः तदर्थम् ॥

१०४. येनेति । स्वस्य अवदानाय होमार्थग्रहणाय दशमस्य

ततश्च तदाश्चर्यतपश्चर्याभिः सुप्रसन्नश्चतुर्वदनस्सदनात्सरस्वत्या सार्धं देवगन्धर्वसिद्धमहर्षिभिश्शुद्धं दशलपनस्य तपोवनमुपासदत्॥१०५॥

शिरोमयानां हविषां नवानां
शेषं दशास्ये त्ववदातुकामे ।
देवो विधिस्सृष्टिकृदाविरासीत्
तस्यावदानोद्यममात्रतुष्टः ॥ १०६ ॥

आचष्ट चैनमखिलस्रष्टा सहासमतिसाहसकं दशास्यमप्येकास्यं चतुरास्यः सदुपास्यः ॥ १०७ ॥

वत्स! तव समस्तमस्तकहविष्कदुष्कराध्वरानुष्ठानमहासाहसिकस्य तपसाऽहं प्रसादितोऽस्मि; वाञ्छितं वरं वृणीष्वेति ॥ १०८ ॥

एवं ब्रुवति भगवति पितामहे, प्रमुदितचित्तः पङ्क्तिवक्त्रः प्रणिपातपूर्वं अलक्ष्यतया मानववानरादीनगणयन् दानवदेवयक्षराक्षससिद्धगन्धर्वसुपर्णाद्यवध्यतामर्थयामास ॥ १०९ ॥

कमलजन्मा सकलमपि तदर्थितं तस्मै प्रदाय, मुदा परमया स्वयमप्रार्थितामपि पावकसात्कृतमस्तकपुनःप्ररोहशक्तिं पौलस्त्याय प्रायच्छत् ॥ ११० ॥

च शीर्षस्य होमार्थं हस्ते ग्रहणे होमार्थमन्त्रोच्चारणाय शीर्षान्तराभावादिति भावः । अत्र उत्प्रेक्षा ॥

१०६. **शिरोमयानामिति** । शेषं दशमं शिर इत्यर्थः । अवदानाय होमार्थग्रहणाय उद्यमः प्रयत्नः ॥

१०८. **वत्सेति** । समस्तानि अखिलानि मस्तकानि हवींषि यस्मिन् तादृशस्य दुष्करस्य अध्वरस्य यागस्य अनुष्ठानेन अवशिष्टस्यापि शीर्षस्य अवदातुमिष्टत्वात् हुतप्रायतया समस्तेत्युपपद्यते ॥

१०९. **एवमिति** । पङ्क्तिवक्त्रः दशास्यः ॥

११०. **कमलजन्मेति** । पावकसात्कृतेति अग्नौ हुतेत्यर्थः ॥

युक्तश्चैतत्—

जनैस्समस्तैस्सममैककण्ठ्यं
सोऽयं न सोढेति धियेव धाता।
यथापुरं यातुवराय मोदा-
दनेककण्ठत्वमदादुदारः ॥ ११२ ॥

बर्हिषि मुदा हुतानां पितामहोक्त्या पुनः प्ररूढानाम्।
पौलस्त्यमस्तकानां नवता संख्यातदात्वजननाभ्याम् ॥ ११३ ॥

अनुभूतशिरश्छिदाविषादः
शिरसां छेत्तरि पद्मजो नवानाम्।
प्रससाद दशानने प्रकामं
श्रमवित्स्वेव हि सार्थकः प्रयासः ॥ ११४ ॥

अथ किल स्वसविधमुपसृत्य प्रीत्या किं तवाभीष्टमिति स्पष्टं स्रष्टरि पृष्टवति सन्तुष्टमनाः शिष्टाग्रणीः तपश्चर्योपनतदेहतानवविभूषणो विभीषणो बद्धाञ्जलिरित्थं भगवन्तमरविन्दजं व्यजिज्ञपत् ॥ ११५ ॥

भूयादजय्यान् षडरीन् विजेतुं
धर्मे मतिर्मे विपदागमेऽपि।
आभातु मे भावुकदं त्वदस्त्रं
चेतो न चेतोऽन्यदपेक्षते मे ॥ ११६ ॥

---

११२. **जनैरिति**। एकः कण्ठे यस्य तस्य भावः ऐककण्ठ्यं साम्यं च

११३. **बर्हिषीति**। संख्या गणना, तदात्वजननं तत्कालोत्पत्तिः ताभ्यां नवता नवसंख्याकत्वं नूतनत्वं च।

११४. शिरसः छिदा छेदनम् तज्जन्यो विषादः अनुभूतः येन। पूर्वं पञ्चशिरसः चतुर्मुखस्य एकं शिरः स्वसाम्यं असहमानेन हरेण छिन्नमिति पौराणिकी कथाऽत्रानुसन्धेया।

११५. **अथ किलेति**। तपश्चर्या तप आचरणं तेन प्राप्तं देहतानवं शरीरकार्श्यं तदेव उत्कृष्टभूषणं यस्य सः। अरविन्दजं ब्रह्माणं व्यजिज्ञपत् विज्ञापयामास।

११६. **भूयादिति**। षडरयः अशनाया पिपासा शोकः मोहः जरा मृत्युश्च। त्वदस्त्रं ब्रह्मास्त्रम्।

इति कृतभाषणं विभीषणं धर्माभिरतं तामरसजन्मा सम्मान्य, तथैव तव मनोरथोऽस्त्विति व्याहृत्य, तदप्रार्थितां देवताद्यवध्यतामपि तस्मै ददाति स्म ॥ ११७ ॥

अर्थी दशास्यावरजो द्वितीयो
दाता च साक्षाज्जगतां विधाता ।
देयो वरो धर्मपरायणत्वं
दैवादिहासीदनुरूपयोगः ॥ ११८ ॥

इति श्लाघामुखरमुखा लेखादयस्ततो निष्क्रम्य, कुम्भकर्णाय वरं प्रदातुं तदभ्यर्णमभ्येतुमारब्धवति भगवति हिरण्यगर्भे, प्रादुर्भूतभीतयः प्रणिपत्य भुवनभरणभस्मीकरणक्षमाय तस्मै वरो न देय इति सर्वे सनिर्बंदमर्थयामासुः ॥ ११९ ॥

स च वाचां देवीं समाहूय गीर्वाणमनोरथानुगुणमेव वरं याचयितुं कुम्भकर्णमुखे निवेश्य "वत्स! किमीप्सितं तवे"ति तमन्वयुङ्क्त ॥ १२० ॥

स्वापायमगणयित्वा स्वापाय सदा स्पृहयमाणाय ।
निद्राभिधानमस्मै निगलं प्रादादनायसं वेधाः ॥ १२१ ॥

न केवलं पङ्क्तिमुखानुजन्मा
निद्रामुपादत्त हिरण्यगर्भात् ।
तदागतित्रासविधूतनिद्रो
जनस्सुखस्वापमवाप सर्वः ॥ १२२ ॥

---

११८. अर्थीति । रावणानुजत्वेऽपि धर्मबुद्धिरद्भुतेति ।

१२१. स्वापायेति । स्वस्य अपायः स्वापायः तम् अगणयित्वा अनालोच्य सदा सर्वकालं स्वापाय निद्रायै स्पृहयमाणाय स्पृहेरीप्सित इति संप्रदानत्वाच्चतुर्थी । अनायसम् अयस इदं आयसम् । तन्न भवतीत्यनायसं निगलम् ।

१२२. न केवलमिति । पङ्क्तिमुखः दशमुखः तदनुजः कुम्भकर्ण इत्यर्थः । तदागतिः तस्य कुम्भकर्णस्य आगमनं तज्जन्यभयापहृतनिद्रः सर्वो जनः सुखनिद्रां प्राप । कुम्भकर्णस्य रात्रिञ्चरत्वात् इतः पूर्वं रात्रौ तदागमनभयात् निद्रारहिता आसन् जनाः । अथ तु निर्भयमस्वपन् इति भावः ।

वितीर्णकुम्भकर्णवरोऽथ स्वयम्भूर्जम्भारातिप्रभृतिभिरनुसेवितस्व-निवेशनमाविवेश, स्वापप्रार्थनाभ्युत्थितो विप्रतीसारश्च कुम्भकर्णहृदयं, पौलस्त्यः कृतकृत्यो भ्रातृभ्यां सह श्लेष्मातकवनम् ॥ १२३ ॥

सुमाली च मारीचमहोदरप्रहस्तादिभिस्तमिस्राचरैस्सह दौहित्रवर-लाभनिशमनशमितभीतिः पातालादुद्गम्य प्रहर्षितः परिष्वजमानः प्राञ्जलिं पङ्क्तिकन्धरमामन्त्र्य, जरामन्थरं वचनमिदमवोचत् ॥१२४॥

"वत्स! भवता तपोबलार्जितोर्जितमहिम्ना वयं सर्वे सनाथा निर्बाधाश्च भूमावभूम ॥ १२५ ॥

रक्षांसि माधवभयेन पलायितानि
यक्षाधिपेन समवेक्ष्य तदा गृहीताम् ।
लङ्कां गृहाण नगरीं रजनीचराणां
शङ्कां विहाय पुनरग्रजहार्दमूलाम्" ॥ १२६ ॥

मातामहनिदेशजाताभिनिवेशेन दशाननेन दूतमुखेनैव लङ्कापुरतो निर्गमितो नरवाहनः प्रीतिसम्मिश्रविश्रवश्शासनतस्सततमधिगतविद्या-धरविलासं कैलासशैलमावासयामास ॥ १२७ ॥

स च निशाचरपतिस्सह सहोदरैर्महोदरादिभिरनुसेवितं सुमालिनं पुरस्कृत्य, लङ्कामुपगम्याशेषैर्नक्तञ्चरैरभिषिक्तः प्रचकाशे ॥ १२८ ॥

---

१२३. **वितीर्णेति**। जम्भारातिः इन्द्रः विप्रतीसारः पश्चात्तापः पौलस्त्यः श्लेष्मातकवनमाविवेशेत्यन्वयः।

१२४. **सुमालीति**। तमिस्राचरैः राक्षसैः दौहित्रस्य वरलाभ-श्रवणशमितभीतिः पंक्तिकंधरं दशग्रीवं आहूय जरया मन्थरं मन्दं वचनम्।

१२६. **रक्षांसीति**। यक्षाधिपेन कुबेरेण अग्रजे ज्येष्ठे यत् हार्दं या प्रीतिः तन्निमित्तां शंकां विहाय। ज्येष्ठगौरवमनादृत्येर्थः।

१२७. **मातामहेति**। नरवाहनः कुबेरः विद्याधराः गन्धर्वाः तद्विलासस्थानमित्यर्थः।

१२८. **स चेति**। निशाचरपतिः राक्षसेश्वरः रावणः प्रचकाशे प्रकाशितवान्।

वितीर्य क्रौर्यनिधये विद्युज्जिह्वाय सोदरीम् ।
मृगयार्थमगाद्वीरः काननं स दशाननः ॥ १२९ ॥
तत्राऽस्मै कुलगौरवाद्दितिसुतो धन्यां स्वकन्यां मयो
मन्दोदर्यभिधामदान्मणिमिव व्यालाय मन्दो विधिः ।
तामादाय तमोमयो मयसुतां ताम्राधरामादरात्
लङ्कामेत्य तया समं दयितया रेमे चिरं रावणः ॥ १३० ॥

तदा तदाज्ञया वैरोचनिदौहित्रीं वज्रज्वालां शैलवसंज्ञगन्धर्वराजनन्दिनीं सदृशीकृतरमां सरमां च कुम्भकर्णविभीषणावुपयेमाते, रेमाते च सुखम् ॥ १३१ ॥

काले गते कतिपये कमलासनस्य
वंशं मलीमसयितुं विमलं दशास्यात् ।
मन्दोदरी सुतमविन्दत मेघनादं
दोषाद्विपर्ययमिव ध्रुवमक्षवृत्तिः॥ १३२ ॥

---

१२९. **वितीर्येति** । विद्युज्जिह्वाय तन्नामकराक्षसाय सोदरीं वितीर्य दत्वा मृगयार्थं काननं वनमगात् ।

१३०. **तत्रेति** । कुलगौरवात् पौलस्त्यवंशगौरवात् दितिसुतः असुरो मयः मन्दोदरीनाम्नीं स्वकन्यां मन्दः मूढः ब्रह्मा व्यालाय सर्पाय मणिं माणिक्यमिव अदात् दत्तवान् । दुष्टजन्तौ सर्पे माणिक्यसंविधानं ब्रह्मकृतं यथाऽनुचितं, तद्वदनुचितदानमिति भावः । तमोमयः तमोगुणप्रचुरः रावणः तया सह चिरं रेम इत्यन्वयः ।

१३१. **तदेति** । तदाज्ञया रावणाज्ञया वज्रज्वालां वज्रवदुग्रकान्तिमित्यर्थः । शैलवाख्यगन्धर्वराजपुत्रीं सदृशीकृतरमां लक्ष्मीसदृशीमित्यर्थः । उपयेमाते परिणीतवन्तौ इत्यर्थः ।

१३२. **काल इति** । कमलासनस्य धातुः विमलं शुद्धं वंशं मलीमसयितुं मलिनीकर्तुं रावणात् मन्दोदरी मेघनादं तन्नामानं पुत्रम् अक्षवृत्तिः इन्द्रियव्यापारः दोषात् इन्द्रियगतपित्तादिदोषात् विपर्ययं पीतः शंख इत्यादिविपरीतज्ञानमिवेत्युपमा । अविन्दत प्राप्तवती ।

आसेवितं निशिचरैर्दशकन्धरोऽसा-
वालोक्य नन्दनमनन्तरमाननन्द ।
सङ्क्रन्दनस्तु निजनन्दनमस्तवेलै-
स्तैरेव सेवितमवेक्ष्य दधौ विषादम् ॥ १३३ ॥
निद्राः कृत्स्ना निशिचरवरोत्पादितापायचिन्ता-
सन्तप्तेऽस्मिन् जगति निखिले स्थानमप्राप्नुवन्त्यः ।
लङ्काद्वीपे निजसहभुवा रक्षितः कुम्भकर्णो
निश्शङ्कं नः पदमिति धिया नित्यमस्मिन्नवात्सुः ॥१३४॥

तदा हि—

लोकाननानि च तथा मुनिकाननानि
शाखाविलोपमनयैरनयद्दशास्यः ।

---

१३३. आसेवितमिति । नन्दनं पुत्रं इन्द्रजितमालोक्य आननन्द सन्तुष्टः । संक्रन्दनः इन्द्रस्तु निजनन्दनं वनं अस्तवेलैः अच्छिन्नमर्यादैः तैरेव निशिचरैः सेवितमवेक्ष्य विषादं दुःखं दधौ दधार । निशाचरसेवितनन्दनालोकनमेव एकस्य रावणस्य हर्षकारणमभूत् । तदेव अन्यस्य इन्द्रस्य विषादकारणमिति विस्मयः । नन्दनशब्दश्लेषमूलाभेदाध्यवसायहेतुकः ।

१३४. निद्रा इति । निशिचरवरेण रावणेन उत्पादितः अपायः अनर्थः तच्चिन्तया सन्तप्ते जगति, स्थानं अवकाशं अलब्धवत्यः । कदा वा रावणोऽस्मान् हिंस्यात् इति भिया सर्वदा निद्रारहिताः प्राणिन इत्यर्थः । निजसहभुवा स्वसोदरेण रावणेन रक्षितः कुंभकर्णः नः अस्माकं निश्शंकं पदं निर्भयतया वासयोग्य इति बुद्धया अवात्सुः अवसन् । लंकाद्वीप इत्युक्त्या इतरदुष्प्रवेशत्वं रक्षित इत्यनेन निर्बाधत्वं च गम्यते । तेन निर्भयावस्थानबुद्धिः जगति विद्यमानसर्वनिद्रा अपि कुंभकर्णसंक्रान्ताः पूर्वोक्तकारणेनेति हेतूत्प्रेक्षा । तावती महती निद्रेति भावः ।

१३५. लोकेति । लोकानां जनानां आननानि आस्यानि शाखानां वेदशाखानां, मुनीनां आवासकाननानि वनानि शाखानां विटपानां च, विलोपमनयत् वेदाध्ययनादिविरोधं आश्रमदूषणं च कृतवानित्यर्थः । शस्त्राणि आयुधानि,

शस्त्रौघशंसनकथां वसुधापतीनां
ऋत्विक्षु वन्दिषु च हन्त निराचकार ॥ १३५ ॥

इत्थं वृद्धश्रवःप्रभृतीन् गीर्वाणानपि तृणीकृत्य स्वच्छन्दं तत इत स्सञ्चरति नक्तञ्चरततिभिस्सह मानवयक्षदानवतपोधनकदलीवनगन्धसिन्धुरे दशकन्धरे, श्रुत्यन्ताधिगमो धनुर्गुणेषु, दानप्रसङ्गस्सङ्ग्रामेषु, सहोमता चन्द्रमौलौ, सात्त्विकाभ्युदयस्सुरतेषु, सफलत्वं शिलीमुखेषु, सोमग्रहो राहौ, सुराग्रहो राक्षसान्तःपुरेषु, पशुबन्धो गोष्ठेषु, प्रस्तरधारणमुत्तमर्णेषु, समित्सङ्ग्रहणं कोणपेषु, बर्हिराहरणं हरिणेषु, अरण्याकलनं व्याघ्रेषु, इष्टकोपधानं नायिकाप्रणयकलहेषु, अहीनप्रक्रिया रसातले, स्वाहारावधारणं निर्वृत्तपाकेषु, पौण्डरीकवितानं कासरेषु, पुण्यजनपूजनं लङ्कायां, गुरुचरणाभिगमनं कलभेषु, जपाभ्युदयः काननेषु, जनार्दनपरिचरणं महाह्रदेषु, सुमनस्सङ्गतिस्सुन्दरीचिकुरेषु, सारस्वतपरिचयस्तरङ्गिणीषु, योगाचारोपलालनं वेदबाह्येषु, महातपस्स्फुरणं मध्याह्नेषु, न तु प्रजास्वासीत् ॥ १३६ ॥

यज्ञेस्तवविशेषाश्च तेषामोघस्समूहः । तस्य शंसनस्य स्तुतेः । कथां प्रस्तावं ऋत्विक्षु वन्दिषु च निराकृतवानित्यर्थः ।

१३६. **इत्थमिति** । वृद्धश्रवाः इन्द्रः, मानवाद्या एव कदल्यः तद्वनस्य गन्धसिन्धुरे मत्तगजे । श्रुतेः श्रोत्रस्य वेदस्य च अन्ते समीपे अन्यत्र अन्तस्य अधिगमः प्राप्तिः ग्रहणं च । धनुषः गुणः ज्या, दानस्य मदजलस्य वितरणस्य च । सहोमता होमविशिष्टत्वं उमया सहितत्वं च चन्द्रमौलौ शिवे । सात्त्विकस्य तदाख्यस्य भावस्य सात्त्विकानां सत्त्वप्रकृतीनां च सफलत्वं "फलं बाणाग्रलाभयोः" इति निघण्टुः । सोमग्रहः सोमपात्रविशेषः चन्द्रग्रहणं च । राजसूयांगसुराग्रहः मद्यपानं च । पशुबन्धः तत्संज्ञकयागः । पशूनां गवादीनां बन्धश्च । प्रस्तरधारणं सोमाभिषवार्थं पाषाणग्रहणम् । अन्यत्र अधमर्णात् ऋणनिर्हरणार्थं उत्तमर्णेन कार्यमाणं च । समित् युद्धं पलाशादिसमिच्च । अरण्याकलनं अग्न्युत्पत्तये अरणिनिर्मथनम् अन्यत्र अरण्ये कानने आकलनं संचरणं । इष्टकोपधानं इष्टकानामुपधानं चयनांगम् । अन्यत्र इष्टभर्तरि कोपधारणम् । यद्वा

दुस्सहं चैवंविधं श्रुत्वा दुश्चेष्टितं सौभ्रात्रप्रदर्शनाय वैश्रवणेन दूतमुखेन वाचितं 'नैतादृशं कृत्यं कुलानुगुणमस्माकम्, तस्मान्मा कार्षीरि'ति सन्देशमाकर्ण्य परिकुपितः पिशितभुजां राजा हरसख्यहरित्पालकत्वाभ्यां दृप्तोऽयमखिलानप्यस्मान् परित्रासयति, ततो दिक्पालानखिलानप्यमुष्य मनुष्यधर्मण एकस्यैव कृते दमयिष्यामीति प्रतिज्ञाय पूर्वजन्मानमेनं पौलस्त्यमस्तङ्गमयितुमुदित्वरास्थः पङ्क्तिमस्तकः प्रतस्थे सह महोदरप्रहस्तादिभिस्तमिस्राचरैः ॥ १३७ ॥

इष्टकैव उपधानं शयनोपयोगि न तु सुकुमारोपधानमिति । अहीनप्रक्रिया अहीनाख्यसत्रप्रकारः, अहीनां सर्पाणामिनस्य श्रेष्ठस्य प्रक्रिया पालनपरिपाटी स्वाहाराव: स्वाहेत्याराव: तस्य धारणं होमकाले उच्चारणम् । अन्यत्र स्वस्य आहारस्य अभ्यवहारस्य अवधारणं निश्चय: निर्वृत्तपाकेषु निष्पन्नपाकेषु वस्तुषु । पौण्डरीकसंज्ञकक्रतोस्संबन्धि वितानं क्रम: । अन्यत्र पौण्डरीकाणां व्याघ्राणां वितानं समूह: । पुण्यजनानां साधुजनानां राक्षसानां च । गुरुचरणाभिगमनं गुरुपादाभिवादनं, अन्यत्र गुरुचरणै: अभिगमनं अभितस्संचार: । जपाया: कुसुमविशेषस्य जपस्य च । जनार्दनस्य श्रीहरे: परिचरणं पूजा, अन्यत्र जनार्दनस्य नक्रस्य परितश्चरणं संचार: । सुमनसां पुष्पाणां विदुषां च संगतिस्संबन्ध: । सरस्वत्या अयं सरस्वत: समुद्रस्य अयमिति च सारस्वत: । स परिचय: तरङ्गिणीषु, समुद्रे तरङ्गिणीनां नदीनां संगमादित्यर्थ: । योग: चित्तवृत्तिनिरोधात्मक: तस्य आचार: अनुष्ठानम् । तदुपलालनं श्लाघनम् । योगाचारस्य बौद्धमतविशेषस्य उपलालनं च, वेदबाह्येष्विति । बौद्धमतस्य वेदबाह्यत्वादिति भाव: । महातपस्य महत आतपस्य, अन्यत्र महातपसश्च स्फुरणं प्रकाश: । पूर्वोक्तं सर्वं पूर्वनिर्दिष्टेष्वेवासीत् । न तु प्रजासु । रावणप्रतिरोधादिति भाव: ।

१३७. **दुस्सहमिति** । सौभ्रात्रं भ्रातृस्नेह: तत्प्रदर्शनाय हितोपदेशस्य सुभ्रातृलक्षणत्वात् । एतादृशं पूर्वोक्तं सर्वं अस्मत्कुलानुगुणं नेत्यर्थ: । पिशितभुजां मांसभुजां राजा रावण: । कुबेरस्य कैलासवासिपरमेश्वरेण सख्यात् उत्तरदिक्पालकत्वाच्च । परित्रासयति भीषयति । मनुष्यधर्मण: नरवाहनस्य एकस्य कृते । उदित्वरास्थ: उद्भूतास्थ: पंक्तिमस्तक: दशवदन: । तमिस्राचरै: नक्तंचरै: ।

गत्वा कैलासशैलं स बहुनिशिचरैर्माणिभद्रादियक्षान्
हत्वा वित्तेशदत्तां प्रतिहतिमनघां मूर्ध्नि धृत्वा भ्रमित्वा ।
संज्ञां लब्ध्वाऽथ जित्वा रणभुवि धनदं पुष्पकं निष्पकम्पो
हृत्वा कृत्वा च गर्जामतनुत विबुधानातुरान् यातुराजः ॥ १३८ ॥

अथ पुष्पकमधिरूढो बलावलेपमूढो दशकण्ठः शरवणमतीत्य गच्छन्निच्छानुगुणगतेः विमानराजस्य तत्र प्रतिघातं निर्वर्ण्य किमिदमित्यचिन्तयत् ॥ १३९ ॥

तत्रान्तरे—

तं दीप्तमिन्दीवरबन्धुमौलेः
सन्दीव्यतो धाम्नि यशोभिनन्दी ।
मन्दीकृतारिं जगदार्तिवल्ल्याः
कन्दीभवन्तं निरुरोध नन्दी ॥ १४० ॥

तं च पञ्चशरहरचरणसरसिजशिलीमुखं वलीमुखमुखं निशाम्य निशाचरपतिः परिजहास ॥ १४१ ॥

---

१३८. **गत्वेति** । वित्तेशदत्तां कुबेरदत्तां अनघां निर्दोषां प्रतिहतिं प्रतिप्रहारं भ्रमित्वा भ्रमं प्राप्य पश्चात् संज्ञां सम्यक् ज्ञानं लब्ध्वा गर्जां गर्जनां कृत्वा बुधान् देवान् आतुरान् विह्वलान् अतनुत चकार । तद्गर्जनश्रवणेन देवा भीताः अभूवन्नित्यर्थः ।

१३९. **अथेति** । इच्छानुगुणगतेः स्वच्छन्दगमनस्य विमानराजस्य पुष्पकस्य प्रतिघातं गमनप्रतिरोधम् ।

१४०. **तमिति** । इन्दीवरबन्धुश्चन्द्रः तन्मौलेश्शिवस्येत्यर्थः । सन्दीव्यतः क्रीडतः यशोभिरभिनन्दी रुद्रभक्तत्वात् । मन्दीकृतारिः जितशत्रुः । जगदार्तिरेव वल्ली लता तस्याः कन्दीभवन्तं मूलभूतं तं रावणं नन्दी निरुरोध निरुद्धवान् ।

१४१. **तं चेति** । पञ्चशरः मन्मथः तन्नाशकस्य शिवस्य पादपद्मभृंगायमाणं वलीमुखः वानरः तस्येव मुखं यस्य तं नन्दिनं विलोक्य परिहासं कृतवान् रावणः ।

सोऽपि पापीयांसमेनं रुषा कषायिताभ्यां दृग्भ्यामापीय मन्मुखैरेव शाखामृगैस्तव परिभवो भवत्विति शापं प्रापय्य निष्क्रान्तः। अथ प्रमथपतिसन्निधानादवलिप्तस्य शैलस्यास्य दौर्जन्यकृतोऽयं विमान-गतिप्रतिबन्ध इति निध्याय बद्धाग्रहस्तमेव महादेवक्रीडागिरिमुत्पाट-यितुमना विंशतिं भुजानपि तस्याधस्तादवस्थाप्य पौलस्त्यो लोकहृदयै-स्साकमेव तमचलमपि निरनुकम्पः कम्पयामास ॥ १४२ ॥

तदा पुनः—

संभ्रान्तोत्थितसिंहडिम्भकलनासंक्रन्दिदन्तिच्छटा-
शुण्डादण्डविखण्डितद्रुमगणप्रोड्डीयमानाण्डजम् ।
बिभ्यद्बर्हिणवाहनच्युतगुहं भीतिप्रकर्षोच्छ्वस-
द्भूषाकुण्डलिमण्डलः पशुपतिर्भूभ्रं तमालोकयत् ॥ १४३ ॥

व्यालोलत्र्यक्षचूडाविलुठदुरुजटाजूटनिर्घातवेग-
च्योतच्चन्द्रामृतौघद्विगुणसुरधुनीबिन्दुसन्दोहसिक्ताः ।
दृप्यत्पौलस्त्यबाहूद्धृतगिरिचलनत्रस्तगौरीश्रमाम्भ-
श्छेदायासन् गजास्यश्रुतिचलनदशासंभवाडिम्भवाताः ॥१४४॥

---

१४२. **सोऽपीति**। सोऽपि नन्द्यपि, मन्मुखैः मादृशैः, शाखामृगैः वानरैः, प्रापय्य दत्त्वा, निष्क्रान्तः गतः। अथेति प्रमथपतिः रुद्रः, अवलिप्तस्य दृप्तस्य शैलस्य कैलासस्य, निध्याय आलोच्य, तस्य कैलासस्य अधस्तात् अधः प्रदेशे, पौलस्त्यो रावणः, लोकहृदयैस्साकमिति लोकानां हृदयानि च कम्पयामास, अचलकम्पनसमय इत्यर्थः।

१४३. **संभ्रान्तेति**। अकाले कम्पनात्, संभ्रान्तोत्थिताः सिंहशाबकाः इत्यर्थः। बिभ्यतो मयूरवाहनात् च्युतः गुहः कुमारः यस्मिन्, तं भूभ्रं भूधरं कैलासं आलोकयत्।

१४४. **व्यालोलदिति**। व्यालोलन् विशेषेण चलन् त्र्यक्षः तस्य चूडायां शिरसि विलुण्ठन् परिभ्रमन्, यो जटासमूहः तस्य निर्घातः संघर्षः तेन यो वेगः, तेन स्रवन् शिरःस्थचन्द्रामृतौघः तेन द्विगुणः यः सुरधुन्या गंगायाः बिन्दुसन्दोहः तेन सिक्ताः। गिरिवरस्य कैलासस्य चलनेन त्रस्तायाः पार्वत्याः

पर्वते दशमुखेन कम्पिते पर्वतारिरपि कम्पमानशे ।
पार्वती तु भयविह्वला स्वयं प्राप कम्पमिति कोऽत्र विस्मयः ॥१४५॥

सरसचटुवचश्शतैकलभ्यं
सरभसमद्रिभुवश्शशाङ्कमौलिः ।
अशिथिलपरिरम्भसम्भवं द्रा-
गनुभवति स्म सुखं तदप्रयत्नात् ॥ १४६ ॥

निशिचरवरबाहानिर्मितस्थानकम्प-
प्रचलितनिजगात्रभ्रष्टभस्माऽपि शम्भुः ।
अचलदुहितृगाढाश्लेषसम्मर्दजातै-
रजनि निबिडभूतिर्हारमुक्तारजोभिः ॥ १४७ ॥

अनन्तरमिन्दुमौलिः कन्दलितमन्दहासस्सलीलं चलतश्शैलस्योपरि चरणाङ्गुष्ठं न्यधत्त ॥ १४८ ॥

सन्दष्टबाहुस्स तु चन्द्रमौळे-
रङ्गुष्ठविद्धेन महीधरेण ।
चक्रन्द संक्रन्दनशत्रुरुच्चै-
र्ग्राहावलीढाङ्घ्रिरिव द्विपेन्द्रः ॥ १४९ ॥

श्रमाम्भोपनोदनाय, गजाननस्य श्रोत्रचलनसम्भवा डिम्भवाताः मन्दमारुताः आसन् ।

१४५. पर्वत इति । पर्वतारिः इन्द्रः, कम्पं प्राप्तवान्, पर्वतपुत्री भयविह्वला सती कम्पं प्राप । अत्र किमाश्चर्यमिति । पर्वतकम्पनेन पर्वतप्रतिपक्षस्य इन्द्रस्य कम्पस्य न प्रसवितः । अथापि स कम्पमाप चेत्, पर्वतानुबन्धिनां कम्पोदयस्सहजः इति नात्र विस्मयः । रुद्रावासकैलासमपि चालितवान् रावणः, तथा सति वराका वयं कियन्तस्तस्येति इन्द्रश्चकम्पे । पार्वती, त्रासात् चकम्पे इत्यर्थः ।

१४६. सरसेति । सरसानां चाटूक्तीना शतेनैव लभ्यं प्राप्तुं शक्यं, अस्थाने परिरम्भाऽसम्मतेरिति भावः । अद्रिभुवः अद्रिकन्यायाः आश्लेषसौख्यं तदा अप्रयत्नादेव लेभे चन्द्रमौलिरित्यर्थः ।

तदानीन्तु,

निस्सीमामृतसागरोदरतटीनिद्राणनारायण-
क्षिप्रोद्बोधनकारणैरहिवधूगीतोत्सवोत्सारणैः ।
विश्वस्रष्टृमुखोपदिष्टनिगमानाकर्णनव्याकुल-
प्रौढर्षिप्रवरैर्व्यधायि ककुभां चक्रं तदाक्रन्दितैः ॥ १५० ॥

किञ्च,

प्रागेकस्मिन् स दशवदनः पर्वतग्रस्तहस्तः
क्रन्दं क्रन्दं विरमति गले क्रन्दति स्मापरेण ।
हा हन्तैवं विरतिरहिते हायनानां सहस्रं
तस्याक्रन्दे विसरति सुरैस्तत्रसे तत्र सेन्द्रैः ॥ १५१ ॥

तदनु गिरीशप्रसादेनैव गिरिदंशयातनामुक्तिर्भवेदिति सचिव-वचनं सम्मानयता दशकण्ठेन सोत्कण्ठं विचित्रैः स्तोत्रैः प्रसादितः कृत्तिवासाः सविनयमञ्जलिप्रदाय तस्मै दीर्घमायुः प्रदाय समन्दहासं चन्द्रहासनामानमपहृतरिपुजनमानप्राणं कृपाणमपि प्रत्यपादयत् ॥१५२॥

---

१५०. **निस्सीमेति** । अमृतसागरः क्षीरसमुद्रः, अहिवधूनां पाताललवासिनीनां, गीतहर्षनिवारणैः, अनेन पातालपर्यन्तगामित्वमुच्यते । विश्वस्रष्टा चतुर्मुखः, तदुपदिष्टवेदानाकर्णनं रावणाक्रन्दितप्रतिबद्धत्वात् । अनेन सत्यलोकपर्यन्तगामित्वमुच्यते । सर्वदिक्षु तदाक्रन्दितं व्याप्तमित्यर्थः ।

१५१. **प्रागिति** । पर्वतपीडितविंशतिकरस्स दशवदनः रोदितु-मारब्धः एकगलेन क्रन्दनं कृत्वा । क्रन्दं क्रन्दमिति णमुल् प्रत्ययान्तमव्ययम् । क्रन्दित्वा क्रन्दित्वेत्यर्थः । तद्गले विरमति सति अन्येन कण्ठेन क्रन्दति स्म । एवं पर्यायेण दशकण्ठैः कृतं रोदनं सहस्रवर्षपर्यन्तमनुवृत्तम् । तद् दृष्ट्वा सेन्द्रा देवाः त्रासं प्रापुः । पश्चात् को वा अनर्थो भवेदिति ।

१५२. **तदन्विति** । गिरिदंशयातना गिरिपीडानिमित्ततीव्रवेदना, तस्या मुक्तिः निवृत्तिः, सचिववचनं हितैषिमन्त्रवचनं, सोत्कण्ठं सभक्ति, प्रसादितः प्रसन्नीकृतः, कृत्तिवासाः गजचर्मवसनः रुद्रः, अञ्जलिप्रदाय अञ्जलिं प्रददातीत्यञ्जलिप्रदः तस्मै, दीर्घमायुः प्रदाय दत्त्वा, अपहृता-

स्वाक्रन्दनेन जगन्ति रावयितुरेतस्य 'रावण' इति नाम विदधे प्रमथेशः ॥ १५३ ॥

लब्ध्वा वरं तत्र हरात्प्रसन्नात्
लङ्केश्वरस्सम्मुदितान्तरात्मा ।
विमानमारुह्य स माननीयं
क्रमात् क्षमामेव समाजगाम ॥ १५४ ॥

समया स महिमवन्तं हिमवन्तं दशमुखस्तपस्यन्तीम् ।
कामपिशाचाविष्टः कामपि कन्यामलोकयद्धन्याम् ॥ १५५ ॥

तदनु कुलं तपश्चरणफलं च पृष्टवते दुष्टाय दशवक्त्राय तपस्विनी निर्विकारहृदया निवेदयामास निजोदन्तम् ॥ १५६ ॥

"मत्पिता किल कुशध्वजो नाम महर्षिर्वेदाभ्यासधन्यान्मां निजमुखादवतीर्णां वेदवतीति नाम विधाय, वेदान्तभावविश्रान्तिभूमये

रिपुजनानां शत्रुजनानां मानप्राणाः येन, तादृशं कृपाणं खड्गमपि, प्रत्यपादयत् ददौ ।

१५३. **स्वेति** । स्वाक्रन्दनेन स्वस्य भैरवरवेण, जगन्ति भुवनानि, रावयितुः शब्दायमानानि कुर्वतः, रावणः इति रावयति जगन्तीति रावण इत्यन्वर्थनाम ।

१५५. **समयेति** । सः महिमवन्तं महत्त्वशालिनं हिमवन्तं समयेत्यन्वयः । "अभितः परितः समये"ति द्वितीया । हिमवतस्समीप इत्यर्थः । तपस्यन्तीं तपः कुर्वतीं, कामपिशाचाविष्टः कामः मन्मथः, स एव पिशाचः, तेनाविष्टः । तीव्रकाम इत्यर्थः । कामपि अनिर्वचनीयां धन्यामुत्कृष्टां कन्यामलोकयत् अपश्यत् ।

१५६. **तदन्विति** । स्वकुलं स्वतपश्चरणफलं च पृष्टवते रावणाय निर्विकारहृदया अकपटहृदया तस्मिन् मनोभावादिरहिता वा निजोदन्तं स्ववृत्तान्तं सा व्यजिज्ञपत् ।

१५७. **मत्पितेति** । कुशध्वजो नाम महर्षिः अनवरतवेदोच्चारणपूतात् स्ववदनात् मामुत्पाद्य, तत एव वेदवतीति नाम कृत्वा वेदान्तानां उपनिषदां

वासुदेवाय विश्राणयतुकामो देवपूर्वदेवयक्षराक्षसैर्वेदविद्भिरर्थितामपि न तेभ्यो दातुमियेष ॥ १५७ ॥

ततः प्रार्थितालाभकुपितेन शम्भुनाम्ना दैत्यराजेन व्यापादिते मम पितरि, मातरि च तेनैव सह दहनं प्रविष्टायां, पितृचरणमनोरथानुगुण्येन परमपुरुषमेव प्रेप्सन्ती हिमवदुपकण्ठवन्यामस्यां तपस्यामि" इति ॥ १५८ ॥

एतन्निशम्याप्यनार्यामेव मतिं विदधानो यातुधानपतिः इदमवदत् ॥ १५९ ॥

मुग्धे तव मनसिजवयस्ये वयस्येतस्मिन् वयःपरिणामोचितामेतां तपश्चर्यां मर्यादातिवर्तिनीं मन्ये ॥ १६० ॥

तथा हि —

हारार्हे तुलसीसरो न हि गले योग्यो न चाटूचिते
वक्त्रे मन्त्रजपो न वल्कलधृतिः क्षौमक्षमे मध्यमे ।

भावः तात्पर्यम्, तद्विश्रान्तिभूमये तत्पर्यवसानस्थानाय, "सर्वे वेदा यत्रैकं भवन्ति", "सर्वे वेदा यत्पदमामनन्ति", वेदैश्च सर्वैरहमेव वेद्यः", इत्यादि प्रमाणानुसारात् । विश्राणयतुकामः दातुकामः, देवाः सुराः, पूर्वदेवाः असुराः, वेदविद्भिरिति, वेदवत्या आनुरूप्यं व्यञ्जयितुमित्थमुक्तम् ।

१५८. **तत इति** । शम्भुनामा असुरश्रेष्ठः मह्यं कन्यां देहीति मत्पितरं प्रार्थयामास । स तु नाङ्गीचकार । तेन कुपितः । व्यापादिते हते इत्यर्थः । तेनैव सह मत्पित्रा सहैव, पितृचरणाः तातपादाः, पादशब्दः पूज्यवाची । पितृचरणेति-स्वपित्रभिप्रायानुसारेण । परमपुरुषं वासुदेवमेव, प्रेप्सन्ती प्राप्तुमिच्छन्ती, हिमवत्पार्श्ववनेऽस्मिन् तपश्चरामि ।

१५९. **एतदिति** । अनार्यां दुष्टां, मतिं बुद्धिं, विदधानः कुर्वन् राक्षसराजः ।

१६०. **मुग्धे इति** । मनसिजः मन्मथः तस्य वयस्यः सखा तस्मिन्, कामानुभवयोग्य इत्यर्थः । एतस्मिन् परिणययोग्ये वयसि, वयःपरिणामः वार्धकं, तदुचितां तदासेवितुमर्हां, मर्यादातिवर्तिनीं न्यायादपेतामित्यर्थः ।

१६१. **हारार्ह इति** । हारार्हे मुक्ताहाराद्यलङ्कारक्षमे कण्ठे तुलसीमाला न हि योग्या । नर्मोक्त्युचिते वक्त्रे मन्त्रजपश्च नोचितः । क्षौमधारण-

नार्हा ते चिकुरे जटाविरचना वेणीविधानोचिते
किं न्याय्या हृदये च दैवतरतिः कान्तानुरागोचिते ॥ १६१ ॥

किञ्च,

हा कष्टमम्बुरुहभूरमितैः प्रयत्नैः
सृष्ट्वा क्षिपन् तपसि ते रमणीयमङ्गम् ।
सम्पाद्य रत्नमतुलं महता श्रमेण
पङ्कान्तरे विदधतः पदवीमुपैति ॥ १६२ ॥

एवमुक्त्वाऽधिकदर्पे कन्दर्पेण समाविष्टे तस्मिन्नस्याः केशान् प्रसभमभिगृह्णति ॥ १६३ ॥

अथ सा तरसा तपःप्रभावात्
करवालीभवता करेण साध्वी ।
कुपिता निजकुन्तलान् दशास्य-
प्रसभाकर्षणदूषितानकृन्तत् ॥ १६४ ॥

योग्ये मध्यमे मध्यदेशे, वल्कलधारणमनुचितम् । ते तव, चिकुरे केशे, जटाकरणमयुक्तम् । कान्ते भर्तरि, अनुरागस्य उचिते हृदये मनसि, दैवतरतिः देवतानुरागः तद्भक्तिरित्यर्थः अनुचितः । तपश्चर्याप्रवृत्तानामेतेषामवश्यम्भावादिति भावः ।

१६२. **हा कष्टमिति** । अम्बुरुहभूः पद्मभूर्ब्रह्मा, अमितैः बहुभिः प्रयत्नैः, तवाङ्गं सृष्ट्वा, तावद्रमणीयमङ्गमिति भावः । "त्वां सृष्ट्वोपरतो मन्ये रूपकर्ता स विश्वसृक्" इतिवत् । तपसि क्षिप्त्वेति । तपःप्रवृत्तेर्विध्यधीनत्वादिति भावः । पङ्कान्तरे पङ्कमध्ये, निक्षिप्तवतः, पदवीं मार्गं प्राप्नोति । विहारयोग्यशरीरस्य तपःकर्शनमतीवानुचितमित्यर्थः ।

१६३. **एवमिति** । अधिको दर्पो यस्य तस्मिन् प्रसभं हठात्, अभिगृह्णति गृहीतवति रावणे ।

१६४. **अथेति** । सा वेदवती, तरसा बलेन, शीघ्रं वा, करवालीभवता लवनसाधनमायुधं करवालम् । तद्भूतेन करेण कुन्तलान् केशान्, अकृन्तत् चिच्छेद ।

तपोनिधेरलं केशच्छेदस्तस्यास्तदोदितः ।
भाविनं हन्त लङ्केशच्छेदं परमसूचयत् ॥ १६५ ॥

सा पुनस्सागरकन्यावतारतया विश्रुता कृष्णवर्त्मावगाहनमेव कर्तुकामा भगवती निर्वेदवती वेदवती 'स्वयमहं पुनरपि भूमावुत्पद्यापि तव विपत्तौ निमित्तं भविष्यामी'ति कृशतनुरशपदशमुखम् ॥ १६६ ॥

दोषाकरे तु तस्मिन्नुज्जृम्भति साधुचक्रतोषहरे ।
पद्मप्रिया कृशानौ भास्वन्मूर्तिर्विवेश वेदवती ॥ १६७ ॥

एवं पावकमद्भुतं कृतयुगे येयं प्रविष्टा पुरा
त्रेतायामधियज्ञमेदिनि पुनर्जाता हि सीतात्मना ।
सैषा राघव विश्वसाध्वसपरीहाराय नारायणं
त्वामाश्रित्य रमा बभूव परमातङ्काय लङ्कापतेः ॥ १६८ ॥

---

१६५. **तपोनिधेरिति** । तपोनिधेः तपस्विन्याः वेदवत्याः, तदात्वे उत्पन्नः केशच्छेदः अलं पर्याप्तं, भाविनं लङ्केशस्य रावणस्य छेदं नाशं, परं भृशमसूचयत् । कामिनीकेशपरामर्शः भाव्यनिष्टहेतुरित्यर्थः ।

१६६. **सेति** । सा वेदवती, लक्ष्म्यवतारतया प्रसिद्धा । कृष्णवर्त्मावगाहनं अग्निप्रवेशं रावणहस्तस्पर्शदोषापनोदनाय । निर्वेदवती विषादयुक्ता सती ।

१६७. **दोषेति** । दोषाकरे दोषाणामाकरे, उत्पत्तिस्थाने, चन्द्रे च । तस्मिन् रावणे, साधूनां चक्रस्य मण्डलस्य तोषहरे सन्तोषनाशके, अन्यत्र साधु सम्यक्, चक्रवाकपक्षिसन्तोषहारिणि च । पद्मप्रिया लक्ष्मीः, तत्स्वरूपा पद्मानां प्रिया च वेदवती छन्दोमयी च । भास्वन्ती मूर्तिर्यस्यास्तादृशी । भास्वतस्सूर्यस्य मूर्तिः । रात्रौ सूर्यप्रभाया वह्निप्रवेशश्शास्त्रसिद्धः ।

१६८. **एवमिति** । कृतयुगे वेदवतीरूपा लक्ष्मीः पूर्वोक्तप्रकारेण अग्निं प्रविष्टा अद्य त्रेतायुगे जनकस्य यज्ञभूमौ सीतारूपिणी जाता । सैषा हे राघव ! विश्वेषां भयापनोदनाय त्वामाश्रित्य लङ्कापतेः परमातङ्काय बभूवेत्यन्वयः ।

ततो द्रुततरगत्या गत्वा तार्क्ष्येण समानं विमानमधिरुह्य तरसा तरसाशननाथस्तत्रागच्छत्, यत्र खलु मरुत्तो नृपतिर्मरुत्तोषणाय महर्षिभिस्सह पवित्रं सत्रमारभत ॥ १६९ ॥

वित्रस्ताध्वर्युहस्तच्युतचमसमुखस्कन्ननिश्शेषसोमां
कातर्योत्सृष्टपात्रस्खलनविनिपतत्कान्दिशीकद्विजेन्द्राम् ।
ऋत्विक्कण्ठार्धकुण्ठीभवदनुवचनां गद्गदोद्गातृगानां
अद्राक्षीद्राक्षसार्तां निजयजनमहीमप्रमत्तो मरुत्तः ॥ १७० ॥

तत्र किल देवानामप्रिये सकलजगदातङ्करे लङ्केश्वरेऽकस्मादुपस्थिते ॥ १७१ ॥

त्रस्यन् दशास्यात्किल तत्र सत्रे
मयूररूपं मघवानवाप ।
कालोऽपि काकोऽभवदप्प्रभुस्तु
हंसो धनेशः कुकलासवेषः ॥ १७२ ॥

---

१६९. **तत इति**—तार्क्ष्येण गरुत्मता, समानं सदृशं, विमानं पुष्पकमधिरुह्य, तरसा वेगेन, तरसाशनानां राक्षसानां नाथो रावणस्तत्रागच्छत् । मरुतां देवानां तोषणाय मरुत्तनामा राजा यत्र सत्रमारभते तत्रागच्छदित्यन्वयः ।

१७०. **वित्रस्तेति** । रावणागमनेन भीता ये अध्वर्यवः तेषां हस्तात् च्युतानि चमसादिपात्राणि । ततः द्रुतः सोमरसो यस्यां तां । कातर्येण भयेन त्यक्तपात्रस्खलनेन, विनिपतन्तः इतस्ततस्सञ्चरन्तः द्विजेन्द्राः ब्राह्मणश्रेष्ठाः यस्यां ताम् । तत एव ऋत्विजां कण्ठार्धे अर्धकण्ठे कुण्ठीभवन्ति, अनुवचनानि यस्यां ताम् । गद्गदस्वरयुक्तानि उद्गातृगानानि यस्यां ताम् । तादृग्भूतां स्वयज्ञवेदिं मरुत्तः अद्राक्षीदित्यन्वयः ।

१७२. **त्रस्यन्निति** । दशास्यात् भीतः इन्द्रः तत्र सत्रे निजरूपं विहाय मयूररूपं दधार । कालः यमः काकरूप्यभवत् । एवमेव अप्प्रभुः अपां पतिः वरुणः, हंसो बभूव । कुबेरः कुकलासवेषोऽभवत् ।

ततः क्रतुभुवि प्रविशन्तमाचान्तपलाशकुलमालोक्य बलोत्तरो मरुत्तो राजा सम्ग्रहाराय सशरं चापमादाय निर्गच्छन्नधिमार्गमात्म-गुरुणापि गुरुसोदरेण प्रारब्धसत्रापरिसमाप्तौ प्रत्यवायं प्रदर्शयता संवर्तेन मुनिना प्रतिनिवर्तितो यथास्थानमुपाविशत् ॥ १७३ ॥

रावणोऽपि रणोद्यमात् निवृत्ते मरुत्ते 'जितोऽयं मया' इत्युद्घुष्य निष्क्रान्तः ॥ १७४ ॥

मरुत्तसत्रं प्राप्ता मरुत्वत्समवर्तिवरुणवैश्रवणप्रभृतयः सुरा अपि स्वं स्वं रूपमादाय, कृतज्ञतया कलापिकाकमराळकुकलासेभ्यो विचित्रनेत्रवर्ण-चिरजीवित्व-चन्द्रमण्डलसदृशपाण्डरिम-काञ्चनसावर्ण्यादीन् वरान् प्रदाय यथागतं गतवन्तः ॥ १७५ ॥

पङ्क्तिवक्त्रस्तु तत्र तत्र विमानेन सञ्चरमाणः स्वरणवितरण-प्रवीणताविधुरान् पुरूरवःप्रभृतीन् राज्ञः 'पराजिता' इति परिभवोक्तिं वाचयित्वा साकेतनगरमास्कन्दत् ॥ १७६ ॥

अनरण्यमकारुण्यश्शरण्यं भीतचेतसाम् ।
जेतुं यातुपतिस्सोऽगादयोध्यां नगरीमिमाम् ॥ १७७ ॥
"देहि वा सङ्गरं घोरं जितोऽस्मीत्यभिधेहि वा" ।
इति तं रावणोऽवोचदिक्ष्वाकुकुलनायकम् ॥ १७८ ॥
स तु तस्य वचः कर्णे धृत्वा हस्ते च कार्मुकम् ।
समराय बलैस्साकं साकेतपतिराययौ ॥ १७९ ॥

---

१७५. **मरुत्तेति** । कृतज्ञतया तेषां वेषपरिग्रहेण स्वरक्षणकरणात् तादृशोपकारमालोच्येत्यर्थः । विचित्रनेत्रवर्णादयः काकमयूरादीनां तदा देवदत्त-वरलाभाधीना इत्यर्थः ।

१७६. **पङ्क्तीति** । रावणस्तु स्वेन रणं दातुमप्रगल्भान् पुरूरवः-प्रभृतीन् नृपान्, तन्मुखेन 'पराजिता वय-' मित्युक्तिं वाचयित्वा अयोध्यापुरी-माक्रान्तवान् ।

तदनु तदनुमत्या तत्र हेषारवार्त-
प्रतिभटकटकानां प्राटतां घोटकानाम् ।
खरखुरपुटघातादुत्थितैः पांसुकूटै-
रमलसुरसरस्तत्पङ्किलापं किलाऽभूत् ॥ १८० ॥

वलाहके तस्य वलाभिधाने
शरौघवर्षं सहसा दधाने ।
कीलालपूर्णा किल भूमिरासी-
दुच्चैरुदाञ्चद्घनगर्जितं च ॥ १८१ ॥

तत्सैन्यरेण्वा स्थगिते रणेऽस्मिन्
त्यक्त्वा तृणत्याजमसून् भटेन्द्राः ।
भेत्स्यन्त्यमी मामिति भीतचेताः
तिरोदधे किं दिवि तिग्मरश्मिः ॥ १८२ ॥

घनैरयोध्येश्वरसैन्यवीरैः
सम्पादिते सङ्गरदुर्दिने द्राक् ।
सुव्यक्तदोषा शमनाय तेषां
दशास्यबाहा शरदाविरासीत् ॥ १८३ ॥

---

१८०. **तदन्विति** । तदनुमत्या तस्य अनरण्यस्य अनुमत्या, युद्धाङ्गीकारेण हेषाशब्देनार्ताः पीडिताः प्रतिभटसमूहाः यैस्तेषां घोटकानां अश्वानां, खराणां कठिनानां खुरपुटानां अभिघातात् । अपां समूहः आपं, पङ्किलं आपं यस्य तत् पङ्किलापं सरः ।

१८१. **बलाहक इति** । वलाभिधाने वलाहके मेघे, कीलालपूर्णा रुधिरपूर्णा जलपूर्णा च ।

१८२. **तदिति** । तृणत्याजं तृणत्यागवत् सैन्यरेणुतिरोधाने सूर्यस्य भयहेतुकत्वमुत्प्रेक्ष्यते ।

१८३. **घनैरिति** । घनैः मेघैः सङ्गर एव दुर्दिनं, मेघच्छन्न-दिनम् ।

हा कष्टमतनुयुद्धे निहतानां धन्विनां तदीयानाम् ।
अनवरतमप्सरोभिस्साकं नाकेऽप्यभूदतनुयुद्धम् ॥ १८४ ॥

अथ पुनरनरण्योऽपि महारण्यख्यातिलिप्सया निहतनिजबल-विलोकनविकसितप्रतियोधमतिर्घोरं समरमारचय्य सारचर्यः परुषरोष-कषायितनयनविंशतिना यातुधानपतिना तलेनाऽभिहतो भूतले स्थादपत-दमुह्यच्च ॥ १८५ ॥

तं च द्विपञ्चमुखस्तथाभूतमालोक्य त्रैलोक्यपरिभावुकः सपरि-हासमित्थमभ्यधत्त ॥ १८६ ॥

"क्षपितसुरमदेन स्पर्धमानो मया त्वं
फलमनुभवसीदं हन्त कर्मानुरूपम् ।
अनुचितकृतिभाजामन्तिके सन्ति खेदा-
श्शलभ इह तु साक्षी साहसाक्रान्तशुष्मा" ॥ १८७ ॥

इदं पुनरिक्ष्वाकुकुलग्रामणी रावणीयमवमानजल्पितमसहमानः पापं तं सकोपमालक्ष्य, शापमित्थमकार्षीत् ॥ १८८ ॥

"दशरथात्प्रथितो मम सन्ततावतरिष्यति राम इति प्रभुः ।
दशमुखस्य तवापि स पञ्चतां रचयिता नियतं चतुराकृतिः" ॥१८९॥

---

१८४. **हा कष्टमिति** । अतनुयुद्धे महति युद्धे, अप्सरोभिः अतनु-युद्धं मन्मथयुद्धमित्यर्थः । युद्धे मृतानां स्वर्गप्राप्तेरिति भावः ।

१८५. **अथेति** । महारण्यः महत् अरण्यं यस्य सः, महद्रणं युद्धं तत्र समर्थ इति च ख्यातिलाभेच्छया निहतस्य निजबलस्य विलोकनेन विकसिता सञ्जाता प्रतियोधमतिः प्रतिभटबुद्धिः यस्य तादृशः । निजसैन्यविनाशके रावणे प्रतिभटबुद्धिं कुर्वन्नित्यर्थः । सारा चर्या चरितं यस्य सः ।

१८८. **इदं पुनरिति** । रावणीयं रावणोक्तम् ।

१८९. **दशरथादिति** । दशरथात् प्रथितो रामः अवतरिष्यति । दशमुखस्यापि पञ्चतां पञ्चत्वसङ्ख्यां मृतिं च ।

लङ्केशनाशाय निरस्ततापे
तस्मिन्नुदञ्चत्यनरण्यशापे ।
जवादभूतां सुमनोगणानां
वृष्टिश्च तुष्टिश्च समानकालम् ॥ १९० ॥

अङ्कूरितश्शापमुखेन योऽयं
पुराऽनरण्येन दशास्यनाशः ।
तद्वंशजश्चापमुखेन रामः
सारण्य एनं समपूरयस्त्वम् ॥ १९१ ॥

ततश्च विपश्चितामग्रगण्येऽनरण्ये दिवमुपसर्पत्यपसर्पति स्म तस्माद्देशाद्गर्वान्धो दशकन्धरः ॥ १९२ ॥

तत्र मर्त्यानेव पौनरुक्त्येन मर्दयन्तं तं तत्र तत्र जगदन्तकमविकलकलहोपरचनाविशारदो नारदो दृष्ट्वोपदिष्टवांश्चैवम् ॥ १९३ ॥

"अरे स्वर्गिणामरे कथमज्ञातबलस्त्वमलक्ष्येषु मानवेषु सन्नह्यसि ? ॥१९४॥

निराकृतसुराधिपोऽप्यधिधुनोषि जन्मव्यथा-
जरामयदुरामयक्षपितमेव लोकं नृणाम् ।

---

१९०. लङ्केति । लङ्केशविनाशाय अनरण्यशापे समुन्मिषति, आकाशात् सुमनोगणानां पुष्पसमूहानां वृष्टिः देवगणानां तुष्टिश्च युगपद्बभूवेत्यर्थः ।

१९१. अङ्कूरित इति । अनरण्येन शापदानानन्तरमेव रावणनाशः अङ्कूरितः । तद्वंशजः, अनरण्यवंशे शाप एव रामरूपेण अवतीर्णः ।

१९३. तत्रेति । पौनरुक्त्येन पुनः पुनः । अविकलः अन्यूनः कलहः तस्य रचनानिपुणः, एवं वक्ष्यमाणप्रकारेण ।

१९४. अरे इति । सम्बोधनम् । स्वर्गिणामरे ! देवशत्रो ! अलक्ष्येषु उपेक्षितेषु मनुष्येषु युद्धसन्नाहं करोषि ।

१९५. निराकृतेति । देवेन्द्रमपि जित्वा स्वत एव जन्मजराव्याध्यादिभिर्विनाशिनं नृणां समूहं पीडयसि नैतद्युक्तम् । तथा हि । धूर्जटेः

समापितसुमायुधस्सबलदुर्जयो धूर्जटे-
र्निटालकुटिलानलः किमु तृणेषु सन्नह्यति ? ॥ १९५ ॥

अतः स्वत एव हतमेनं मानवलोकमनादृत्य, दानवदेवतादिष्वेव यातुधानप्रधान ! बधान स्वयमायोधनसंविधानम् ॥ १९६ ॥

यदि च तव रसातलप्रवेशाभिनिवेशस्तदा वैवस्वतसद्मवर्त्मनैव प्रतिष्ठेथाः" ॥ १९७ ॥

एतच्च भाषितं महर्षेर्हर्षेण निशम्य धर्मराजमपि विजिगीषमाणो रावणो विमानममानमहिमानमारुह्य, क्षणादेव दण्डधरनगरोपकण्ठमास्कन्दत् ॥ १९८ ॥

तत्र किल, तन्द्रया देवताविषयमञ्जलिबन्धमपि कर्तुमशक्तयोर्हस्तयोरन्तकपाशबन्धमनुभुञ्जानान्, तप्तचक्राङ्कनतापासहिष्णुनापि वपुषा तप्तवालुककर्षणसन्तापमनुभवतः, तीर्थयात्राकालिककण्टकवेदनानभिज्ञैरप्यवयवैरसिपत्रवने परिवर्त्यमानानपरिचितमहानद्यवगाहेनापि देहेन शोणितमयवैतरणीतरणदुःखमनुभुञ्जानान्, नारायणनामकीर्तनमप्यसहमानेन मुखेन, "हतोऽस्मि, मुञ्च मुञ्च, मां पाहि, तव पादयोः पतामी"त्यादिकानार्तशब्दानुद्गिरतः, उपवासवासरेष्वप्यननुभूतक्षुत्तृष्णानप्यनवरतबुभुक्षापिपासार्दितान् देवतातिथिपूजनार्थं पाककथानभिज्ञानपि स्वयमेव कुम्भीपाके पच्यमानानार्तैश्श्रोत्रियैर्याच्यमानमन्नकवलमप्यदत्तवतः स्वशरीरमेव कृमिभ्यो भीषणेभ्यो भक्ष्यतया ददानान्,

---

रुद्रस्य निटालकुटिलानलः ललाटवह्निः, समापितः निश्शेषितः सुमायुधः मन्मथः येन सः, अल्पेषु तृणेषु किं दाहाय सन्नाहं करोति ? तद्वदिदमिति भावः ।

१९६. अत इति । यातुधानप्रधान राक्षसश्रेष्ठ ! आयोधनस्य युद्धस्य, संविधानं बधान रचयेत्यर्थः ।

१९७. यदि चेति । वैवस्वतसद्मवर्त्मनैव यमसदनमार्गेणैव ।

१९९. तत्रेति । तत्र यमनगरोपकण्ठे, अन्तकपाशः यमपाशः । तप्तचक्रेति-मुक्तिमार्गसाधनस्वल्पहिंसात्मकतापासहिष्णूनां प्रभूतहिंसात्मकतापप्राप्तिः ।

हरिकथाश्रवणनिस्पृहाभ्यामपि कर्णाभ्यां 'गृहाण, बधान, पातय, कर्षय, मर्दय, छिन्धि,' इत्यादीनि भयङ्कराणि यमकिङ्कराणां कटुरुतानि निशमयतः, परदारप्रेक्षणविलासेषु परिमुक्तहर्षबाष्पाभ्यामेव लोचनाभ्यां स्वानुभाव्यानेकनरकावलोकनदशासु शोकाश्रुवृष्टिमुपचिन्वानान्, वेदिकानलज्वालाकलनभीरूनपि तप्ताभिरयस्सन्दंशिनीभिस्सन्दश्यमानसंहननान्, अरे! परयुवतिनीवीविस्रंसनपटो! हन्त! कथमिदानीं अन्तकपाशं न विस्रंसयसि? पण्डितेषु भयेन सम्यगीडमानेष्वपि परुषमेव यस्त्वमभाषिष्ठाः; स कथमधुना तर्जयत्स्वस्मासु दीनाक्षराणि प्रलपसि? मद्यपानशान्ततर्ष! कथमद्य पानकृते तोयमर्थयसे? यैर्भटैस्सर्वजनमभञ्जयस्ते कथं भवन्तं सन्ताड्यमानमुपेक्षन्ते? चौर्याद्यकार्यायुतसंचितं मार्गणापमृत्युकरग्रहणाच्च संरक्षितं भूयिष्ठं धनमपि बत! कृतघ्नमेवाभूदिदानीं त्वां नानानारकयातनाभ्यः परिक्षिप्तमपि न रक्षतीत्येवमादिकाभिरतिविकटयमभटपटलकटुतरपरिहासारभटीभिः

तीर्थयात्रेति - तत्तत्पुण्यतीर्थस्थलयात्रायां प्रायशः कण्टकवेदना सम्भाविता। तदनुभवे सति असिपत्रादिनरकप्राप्तिर्न स्यादित्यर्थः। एवमुत्तरत्रापि। नारायणनामेति - अनायासेन कर्तुं शक्यमहापातकनाशनतन्नामोच्चरणासहस्य ईदृशदुरुक्तिलाभ इति चाटूक्तिः। सर्वत्र एवं चाटूक्तिरसः अद्भुतः। उपवासवासरेष्विति - मात्रास्पर्शास्त्विति न्यायेन महाफलेषु एकादश्याद्युपवासेषु क्षुत्तृष्णासहनं कार्यम्। तत्करणे एवंविधवेदनाप्राप्तिर्न स्यादिति भावः। संहननं शरीरं। एतावत्पर्यन्तमेका परिपाटी। इतः परं अन्या रीतिरनुस्रियते कविना। अरे इत्यादिना। परयुवतीति - परदारगमनफलमन्तकपाशबन्धः इत्ययं विषयः रसवत्तरभङ्ग्या कविना कथ्यते। अनीशाः परदाराः, निवारण इति - शक्तेन त्वया धर्षिताः तत्फलं त्वत्तोऽपि समर्थैः यमभटैस्तव धर्षणमिति कथनेन दुर्बलहिंसकानां दुष्टानां शिक्षा अवश्यं भाविनीति ज्ञाप्यते। एवमेवोत्तरत्र सर्वत्र बोध्यम्। चौर्याद्यकार्येति - अमार्गेणार्जितानि वित्तानि बहुप्रयासेन रक्षितानि पूर्वम्, पश्चात्तव यमयातनानुभवकाले किं तानि रक्षन्ति?

परिभूयमानान् परिद्रूयमानांश्च नानाविधानि स्वदुष्कृत्यानि स्मारं स्मारं दीर्घमुष्णं च निश्वसतो नारकिणो निशामयामास दशाननः ॥१९९॥

अन्तः स्फुरन्नरकपालकमन्तकस्य
तद्धाम दुर्विषहरौरवगौरवं च ।
सान्द्रं तमोभिरुरुकण्टकदारुणाढ्यं
सोऽगादरण्यमिव घोरमपुण्यगम्यम् ॥ २०० ॥

तत्र च रात्रिचराणां पत्या परित्याजितशूलशक्त्यादिनिजायुधाः कृत्याकरणादिदूषितान् मर्त्यानत्याग्रहेण निघ्नन्तो मृत्योर्भृत्याः भीत्या प्रशिथिलबलाः पलायिताः ॥ २०१ ॥

दरकारियातुवरकायदर्शन-
ज्वरकातरेषु नरकाधिकारिषु ।
त्वरयाऽथ घोरतरयातनार्दितो
निरयादसह्यनिरयादघी जनः ॥ २०२ ॥

एवं रावणेन विधीयमानं मानभङ्गमसहमानः स्वकिङ्करैः भयङ्करैः कालदण्डादिभिरायुधैश्च समेतः परेतनाथः सङ्गराङ्गणमासाद्य प्रकटित-प्रतिभटबलनिधनमायोधनं प्रावर्तयत् ॥२०३ ॥

यमरावणयोश्शरार्दनोद्यत्सृमरासृग्धरदिग्धगात्रयोः ।
अमरा मुनयश्च सङ्गताः समरारम्भदिदृक्षया दिवि ॥ २०४ ॥

यत एवं अतः स्वरक्षणकर्तुः तव समये रक्षणाकरणात् कृतघ्नानीति भावः। निशामयामास अपश्यत् ।

२०१. **तत्रेति** । तत्र यमपुरोपकण्ठे, रावणेन परिभूततया स्वायुधानि त्यक्तवन्तः यमभटाः नष्टबलाः पलायिताः ।

२०२. **दरकारीति** । भयङ्करं, यातुवरस्य रावणस्य यत् कायं तद्दर्शनेन जन्यः ज्वरः भयरूपः तेन कातरेषु नरकाधिकारिषु । अघी पापकृत् जनः, निरयात् नरकात्, निरयात् निर्गतः ।

२०३. **एवमिति** । मानभङ्गं स्वभटपलायनेन दण्ड्यानां निर्गमनरूपं मानभङ्गम् ।

अन्योन्यज्यातिषञ्जितोग्रविशिखप्रक्षुण्णवक्षःस्थल-
च्योतल्लोहितपूरकल्पितमहाहोळाकहेळाकयोः ।
ज्याटङ्कारतिरोहितातिविकटाहङ्कारहुङ्कारयोः
कष्टं हन्त कृतान्तपङ्क्तिमुखयोर्युद्धं प्रवृद्धं बभौ ॥ २०५ ॥

अनन्तरं निरन्तरशरप्रहारसन्धुक्षितामर्षकलितानीकनाशे कीनाशे कालदण्डमकुण्ठशक्तिमनिवर्त्य रणोत्कण्ठाय रावणाय मुमुक्षति, ॥२०६॥

"अमोघः कालदण्डोऽयमवध्यो रावणः सुरैः" ।
इति डोलायितमनास्तत्र सन्निदधे विधिः ॥ २०७ ॥
नारदानन्दविघ्नाय शारदाभासिताननः ।
ऊचे क्रुध्यन्तमत्यन्तमन्तकं हन्त कञ्जभूः ॥ २०८ ॥

"वत्स! कालदण्डस्य अमोघता, दशकण्ठस्य अवध्यता च मदाज्ञया सिद्धे विरुद्धे उभे सन्निपतिते, तथापि यथा मदुक्तिरवितथास्यात्तथा भवान् प्रयतता"मिति ॥ २०९ ॥

इदं च कमलासनशासनं शिरसा मानयन् मुमुक्षितं दण्डं लक्ष्याद्राक्षसेन्द्राद्विनिवर्त्य समवर्ती तत्रैवान्तर्दधे ॥ २१० ॥

मुदं दधानो युधि यातुधानो
यमे तिरोधानमुपादधाने ।
परेतराजोऽपि पराजितोऽभू-
दितीव गर्जन्नथ निर्जगाम ॥ २११ ॥

तदन्वयमुदन्वन्तमाविश्य वासुकिना राजन्वतीं भोगवतीं नगरीमासाद्य सद्य एव भोगीन्द्रान्विजित्य नदीं मणिमतीमतीत्य, तत्र निवातकवचैर्महासुरैस्संवत्सरमनुवर्तितेनापि सङ्गरेण दुस्साधैर्वेधस्शासनादनुष्ठितसख्यः प्रख्यातशक्तिरश्मनगरमासाद्य, कालकेयाभिधानान्

---

२०५. अन्योन्येति । होलाकः, तदाख्यः उत्तरदेशीयैरनुष्ठीयमानः उत्सवविशेषः । तत्र हेला लीला तद्वतोः ।

२०६. अनन्तरमिति । मुमुक्षति प्रयोक्तुकामे । कीनाशे यमे ।

२०८. नारदानन्दविघ्नायेति-नारदस्य कलहप्रियत्वात् । कलहशान्त्यर्थं चतुर्मुखसन्निधानं विघ्नकारीति भावः ।

यातुधानान् कालधर्ममुपागमय्य, दर्पवन्तं शूर्पणखाभर्तारं विद्युज्जिह्वमपि निरस्तुकृत्य, क्रमादमात्यैस्सह रावणो दारुणोद्भटभटपरिपालितं वारुणमपि निवेशनं प्रविवेश ॥ २१२ ॥

वारुणभवनद्वारे वसतः पुरुषान् रुषा रणे परुषान् ।
यातुधुरीणश्चित्रं यमभवनद्वारगामिनश्चक्रे ॥ २१३ ॥

अथ निजभटपरिपाटनकुपितचेतसः प्रचेतसस्तनया जनयामासुराज्याकलनेन लङ्केश्वरामर्षवैश्वानराभिवृद्धिम् ॥ २१४ ॥

आक्रामतोऽप्यत्र विचित्रमाशा-
श्चक्रे दशास्यः स्वभटाननाशान् ।
सुतान् सपाशानपि पाशपाणिः
स तानतानीत्समरेष्वपाशान् ॥ २१५ ॥

तेन पुनस्सुदृढताडिताद्रथान्मनोरथाच्च भ्रष्टा विचेतसः प्रचेतसः पुत्राः स्वभृत्यैरात्मीयनगराभ्यन्तरमनीयन्त ॥ २१६ ॥

---

२१३. **वारुणभवनद्वारेति** । वारुणसदनद्वारपालानित्यर्थः । रणे यमभवनद्वारगामिनः तद्द्वास्स्थान् परासूंश्चेत्यर्थः । वारुणगृहद्वारपानां यमभवनद्वारस्थीकरणादाश्चर्यम् । रणे तान् हतवानिति परिहारः ।

२१४. **अथेति** । परिपाटनं हननं, तेन कुपिताः प्रचेतसः वरुणस्य तनयाः । लङ्केश्वरकोपाग्नेः अभिवृद्धिं आज्याकलनेन, आज्यस्य घृतस्य आकलनेन सेकेन, आजेः युद्धस्य, आकलनेन करणेन ।

२१५. **आक्रामतः इति** । स्वभटान्, आशाः दिशः आक्रामतोऽपि दिगन्तगामिनोऽपि, अनाशान्, न विद्यते आशा येषां तान्, दिक्सम्बन्धरहितान्, चकार । विरुद्धकारणादाश्चर्यं, न विद्यते नाशः येषां ते अनाशाः नाशरहिताः इति वास्तवार्थः । समरेषु अपाशान्, न विद्यते पाशः येषां तान् । सपाशानपि पाशरहितानिति विरोधः । अपगता आशा इच्छा येषां ते अपाशा इति परिहारः । रावणेन पराजिता युद्धे निस्स्पृहाः बभूवुरित्यर्थः । श्लेषमूलको विरोधाभासः ।

२१६. **तेनेति** । रथादिति । रथस्य भग्नत्वात्, रथहीनाः मनोरथात् युद्धाभिलाषाच्च भ्रष्टाः, तद्रहिताः अशक्त्या इत्यर्थः ।

तदनु राजानं वरुणमेव रणाय समाह्वयमानं यातुधानं प्रभासो नाम प्रचेतसो मन्त्री सानुनयमेवमवोचत् ॥ २१७ ॥

"तनयैर्भुवनेश्वरस्य तीव्रा
शमिता ते दशकण्ठयुद्धकण्डूः ।
वरुणो द्रुहिणोपकण्ठमागा-
द्विरम त्वं सुरमर्त्यमृत्युराजेः" ॥ २१८ ॥

इदं च तदीयमुदितं निशम्य 'पश्चिमकाष्ठाधिष्ठितोऽपि पराजित' इत्युच्चैरुच्चार्य ततस्सदनात् अपासर्पच्छूर्पणखाग्रजो यथागतम् ॥२१९॥

मार्गे चाऽसौ महोरगयक्षराक्षसदानवमानवादीनां नानारूपास्सुदतीर्हटादपहृत्य पुष्पकं स्वमनोरथं च पूरयामास ॥ २२० ॥

ततश्च पतिव्रतास्तेन प्रसभं हृताः सकरुणं मन्दं मन्दमाक्रन्दयाञ्चक्रुः ॥ २२१ ॥

तत्रैका तावदेवं व्यलापीत् ॥ २२२ ॥

वृद्धो मे श्वशुरः क्षमा तमलसा श्वश्रूर्न शुश्रूषितुं
बालास्तु प्रतिवारमन्नकवळास्वादानभिज्ञाः स्वयम् ।
मय्येवार्पितजीवितः प्रियतमो मामीदृशीं रक्षसो
हस्ते दत्तवता त्वया हतविधे किं नाम लब्धं फलम्? ॥२२३॥

---

२१८. **तनयैरिति** वरुणतनयैः लोकाधिपतेस्ते युद्धकण्डूः शमिता । बलस्य विषयदानेन शमनं कृतमित्यर्थः । सुराणां मर्त्यानां च नाशकस्त्वं युद्धान्निवर्तस्वेति प्रभासोऽवोचदिति पूर्वेणान्वयः ।

२१९. **इदं चेति** । पश्चिमकाष्ठाधिष्ठितः, प्रतीचीदिगधिपतिर्वरुणः ।

२२०. **मार्गे चेति** । पुष्पकं स्त्रीभिः पूरयामास । ताभिरेव मनोरथं च पूरयामास । मनोरथसिद्धिरभूदित्यर्थः ।

२२२. **तत्रेति** । तत्र तासु स्त्रीषु, एका किं फलं लब्धमिति व्यलापीदित्यत्रान्वयः ।

इतरा —

अग्नीन् प्रणीय बहिराह्निककर्म कर्तुं
यातो बताग्निशरणं पुनरेत्य होतुम् ।
अप्रास्तधूलिकमगोमयलेपनं त-
त्पत्नीविहीनमवलोक्य पतिः कथं स्यात् ? ॥ २२४ ॥

अपरा तु —

नेतुं मां श्वशुरादिभिर्निजगृहानाप्ते जने प्रेषिते
कष्टं भावि वियोगचिन्तनपरिप्लुष्टं ययोरङ्गकम् ।
नेत्रद्वन्द्वमुदश्रु दीर्घनिगळन्निश्वासशुष्कं मुखं
तौ मातापितरौ किमद्य कुरुतामेवं विधायां मयि? ॥२२५॥

इतरा तु —

व्यापारैर्मदनस्य यः क्षणमिव क्षिप्त्वा निशामद्भुतैः
प्रत्यूषे गुरुसाध्वसेन शयनादुत्थाय बाह्याङ्गणम् ।
यास्यन्तीमनुमन्यते बत चिरात्संश्लिष्य संश्लिष्य मां
कान्तस्सोऽयमनन्यदृष्टिरधुना कां कामवस्थां गतः ? ॥२२६॥

इत्यादिरीत्या करुणं विलपन्तीनामेव तासां व्यतिचक्राम मार्गं निश्शङ्कं लङ्कापतिः ॥ २२७ ॥

सुरासुरव्याळनराशराणां
बलाद्गृहीतासु विलासिनीषु ।

---

२२५. अपरा पतिव्रता तु, **नेतुमिति** । निजगृहान् निजसदनं नेतुं आप्तजने श्वशुरादिभिः प्रेषिते सति ययोः मातापित्रोः । एवं विधायां, रावणहृतायां मयि, उचितं श्वशुरगृहगमनमप्यसहमानयोः मातापित्रोरत्यन्तानुचितरावणापहारः कथं सह्य इति भावः ।

२२६. **व्यापारैरिति** । गुरुभ्यः श्वश्रूश्वशुरादिभ्यः साध्वसेन उदयानन्तरशयने तेषां गर्हा स्यादिति भयेन ।

२२८. **सुरेति** । सुराणामसुराणां नागानां नराणां राक्षसानां च । विलासिनीषु स्त्रीषु काऽपि तं पापिष्ठं राघणं न कामयते स्म नैच्छत् ।

न कापि तं कामयते स्म पापं
अकीर्तिरेका स्वयमेव वव्रे ॥ २२८ ॥

सर्वाश्च तास्संरुष्टा दुष्टात्मानमुद्दिश्य परदारग्रहणनिमित्त एवास्य भङ्गो भविष्यतीति शापमदुः सुदुःखिताः ॥ २२९ ॥

लङ्कामेत्य सुरापमृत्युरुदितातङ्कां पतिध्वंसनात्
क्रुद्धां शूर्पणखां प्रसाद्य च खरं तद्दुग्धये भ्रातरम् ।
रक्षोभिस्सह दण्डकावनमथ प्रस्थाप्य रम्यान् गृहा-
नप्राप्यैव निकुम्भिलामभजत द्राक्कुम्भकर्णाग्रजः ॥ २३० ॥

तत्र साङ्गमनुष्ठितेन सत्रेण संप्रीणितान्महेश्वरादनश्वराणि चाप-बाणास्त्राणि, कामचरं व्योमचरं स्यन्दनं, तामसीं नाम गतागति-तिरोधानकरीं मायां च लब्ध्वा, तमृद्धिमन्तं मेघनादं सामोदं परिष्वज्य तेन समं मेरुसमं स्वमावसथमाविवेश निशाचरेश्वरः ॥ २३१ ॥

ततः प्रतस्थे काकुत्स्थ तरसा तरसाशनैः ।
साकं नाकपतिं जेतुं लङ्कापतिरशङ्कितः ॥ २३२ ॥

दोषाकरेऽस्मिन् तुरगैरसंख्यैः
कैलासशैलं प्रति गाहमाने ।
प्रम्लाननाळीकगणोऽस्तशैलं
भियेव भेजे बत सप्तसप्तिः ॥ २३३ ॥

अकीर्तिः तं रावणं स्वयमेव वव्रे वृतवती । पूर्वोक्तदुष्कार्यकरणेन अयश-स्तस्याभूदित्यर्थः ।

२२९. **सर्वा इति** । भङ्गः नाशः भवत्विति शापमदुरित्यर्थः ।

२३२. **तत इति** । हे काकुत्स्थेति संबोध्य, अगस्त्यमुनिवचनानु-कारः । तरसा शीघ्रं, तरसाशनैः मांसाशनैः राक्षसैः, नाकपतिं जेतुं प्रतस्थे इत्यन्वयः ।

२३३. **दोषेति** । दोषाणामाकरे चन्द्रे च । प्रम्लाननालीकगणः प्रम्लानकमलगणः प्रम्लाननाडीगणश्च डलयोरभेदात् । सप्तसप्तिः सप्ताश्वः

तस्मिन् विस्मयकरे कैलासशिखरे दशमुखस्सुखतरं स्वसैन्यं सन्न्यवेशयत् ॥ २३४ ॥

मृदुकिसलयमञ्चे मञ्जुपुष्पप्रपञ्चे
किमपि शयनसौख्यं निर्विशन्निर्विशङ्कः ।
हसदसमकळम्बं हन्त मन्दोदरीशो
हरिहरिदवलम्बं चन्द्रबिम्बं ददर्श ॥ २३५ ॥

मन्दोद्गमः कुसुमवृन्दसरन्मरन्द-
सन्दोहकन्दळितशीतळिमा समीरः ।
इन्दोः करैः प्रसृमरैः परिरब्धदेहं
मन्दोदरीसहचरं मदयाम्बभूव ॥ २३६ ॥

स्नातश्चन्द्रमयूखचुम्बितशशिग्रावोद्भवैरम्बुभि-
स्सान्द्रानन्दषडङ्घ्रिदम्पतिरतिक्षुब्धप्रसूनोद्भवैः ।
आचान्तो मकरन्दबिन्दुनिवहैर्हा हन्त मन्दानिलः
कामाग्नौ ज्वलिते जुहाव हृदयं क्रव्यादचूडामणेः ॥ २३७ ॥

सूर्यः, सूर्यस्य नैसर्गिकास्तशैलप्राप्तेः बहुतुरंगसहितरावणकैलासप्राप्तिहेतुकत्व-मुत्प्रेक्ष्यते, दोषाकरशब्दश्लेषेण रावणे, स्वप्रतिपक्षचन्द्राभेदाध्यवसायस्तदुप-योगी । आत्मनः सप्ताश्वत्वं प्रतिपक्षस्य च असंख्याश्वत्वं भीतिं जनयतीति भावः ।

२३५. **मृद्विति** । मञ्जूनां मञ्जुलानां पुष्पाणां, प्रपञ्चः समूहः यस्मिन् तादृशे मञ्चे । निर्विशन् अनुभवन्, हरेः इन्द्रस्य हरित् दिक् प्राची, तस्यां लम्बमानं चन्द्रबिम्बं ददर्श मन्दोदरीनाथः इति । हसन्नसमकलम्बो विषमबाणो मन्मथो यस्य तदित्यर्थः ।

२३६. **मन्दोद्गम इति** । मन्दशीतमारुतः कैलासे सुखशायिनं रावणं मत्तं चकारेत्यर्थः ।

२३७. **स्नात इति**। शशिग्रावा चन्द्रकान्तशिला तदुद्भवैर्जलैः। सान्द्रः निबिडः आनन्दः येषां ते षडङ्घ्रिदम्पतयः भ्रमरदम्पतयः तेषां रतिः विहारः तेन क्षुब्धप्रसूनजातैः मकरन्दबिन्दुसमूहैः, आचान्तः व्याप्तः

तत्र किल तादृशि रामणीयकसमाकृष्टसकलजनमनसि तुङ्गे कैलासशृङ्गे सङ्गीतभङ्गीषु दक्षाः यक्षाः प्रमदाभिस्सह स्वच्छन्दं परिचिक्रीडिरे ॥ २३८ ॥

तन्वङ्ग्याः प्रथमं कचग्रहविधौ यत्नं महान्तं व्यधा-
द्रोमाञ्चश्लथसन्धिबन्धनजुषा प्रीत्योल्लसन्तौ कुचौ ।
यत्नेनाथ लघीयसैव जगृहे हन्त स्रुतो निर्गळ-
न्नीवीकं जघनं ग्रहीतुमभवन्निर्यत्न एव प्रियः ॥ २३९ ॥

अन्यत्र च—

चञ्चत्कुन्तळवान्तदिव्यकुसुमस्त्यानोपधानं चल-
न्मुक्ताहारमरीचिवीचिविसरप्रस्मेरबाहान्तरम् ।
तादृक्कुण्डलताण्डवात्तहृतिभिस्संरक्तगण्डस्थलं
तन्वङ्ग्याः पुरुषायितं चिरतरं धन्यः पुमानन्वभूत् ॥ २४० ॥

श्रमजलकणैः पाद्यार्घ्यादीन् वधूर्मधुपर्कम-
प्यधरमधुभिर्दत्त्वा कन्दर्पदैवतपूजने ।

मन्दमारुतः, क्रव्यादचूडामणेः रावणस्य हृदयं कामाग्नौ हुतवान्, कामपरवशीचकारेति भावः ।

२३८. उद्दीपकान्तरमप्याह **तत्रेति** । प्रमदाभिस्सह यक्षक्रीडादर्शनं रावणस्य भृशं कामोद्वेगजनकमिति भावः ।

२३९. कामकलारीतीर्दर्शयति—**तन्वङ्ग्या** इति । आदौ कचग्रहे महान् यत्नः । अथ तदपेक्षया अल्पतरयत्नेन कुचग्रहणं शक्यमासीत् । तदनु तन्वङ्ग्याः जघनग्रहणं यत्नं विनैव सुशकमभूदिति क्रमः अनुभवसिद्धः रसिकजनसंवेद्यः कथ्यते ।

२४०. **चञ्चदिति** । पुरुषायितरते स्त्रियः व्यापृतत्वात्, एतत्पद्योक्तानि विलसितानि भवन्ति । पूर्वपद्यापेक्षया, रतान्तरवर्णनाविशेषः ।

२४१. पुनरपि तदेव प्रकारान्तरेण वर्णयति — **श्रमजलेति** । पुरुषायितरतसमये स्त्रियः श्रमात् स्वेदा भवन्ति । स्वेदजलान्येव कामदेवपूजायां अर्घ्यपाद्योदकानि । तदानीन्तनाधरमध्वेव मधुपर्कम् । शिथिलकचा एव

श्लथकचमुखेनैव व्यातन्वती कुसुमाञ्जली-
नुरसि पतिता भर्तुः कर्तुं प्रणाममिवान्ततः ॥ २४१ ॥

एवं देवस्य त्रिभुवनविजयिनः कुसुमेषोराराधनसमये तत्सायकक्षतप्रतीकः कान्दिशीकविवेकः क्रव्यादप्रवेकः प्रकाममस्वस्थोऽवतस्थे ॥ २४२ ॥

तत्रान्तरे —

रन्तुं गृहीतसमया नळकूबरेण
रम्भाऽस्य केळिसदनाय शनैः प्रयान्ती ।
लङ्केश्वरेण ददृशे मदनातुरेण
नागोत्तमेन तृषता नवपद्मिनीव ॥ २४३ ॥

तां बत त्रस्तहरिणशाबचञ्चलाक्षीं मदनकदनम्लानवदनो मन्दोदरीरमणस्सरभसमुपसृत्य सानुरागमित्थमवादीत् ॥ २४४ ॥

कुत्र प्रयासि कुतुकेन कुरङ्गनेत्रे ?
कस्याऽधुना सुचरितानि पचेळिमानि ? ।
आलिङ्ग्य तुङ्गमतिगाढमुरोजकुम्भं
पास्यत्यणूदरि तवाधरपल्लवं कः ? ॥ २४५ ॥

पुष्पाञ्जलयः । तदात्वे भर्तुर्वक्षसि तन्व्याः पतनमेव पूजान्ते कर्तव्यः प्रणाम इति सर्वत्र रूपकं चमत्कारकारि वर्ण्यते । मन्मथस्य प्रीतिजनकव्यापाराः एत एव । अतः पूजेत्युच्यते ।

२४२. **एवमिति** । तत्सायकैः मन्मथबाणैः, हतावयवः नष्टविवेकः क्रव्यादप्रवेकः राक्षसोत्तमो रावणः । अस्वाधीनोऽभूत् ।

२४३. **रन्तुमिति** । गृहीतसमया गृहीतसङ्केता, रम्भा, अस्य नलकूबरस्य लीलागृहं प्रति मन्दं गच्छन्ती मदनातुरेण रावणेन तृषार्तेन गजोत्तमेन पद्मिनीव अवलोकितेत्यर्थः ।

२४५. **कुत्रेति** । कुरङ्गनेत्रे हरिणाक्षि । पचेळिमानि परिपक्वानि । अणूदरि कृशोदरि !

त्वदङ्गे संलीनं मन इव विचेतुं दृगधुना
निमज्ज्योन्मज्जन्ती महिमवति नाभीसरसि ते ।
समारुह्योत्तुङ्गं स्तनगिरिमधश्चावतरितुं
न जानाना मार्गं ननु सुमुखि तत्रैव वलते ॥ २४६ ॥

पुनस्सोत्कण्ठं निर्वर्ण्य ॥ २४७ ॥

अयि विद्युदसावचञ्चला वा
मृदुला काञ्चनसालभञ्जिका वा ।
तव मूर्तिरनुष्णदीपिका वा
दिवसे विस्फुरती विधोः कला वा ॥ २४८ ॥

पुनस्सानुरागोत्कण्ठम्—
द्रागानये घनरसं तव किङ्करोऽस्मि
कुम्भद्वयं वितर सुन्दरि हस्तयोर्मे ।
देयं तु मह्यमिह वेतनमेतदेव
तन्वि त्वयाऽधिजघनं धृतमन्तरीयम् ॥ २४९ ॥

---

२४६. **त्वदङ्गे इति** । तवाङ्गे लीनं मनः विचेतुमन्वेष्टुं प्रवृत्ता दृक् । गम्भीरनाभिसरसि निमज्ज्य, तत उद्गता उन्नतं स्तनगिरिमारुह्य अधः गन्तुं मार्गमजानन्ती तत्रैव भ्रमति । दृशः क्रमिकस्तनतटावगाहनस्य मनोविचयहेतुकत्वं उत्प्रेक्ष्यते । सर्वावयवापेक्षया स्तनरामणीयकातिशयः अनेन व्यज्यते ।

२४८. **अयीति** । अत्र सर्वत्र व्यतिरेकः । तथा हि प्रसिद्धविद्युत्, चञ्चला । इयं तु अचञ्चलेत्येकः । स्वर्णप्रतिमा कठिना भवेत् । इयं तु मृदुलेत्यपरः । दीपः उष्णः, इयं तु अनुष्णदीपिकेति । तथा प्रसिद्धचन्द्रकला दिवा न स्फुरेत्, इयं तु दिवापि स्फुरतीत्यन्वयः ।

२४९. **द्रागिति** । घनरसं जलं, निरन्तरानन्दं च । कुम्भद्वयं घटद्वयं, तत्त्वेन तिरोहितं कुचद्वयं च । कुम्भद्वये जलाहरणवेतनतया अधोवस्त्रं देयमित्यर्थ्यते । लोके जलाहरणकैङ्कर्याधिकृतानां वेतनवस्त्रदानं प्रसिद्धम् । तदत्र भङ्ग्या वर्ण्यते ।

सदीर्घश्वासम् —

कुचयुगळात्काठिन्यं कुन्तलतः कोमलाङ्गि कौटिल्यम् ।
तव बत हृदयमधीते तन्वि कथं न करपल्लवान्मृदुताम् ॥ २५० ॥

हन्त ! क्रूरा अप्यबलानां दयन्त इत्येषा परिभाषा न मृषा ॥ २५१ ॥

यतः —

मयि चण्डकरो निशाकरो
हिमरश्मिस्त्वयि हन्त सुन्दरि ।
कुलिशायुध एव मय्यसौ
कुसुमेषुस्त्वयि मीनकेतनः ॥ २५२ ॥

इत्थं मन्मथोन्मादनिर्मूलितविवेकमनुनयवचांसि जल्पन्तं केकसीतनयमवलोक्य, प्रत्याख्याततदीयदुश्चरितारम्भा रम्भा सभयकम्पमावेदयत् ॥ २५३ ॥

"महाराज ! मम श्वशुरो भवान् मार्गमतिक्रम्य मावोचत्, यतोऽहमद्य तव ज्यायसो यक्षपतेर्नन्दनेन नळकूबरेण वृता स्नुषाऽस्मि ॥२५४॥

पापाभिसन्धिरपि बन्धुजनावरोधान्
कामातुरोऽहमिति कामयते जनः कः ।

---

२५०. **कुचेति** । अङ्गनाहृदयस्य काठिन्यकौटिल्ययोः प्रसिद्धत्वात् मार्दवाभावाच्च एवमुच्यते ।

२५२. **मयीति** । निशाकरः चन्द्रः, मयि चण्डकरः उग्रकिरणः कामार्तानां चन्द्रदर्शनस्य तापहेतुत्वात् । तथा पुष्पबाणः मन्मथः मयि वज्रायुधः, उद्दीपकत्वात् । त्वयि मृदुः ।

२५४. **महाराजेति** । मम श्वशुरः । कुबेरभ्रातृत्वाद्रावणस्य कुबेरस्नुषां रम्भां प्रति श्वशुरत्वमिति भावः । तदेवाह यत इत्यादिना ।

२५५. **पापेति** । पापे अभिसन्धिमानपि बन्धुजनान्तःपुररमणीः कामातुरोऽपि कः कामयते । इममर्थं दृष्टान्तेन समर्थयति । शूरोऽहमिति शूरस्यापि स्वात्महननं यथा अनुचितं तथा बन्धुस्त्रीवाञ्छेति भावः ।

शूरोऽहमस्मि सुतरामिति कः प्रमत्तो-
प्यात्मानमेव कुतुकादसिना लुनाति ॥ २५५ ॥
कर्माणि क्षणभङ्गकश्मलसुखाभासेच्छया गर्हिता-
न्यातन्वन् जडधीरनर्थमुपयात्याकल्पमल्पेतरम् ।
सद्यश्शीतललेशसौख्यचपलः कर्पूरचूर्णोत्करै-
रञ्जन् दृष्टिमबुद्धिरानिपतनादान्ध्यं न किं विन्दते?" ॥२५६॥
नैतान्यरोचन्त वचांसि तस्या-
स्तथ्यानि पथ्यान्यपि रावणाय ।
अग्र्यौषधान्यप्यविदूरमृत्यो-
रन्तर्न हन्त प्रविशन्ति जन्तोः ॥ २५७ ॥

ततश्च "विलासिनि! स्नुषाऽस्मीति वितथमभ्यधाः । नाकवेश्यानां न कापि व्यवस्थे"ति जल्पन् जाङ्गलाशनपुङ्गवः कुकविरिव पदावलिं बलादेनामाकृष्यामुष्यां स्मारान् व्यापारानारचयत् ॥ २५८ ॥

उत्सृज्य पन्थानमुदस्य भीति-
मुच्छृङ्खलत्वादखिलानि हन्त्वा ।
रम्भा वरं रावणवारणेन
मदोत्कटेनोन्मथिता बभूव ॥ २५९ ॥

---

२५७. नेति । तस्या रम्भायाः तथ्यहितानि वचांस्येतानि रावणाय नारोचन्त । अविदूरमृत्योरासन्नमृत्योर्जन्तोः अग्र्यौषधानि अपि यथा नान्तः प्रविशन्ति तद्वत् ।

२५८. तत इति । हे विलासिनि ! स्नुषास्मीति वचः मिथ्या । यतः स्वर्गवेश्यानामप्सरसां सर्वसाधारणत्वात् न काचिद् व्यवस्था विद्यते इति प्रलपन् रावणः कुकविर्यथा हठादाकृष्य पदानि काव्यं रचयेत् तद्वदेनां रम्भां बलादाकृष्य यथाकामं उपभुक्तवानित्यर्थः ।

२५९. उत्सृज्येति । पन्थानं सन्मार्गं, उच्छृङ्खलत्वात् स्वतन्त्रत्वात्, शृङ्खलाबन्धरहितत्वात् । रम्भा तदाख्यवनिता कदली च । मदोत्कटेन मदजलमत्तेन दर्पोद्रेकेण च । उन्मथिता नाशिता ।

तेन भुक्तोज्झिता रम्भा ददृशे निष्प्रभाकृतिः ।
रात्रेरन्ते विमुक्तेव राहुणा मूर्तिरैन्दवी ॥ २६० ॥

प्रसभमृदितगात्री भ्रष्टमन्दारमाल्या
श्लथवसननिबन्धा स्रस्तहारादिभूषा ।
व्यपगततिलका सा व्यक्तबाष्पाविलाक्षी
सपदि कमितुरङ्के सार्तनादं पपात ॥ २६१ ॥

तां च तथाविधां दृष्ट्वा श्रुत्वा च तन्मुखेन दशमुखदौरात्म्यं स्वयमपि योगचक्षुषा स्फुटमेतदित्यवधारयन्नलकेश्वरपुत्रो नलकूबरः "परकळत्राण्येवमितःपरं पौलस्त्यो बलात्कृत्य भुञ्जीत चेत् क्षणादेव तस्य शिरःकपालानि शकलीभवन्त्विति" समुन्मिषितकोपः शापमुदाहरत् ॥ २६२ ॥

तं च शापमुदयन्तमनूदयन्ति स्म 'सैषा नलकूबरभाषा सत्या भूयादि'ति अमर्त्यानामाशीर्वादाः, पौलस्त्यस्य परदारबलात्कारसम्भोगभीतयः, तेन बन्दीकृतानां पातिव्रत्यव्ययभीरूणां सुरसुन्दरीणामानन्दकन्दळाश्च ॥ २६३ ॥

ततः प्रभृत्येष तमस्समुद्रो
दशाननो दाशरथे दुरात्मा ।
अरं शिरःपातभिया वियातो-
ऽयं बलादन्यवधूर्न भुङ्क्ते ॥ २६४ ॥

---

२६२. तामिति । अलकेश्वरस्य कुबेरस्य पुत्रः ।

२६३. तं चेति । नलकूबरशापवाणी सत्या भूयादिति देवतानामाशीर्वादाः, रावणस्य परस्त्रीगमनाद्भीतयः, सुरसुन्दरीणामानन्दप्रवाहाश्च नलकूबरशापानन्तरं प्रवृत्ताः । त्रयमेतत् तज्जन्यमिति भावः । तेन रावणेन ।

२६४. तत इति । तमस्समुद्रः, तमोगुणैकनिधिः । वियातः धृष्टोऽपि, अयं रावणः, दाशरथे इति सम्बोधनम् । अगस्त्यमुनिवचनानुकारात् ।

अथ 'स्नुषागमनदूषितो दशकन्धरः करेण मया स्पृष्टः' इति सानुशयश्चन्द्रमाः पश्चिमसागरे स्नातुकाम इव प्राचेतसीं दिशमुपानशे ॥ २६५ ॥

स्वयमेव गुरुतल्पगामितया शाश्वतकलङ्कस्य मित्रोदयासहिष्णोरेतस्य स्वल्पे निमित्ते कोऽयं प्रायश्चित्तारम्भः इति विकासच्छद्मना पद्मिनी परिजहास ॥ २६६ ॥

ततः स्वभर्तृदोषोद्घाटने प्रत्युत्तरं वक्तुमशक्तेव कुमुद्वती म्लानमुखी मौनमभजत ॥ २६७ ॥

प्रतिपक्षमूकीभावसम्पादनतः प्रविशदामोदां पद्मिनीं स्तुवन्त इव मुखरितहरिन्मुखाः चञ्चरीकाः तामेवाभिजग्मुः ॥ २६८ ॥

सर्वमेतदुच्चस्थलात् प्रेक्षितुमिव कर्मसाक्षी स्वयमुदयगिरिशिखरमध्यारुक्षत् ॥ २६९ ॥

---

२६५. **अथेति** । करेण पाणिना, किरणेन च । उपानशे प्राप्तवान् । असत्संसर्गस्य प्रायश्चित्तनिमित्तत्वादिति भावः ।

२६६. **स्वयमिति** । गुरोः बृहस्पतेः आचार्यस्य च तल्पं दारान् । तद्गामितया गुरुतल्पगमनस्य पञ्चमहापातकान्तर्भावात् शाश्वतः नित्यः, कलङ्कः पाप्मा चिह्नं च । मित्रस्य सूर्यस्य सख्युश्च । एतस्य चन्द्रस्य महापातकं कृत्वा तस्य प्रायश्चित्तमद्यावध्यकुर्वतः अस्य अल्पपापाय प्रायश्चित्तवृत्तिः परिहासास्पदेति विकासव्याजेन नळिनी जहास । चन्द्रास्तमये पद्मिन्या विकासे निरुक्तारम्भहेतुकहासत्वमुत्प्रेक्ष्यते ।

२६७. **तत इति** । चन्द्रास्तमयकालिककुमुदमुकुळनस्य निजनायकपराभवहेतुकत्वमुत्प्रेक्ष्यते ।

२६८. **प्रतिपक्षेति** । प्रतिपक्षाणां कुमुदानां मौनसम्पादनतः प्रविशदामोदां विस्पष्टगन्धां विशदतरसन्तोषां च । मुखरितहरिन्मुखा मुखरितदिङ्मुखाः भृङ्गाः तामेव पद्मिनीमेव, कथायां प्रवृत्तायां, प्रतिवादिविजये वादिपक्षीयाणां वादिस्तोत्रस्य प्रसिद्धत्वादिति भावः ।

२६९. **सर्वमिति** । सर्वमेतत् पूर्वोक्तमद्भुतचेष्टितं । कर्मसाक्षी सूर्यः । चतुर्दशसाक्षिषु सूर्यस्यान्तर्भावात् । स्वाभाविकोदयगिर्यारोहणस्य निरुक्तप्रेक्षणनिमित्तकत्वमुत्प्रेक्ष्यते ।

ततः सुप्तोत्थितजनः पूर्वपर्वतभूषणं पूषणमुद्वीक्ष्य सामोदः सचमत्कारमित्थमुदीरयामास ॥ २७० ॥

"प्रौढध्वान्तालिवेताल्युपचयहरणप्रक्रियावेत्रवल्ल्यः
चक्राह्वब्रह्मचर्यव्यपनयनमहे चारुनीराजनाश्च ।
सावित्रग्रावविह्निस्फुरणधमनिकाः श्रीगृहद्वाःकवाट-
प्रोद्घाटिन्यश्शलाका ददति मुदममूर्दीप्तयः साप्तसप्त्यः ॥ २७१ ॥

किञ्च,

मन्त्रांस्तारमुदीरयत्स्वलिगणेष्वस्ताचलग्रावभिः
सोमं द्रागभिषुत्य तद्द्युतिमयान् सद्यो गृहीत्वा रसान् ।
प्राक्शैलोत्तरवेदिमूर्ध्नि विधिना सम्यक् प्रतिष्ठापिते
कालाध्वर्युरहो जुहोति विपुलज्वाले पतङ्गानले ॥ २७२ ॥

---

२७०. **तत इति** । पूर्वपर्वतः उदयाचलः ।

२७१. **प्रौढेति** । प्रौढानि निबिडानि, ध्वान्तानि तिमिराणि; तेषां पङ्क्तिरेव वेताली । तस्या अभिवृद्धिनिरोधकारिण्यः वेत्रवल्ल्यः इत्युत्प्रेक्षा । मान्त्रिकैः पिशाचोच्चाटनस्य वेत्रमुखेन करणादिति भावः । चक्राह्वाः चक्रवाकपक्षिणः । ब्रह्मचर्यव्यपनयनमहे विवाहमहोत्सवे, चारुनीराजनाः । तत्समयक्रियमाणाः दिवैव चक्रवाकाणां मिथुनीभावात् । सावित्रग्राव्णां सूर्यकान्त-शिलानां वह्निस्फुरणस्य अग्निप्रज्वालनस्य धमनिका इव । श्रीगृहं पद्मं, तद्विकासहेतवः इत्यर्थः । साप्तसप्त्यः सप्तसप्तेस्सूर्यस्य सम्बन्धिन्यः रश्मयः सन्तोषं जनयन्तीत्यर्थः ।

२७२. **मन्त्रानिति** । अलिगणक्रियमाणशब्दोच्चारणमेव मन्त्रोच्चारणं अस्ताचलग्रावभिस्सोमस्य चन्द्रस्य सोमलतायाश्चाभिषवः । "ग्रावभिरभिषुत्ये"ति श्रुत्यनुकारः । तद्द्युतिमयानिति चन्द्रस्य हिमरश्मय एव सोमरसाः किरणस्य अमृतमयत्वात् । प्राक्शैलः उदयाचलस्सैव उत्तरवेदिः, कालाध्वर्युः कालरूपाध्वर्युः, पतङ्गानले सूर्यरूपाग्नौ, अहो आश्चर्यम्, अहि चन्द्रकिरणानां सूर्ये सङ्क्रमणात् । तस्य सोमरसहोमत्वमुत्प्रेक्ष्यते "अग्नौ प्रास्ताहुतिस्सम्यगादित्यमुपतिष्ठते" इति न्यायेन प्रसिद्धसोमरसानां वैदिकाग्नौ

स्नात्वा सिन्धुजले समाप्ततमाः साम्नामृचां वासभूः
अध्यास्य प्रथमाचलासनमसावब्जाक्षमन्तर्भजन् ।
हंसो हन्त पवित्रभास्वरकरो नूनं समभ्यस्यति
प्राणायामशतान्यनुक्षणमहो द्यामुत्पतन्नासनात् ॥ २७३ ॥
प्राक्तनस्वकटकादवनीभृत्पश्चिमक्षितिभृतः कटके किम् ।
प्रत्यहं प्रदिशति प्रतिकूले तप्तमर्कमयमायसपिण्डम् ॥ २७४ ॥
त्रयीतनुर्विष्णुपदं प्रपन्न-
स्तप्तं तु चक्रं सदरं बिभर्ति ।

होमः तत आदित्यप्राप्तिरिति क्रमः । अस्य तु आदावेव आदित्यप्राप्तिरिति विशेषादाश्चर्यम् ।

२७३. **स्नात्वेति** । सिन्धुजले समुद्रजले नदीजले च "ऋग्भिः पूर्वाह्णे दिवि देव ईयते" इत्यादिश्रुत्युक्तरीत्या सामादिवेदानां वासस्थानं सूर्यः यतिश्च, अधीतवेदत्वात्तथा, सूर्यपक्षे प्रथमाचलः उदयाचलः तदेवासनं । यतिपक्षे प्रथमं मुख्यं अचलं स्थिरमासनमित्यर्थः । अब्जाक्षं पुण्डरीकाक्षं अन्तः मध्ये भजन् प्राप्नुवन् इति सूर्यपक्षे तत्र च "अथ य एषोन्तरादित्ये हिरण्मयःपुरुषो दृश्यते" इत्यादि श्रुतिः प्रमाणम् । यतिपक्षे ध्यानकाले पुण्डरीकाक्षं श्रीमन्नारायणं हृदये भजन्नित्यर्थः । हंसः परिव्राजकः सूर्यश्च । पवित्राः पावना भास्वराश्च कराः किरणा यस्येति सूर्यपक्षे । पवित्रेण दर्भमयेन प्रकाशमानः करः पाणिर्यस्येति यतिपक्षे । नूनमित्युत्प्रेक्षा अनुक्षणं प्रतिक्षणं द्यां आकाशं उत्पतन् ऊर्ध्वं गच्छन् प्राणायामशतान्यभ्यस्यतीवेत्युत्प्रेक्षा । लोके अधीतवेद एव यतिः आसनविशेषस्थितः पवित्रपाणिः हृदि भगवन्तं ध्यायन् प्राणायामाभ्यासनिरतः ऊर्ध्वमुखः यथा वर्तते तद्वत् सूर्य इत्यर्थः ।

२७४. **प्राक्तनेति** । अवनीभृत् राजा पर्वतश्च । एवमेव "क्षितिभृत" इत्यत्राप्यर्थद्वयम् । कटकं सानुः सैन्यं । सूर्यस्य तप्तायःपिण्डत्वेन रूपणम् । सूर्यस्य प्रत्यहं प्राचीतः अस्ताचलपतनम् प्राच्यमहीपतिना, स्वप्रतिपक्षपश्चिममहीपतिसेनामण्डले कृततप्तायःपिण्डपतनत्वेन, अवनीभृदादिश्लेषेण उत्प्रेक्ष्यते । उदयाचलपक्षे स्वोदितसूर्यास्तमयहेतुत्वेन अस्ताचलस्य तत्प्रतिकूलत्वम् ।

२७५. **त्रयीति** । त्रयीतनुः छन्दोमयस्सूर्यः वेदत्रयाभ्यासपवित्रदेहः पुरुषश्च । य इत्यध्याहारः । विष्णुपदं प्रपन्नः आकाशमाश्रितः । अन्यत्र भगव-

शनैर्विरागश्चिरमादधाति
स श्रीनिवासस्य मुखे विकासम्" ॥ २७५ ॥ इति

ततः साकं सूर्येणोद्यता समुद्यतीं दिविषदधिपतिजिगीषां बिभ्राणो रावणो मोदमानया सेनया सह त्रिविष्टपं निकषा रोषकषायितदृष्टिः समरारम्भसविकासमनाः समनाहयत्पृतनां पृतनासाहस्त्रास करसाहसाम् ॥ २७६ ॥

तदानीन्तु,

पौलोमीकेलिचाटुश्रुतिसुखविहतिक्रुद्धवृद्धश्रवांसि
स्वर्वेश्यागीतगोष्ठीविघटनमुषितानन्दबृन्दारकाणि ।
व्यापुर्द्यावापृथिव्यौ सुरकरटिघटाकण्ठघण्टारवश्री-
लुण्टाकानि प्रचण्डामररिपुसमरारम्भभेरीरुतानि ॥ २७७ ॥

चरणं शरणीकुर्वन्, सदरं सन्ति अराणि मध्यावयवा यस्य तादृशं, तप्तं ज्वलितं चक्रं मण्डलं, अन्यत्र अग्नितप्तं सदरं सशङ्खं चक्रं सुदर्शनं विभर्ति । भुजमूलयोरिति भावः । सः तादृशः शनैः विरागः व्यपगतसन्ध्याकालिकरागः विषयाभिलाषशून्यश्च । श्रियो निवासस्य कमलस्य अन्यत्र लक्ष्मीकान्तस्य नारायणस्य मुखे विकासमादधाति । भगवन्मुखोल्लासं जनयतीत्यर्थः । शङ्खचक्राङ्कितबाहुमूले, वेदाभ्यासपूते, विरक्ते, स्वचरणं प्रपन्ने पुरुषे भगवतः प्रीत्यतिशयस्य शास्त्रप्रसिद्धत्वादिति भावः । सूर्योदयानन्तरं पद्मविकासश्च प्रसिद्धः ।

२७६. **तत इति** । सूर्योदयानन्तरभाविनीं देवेन्द्रजिगीषां बिभ्राणो रावणः निकषा समीपे, पृतनासाहः इन्द्रस्य भयङ्करसाहसयुक्तां, पृतनां सेनां, समनाहयत् सन्नद्धां चकारेत्यर्थः ।

२७७. **पौलोमीति** । पौलोमी पुलोमजा, इन्द्राणी तस्याः क्रीडाचाटूक्तिश्रवणानन्दविहत्या क्रुद्धः वृद्धश्रवाः पाकशासनः येषां तानि । युद्धारम्भे तादृशानन्दभङ्गादिति भावः । स्वर्वेश्या अप्सरसः । सुरकरटिनः देवगजाः, तेषां घटासमूहः, तस्य कण्ठलम्बिघण्टानां रवश्रियः तस्कराणि समरभेरीरुतानि द्यावापृथिव्यौ व्यापुः व्याप्तानीत्यर्थः ।

तदा तदागमननिशमनप्रादुर्भूतभीतिः पुरस्कृतमहेन्द्रा बृन्दारक-पङ्क्तिरुपेन्द्रालयमुपासदत् ॥ २७८ ॥

कान्तिकन्दलविधूतदैवत-
ग्रामणीयमणिरामणीयकम् ।
अम्बुराशितनयाकुटुम्बिनं
तं सुदर्शनधरं ददर्श सा ॥ २७९ ॥

सा पुनर्दीना तमाह स्म ॥ २८० ॥

"निस्सीमाद्भुतनित्यसंसृतिनदीनिस्तारसांयात्रिकाः
वेलातीतविघातदानवमहावेतण्डकण्ठीरवाः ।
उच्चैरच्युत तावकाः क्रतुभुजामावासजीवातवः
संकल्पाः श्रयमाणकल्पतरवः सानुग्रहा जाग्रतु ॥ २८१ ॥

अष्टश्रुतेः किल विधातुरभूदहो प्राक्
आन्ध्यं हरे चतसृणां हरणाच्छ्रुतीनाम् ।
तस्यापनोदनकृते तव मत्स्यमूर्तिः
अन्यादृगञ्जनविशेष इवाविरासीत् ॥ २८२ ॥

---

२७९. **कान्तीति** । कान्तिकन्दळेन विधूतं दैवतग्रामणीयमणेरिन्द्र-नीलमणेः रामणीयकं सौन्दर्यं येन तं लक्ष्मीकान्तं चक्रधरं ददर्श ।

२८१. **निस्सीमेति** । संसारनिवर्तका इत्यर्थः । "मोक्षमिच्छेज्जनार्द-नात्"दिति प्रसिद्धेः । असुरसंहारकराः, हे अच्युत ! तावकाःसङ्कल्पाः, श्रयमा-णानां आश्रयतां, कल्पतरवः कल्पवृक्षवत् कामितार्थदायिन इत्यर्थः ।

२८२. **अष्टेति** । अष्टौ श्रुतयः श्रोत्राणि वेदाश्च यस्य तादृशस्य विधातुः चतुर्मुखस्य चतसृणां श्रुतीनां हरणात्, असुरकृतादपहारात्, आन्ध्यं चाक्षुषज्ञानहानिः वेदश्चक्षुस्सनातनमिति, तस्य वेदैकचक्षुष्ट्वादिति भावः । किलेति वार्तायाम् श्रोतृणामविस्रम्भं द्योतयति । अहो अष्टसु श्रुतिषु चतुश्श्रुति-हरणमात्रेण आन्ध्यप्राप्तिरिति । श्रोत्रविनाशाच्चाक्षुषज्ञानहानिरिति चानुपपत्तेराश्चर्य-मिति भावः । मत्स्यमूर्तिर्वेदोद्धारणार्थं स्वीकृता, अन्यादृक् अश्रुतदृष्टपूर्वं, अञ्जन-

वहता काच्छपं रूपं वाराहं च श्रियः पते ।
त्वया पुरा नवसुधा वसुधा च समुद्धृता ॥ २८३ ॥

दासत्रासकदैत्येन्द्रदळनत्वरया तव ।
कण्ठीरवाकृतिः कण्ठादधस्तादेव कुण्ठिता ॥ २८४ ॥
भगवन्निन्द्रकार्याय पदाच्चलयता बलिम् ।
भवता हि त्रयो लोकाः पालिता विक्रमैस्त्रिभिः ॥ २८५ ॥

जामदग्न्याकृतिं प्राप्ते जगतामीश्वरे त्वयि ।
नक्षत्रवृत्तिमापेदे चित्रं द्यौरिव भूरपि ॥ २८६ ॥

परन्त्विदानीम्—

हिंसैकाग्रमतिः स मध्यममहो गृह्णन् पुमर्थद्वयं
त्रीन् लोकान् व्यथयन् चतुर्मुखवरात् पञ्चत्वभीतिं जहत् ।
क्रीडाशैलमुदस्य षण्मुखपितुः सप्ताश्वतेजा दिशा-
स्वष्टासु क्रमते रसं तु नवमं लुम्पन् दशास्यो हरे ॥ २८७ ॥

विशेषः नेत्रकालुष्यापहारकमौषधं, तस्य अन्याद्दक्त्वं तु श्रोत्रापहारमूलाऽऽन्ध्यापनोदकत्वादिति ज्ञेयम् ।

२८३. **वहतेति** । नवसुधा नूतनममृतं वसुधा भूमिश्च यथासंख्यमन्वयः । कूर्मरूपिणा अमृतस्य वाराहेण भूमेश्च उद्धारात् ।

२८४. **दासेति** । दासस्य भक्तप्रह्लादस्य भयङ्करस्य हिरण्यकशिपोः ।

२८५. **भगवन्निति** । पदात् स्थानात्, चलयता पातालं नयता त्रयो लोकाः पालिता इति । लोकत्रये निजपादसम्बन्धेन पावनीकरणाद्रक्षणम् ।

२८६. **जामदग्न्येति** । नक्षत्राणां वृत्तिं स्थितिं, द्यौः प्राप । भूपक्षे नेति पृथक् पदं, क्षत्रवृत्तिं क्षात्रियस्थितिं नाविन्दत भूमिः । एकविंशतिकृत्वः परशुरामेण क्षत्रोत्सादनात् । नक्षत्रवृत्तिमिति शब्दश्लेषेण भुव्यपि नक्षत्रसत्त्वप्रतीत्या आश्चर्यम् ।

२८७. **हिंसेति** । मध्यमपुरुषार्थद्वयं अर्थकामौ, पञ्चत्वभीतिं मरणभयं, क्रीडाशैलं कैलासं, सप्ताश्वतेजाः सूर्यस्येव तेजः प्रतापो यस्य तादृशः । नवमं रसं शान्तरसम् । अत्र श्लोके आदितः, हिंसैकाग्रेत्यारभ्य यथाक्रमं एकद्वित्र्यादिसङ्ख्याविशेषनिर्देशः कविना निबद्धो रस्यः ।

तस्मादस्मान् अद्य त्वमेव रमेश गोपायितुमर्हसि " इति ॥२८८॥

इमां च रमापतिरमरचमूविज्ञापनामनाकुलमना निशम्य मनाग्विस्मयमानः कालोचितमेवमुदारमतिरुदाहरत् ॥ २८९ ॥

"यद्यपि देवताहिंसिनं पुलस्त्यकुलीनमेनमहं तु निहन्तुमिच्छामि ॥ २९० ॥

अकुण्ठसुरशौण्डीर्यद्रोहिणीं द्रौहिणीं गिरम् ।
मानयन् मानवीभूय तं हन्ताऽस्मि सुराश्चिरम्" ॥ २९१ ॥

मधुगर्वमुषो मधुगर्वमुषो
विमलाः फणितीः कमलाकमितुः ।
मुनिशर्मकृतः स निशम्य हरिः
मुदमाकलयन्निदमाह वचः ॥ २९२ ॥

"भवतः कृपणानवतः करुणा
यदि नाम तदा मदिनां द्विषताम् ।
भविता समये भुवि तापकृतां
शमनं बत नश्शमनन्तमपि" ॥ २९३ ॥ इति ।

द्रव्यमिव गुणाश्रयं, गुणमिव चलनरहितं, कर्मवद्विभावनाकलितसंविधानं, सामान्यवदनन्यसामान्यं, विशेषमिव नित्याश्रयं,

---

२९१. **अकुण्ठेति** । द्रौहिणीं द्रुहिणसम्बन्धिनीम् ।

२९२. **मध्विति** । मधुनाम्नोऽसुरस्य गर्वहारिणः कमलाकान्तस्य, मधुनो मकरन्दस्य गर्वमुषः तद्वन्मधुरा इत्यर्थः । मुनिशर्मकृतः मुनीनामानन्दावहाः इत्यर्थः । रावणहत्या तेषां सन्तोषात् ।

२९३. **भवतः इति** । मदिनां मदयुक्तानां, द्विषतां शत्रूणां, शमनम् नाशः, नः अस्माकं, तदा अनन्तं शं सुखं भवितेत्यर्थः ।

नैयायिकप्रक्रियामवलम्ब्य भगवन्तं वर्णयति—

२९४. **द्रव्यमिति** । गुणाः रूपरसादयश्चतुर्विंशतिः द्रव्ये । भगवति वात्सल्यसौलभ्यादयो गुणाः । चलनरहितं गुणे कर्माभावात् शाश्वतं च । विभौ आकाशादौ विभुपदार्थे । अनाकलितं असम्भावितं, संविधानं सम्बन्धो यस्य तादृशम् । अन्यत्र, विभावना विशेषेण सङ्कल्पः तेन कलितं संविधानं

समवायमिव विशिष्टबुद्धिसिद्धये समाश्रितं, केवलान्वयिहेतुमिव रूपैश्चतुर्भि-

---

जगत्संविधानं येन तादृशम् । सामान्यं जातिः न विद्यते अन्यसामान्यं जात्यन्तरं यस्मिन् , जातौ जात्यनङ्गीकारात् । समानस्य भावः सामान्यं सादृश्यं, नास्ति अन्यसामान्यं अन्यनिरूपितं सादृश्यं यस्मिन् । " न तत्समश्चाभ्यधिकश्च दृश्यते " इति श्रुतेः । सजातीयशून्यमित्यर्थः । विशेषमिवेति - नित्यानि नित्यद्रव्याणि आश्रयो यस्य तादृशम् । " नित्यद्रव्यवृत्तयो विशेषाः" इति तार्किकोक्तेः । अन्यत्र, नित्यानामनन्तगरुडविष्वक्सेनप्रभृतीनामाश्रयमवलम्बनभूतमित्यर्थः । समवायमिवेति । विशिष्टबुद्धिः, जात्यादिविशिष्टज्ञानं तस्य सिद्धये निष्पत्तये समाश्रितमङ्गीकृतम् । जातिव्यक्त्योर्गुणगुणिनोः क्रियाक्रियावतोर्विशेषनित्यद्रव्ययोरवयवावयविनोश्च समवायाङ्गीकारात् । अयं भावः, गौरित्यादिगोत्वादिविशिष्टव्यक्तिबुद्धिः जातिव्यक्त्योस्सम्बन्धावगाहिनी, विशिष्टबुद्धित्वात् , दण्डी पुरुष इत्यादिविशिष्टबुद्धिवत् । जातिव्यक्त्योस्संयोगादिसम्बन्धासम्भवात् परिशेषात् समवायाख्यस्सम्बन्धः स्वीकार्य इति नैयायिकसिद्धान्तादिति । अन्यत्र विशिष्टबुद्धिः सूक्ष्मचिदचिद्विशिष्टस्य कारणस्य स्थूलचिदचिद्विशिष्टस्य कार्यस्य च बुद्धिः ऐक्यज्ञानं तत्सिद्धये समाश्रितम् ॥

" जायमानं हि पुरुषं यं पश्येन्मधुसूदनः ।
सात्त्विकस्स तु विज्ञेयः स वै मोक्षार्थचिन्तकः ॥"

इत्यादिप्रमाणैः तत्त्वज्ञानस्य भगवदनुग्रहायत्तत्वप्रतीतेः । तदाश्रयाभावे तदसिद्धेरिति भावः । एतावता द्रव्यगुणकर्मसामान्यविशेषसमवायाः षड्भावपदार्था इति नैयायिकसंप्रदायसिद्धपदार्थाश्च वर्णिताः ।

केवलान्वयीति । केवलान्वयी अत्यन्ताभावाप्रतियोगी यो हेतुः 'घटोऽभिधेयः प्रमेयत्वादि'त्यादौ प्रमेयत्वादिरूपः । स च पक्षसत्त्व, सपक्षसत्त्व, अबाधितत्व, असत्प्रतिपक्षत्वात्मकैश्चतुर्भी रूपैः; धर्मैरुपेतः, असन् विपक्षो निश्चितसाध्याभाववान् यस्य तादृशश्च । अभिधेयत्वाभावाप्रसिद्धेः । अन्यत्र , चत्वारि रूपाणि वासुदेवसङ्कर्षणप्रद्युम्ननिरुद्धात्मकानि । तैरुपेतं असद्विपक्षं च, विरोधिरहितमित्यर्थः ।

रुपेतमसद्विपक्षं च, परोक्षमानवदसन्निकर्षाधिगमावहं, अनैकान्तिकमिव विपक्षाधिरूढं, आगमप्रमाणवदाकाङ्क्षितयोग्यार्थसिद्धिकारणं, विधिमिव सार्थभावनं क्रियया वशीकार्यं च, श्रुतिलिङ्गादिप्रमाणवर्गमिव परिकलितपरदौर्बल्यं, देवताग्निमन्त्रादिवदप्रतिनिधिं वैकृतदृष्टार्थधर्म-

---

परोक्षमानं अनुमानप्रमाणं, सन्निकर्षः इन्द्रियार्थसम्बन्धः तदभावेनैव अधिगमस्य विप्रकृष्टवह्न्यादिवस्तुज्ञानस्य सम्पादकम् । अन्यत्र असन्निकर्षेणैव बाह्येन्द्रियासान्निध्येनैव, अधिगमस्य स्वस्वरूपज्ञानस्य आवहम् । "न सन्दृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैनम् । हृदा मनीषा मनसाभिक्लृप्तः" इति चक्षुराद्यसन्निधानेऽपि ध्यायतां दूरत एव स्वस्वरूपमवभासयन्तमित्यर्थः । अनैकान्तिकहेतुस्सव्यभिचारहेतुः "पर्वतो वह्निमान् प्रमेयत्वादि"त्यादिः । विपक्षाधिरूढं विपक्षस्साध्याभाववान्, तत्र वर्तमानम् । अन्यत्र, वेः पक्षिश्रेष्ठस्य गरुत्मतः पक्षौ अधिरूढं गरुडवाहनमित्यर्थः ।

अथ मीमांसाप्रक्रियया विशिनष्टि—

आगमप्रमाणं वेदाख्यप्रमाणं, तद्वत् । आकाङ्क्षितः आकाङ्क्षया लब्धः योग्यः, प्रकरणाद्यनुकूलो योऽर्थः, तस्य सिद्धौ कारणम् । वेदो हि सुसम्बद्धमनुकूलमर्थं उपदिशतीति भावः । विधिमिवेति । विधिर्नाम "ज्योतिष्टोमेन स्वर्गकामो यजेते"त्यादि लिङ्-लोट्-तव्य-प्रत्ययान्तपदघटितवाक्यस्यार्थः ।

सार्थभावनम् । आर्थी या भावना तया सहितम् । अन्यत्र सार्था सफला भावना, इच्छाविशेषः यस्य तादृशम् ।क्रियया अनुष्ठानेन वशीकार्यम् । अन्यत्र वर्णाश्रमानुगुणकर्मानुष्ठानेन वशीकार्यम् । आराधनीयमित्यर्थः । तथा चोक्तम्—

"वर्णाश्रमाचारवता पुरुषेण परः पुमान् ।
विष्णुराराध्यते पन्था नान्यस्तत्तोषकारकः ॥" इति ।

श्रुतिलिङ्गादीति । श्रुतिः, लिङ्गं, वाक्यं, प्रकरणं, स्थानं, समाख्येति वेदे अङ्गत्वसाधकप्रमाणानि षट् । एतेषूत्तरोत्तरदौर्बल्यं तच्छास्त्रप्रसिद्धम् । तथा चोक्तम् "श्रुतिलिङ्गादीनां समवाये परदौर्बल्यं अर्थविप्रकर्षात्" इति । अन्यत्र स्पष्टम् । देवतेति । आदिशब्देन यजमानादयो गृह्यन्ते । अप्रतिनिधिम् प्रति-

जातमिव प्राकृतधर्मप्रतिरोधकं, प्रकृतिवदपारिप्लवधर्मं, ज्योतिष्टोममिव भूयिष्ठाङ्गकलापं, नित्यं सोममुखं सर्वफलसाधनं च, व्याकरणमिव

निधिः, तत्स्थानीयोऽन्यः तद्रहितम्। तण्डुलैर्वा यवैर्वेतिवत् होमसाधनद्रव्यादीनामेकस्याभावे, अन्यस्येव, देवताग्निमन्त्रादीनामभावे तत्स्थाने अन्यस्य निवेशो नास्तीत्यर्थः। अन्यत्र निस्समाभ्यधिकत्वात् प्रतिनिधिशून्यम्। वैकृतदृष्टार्थधर्मजातमिवेति। वैकृतेषु यज्ञेषु, दृष्टार्थं दृष्टप्रयोजनम्। धर्मजातं अङ्गकलापमिव, प्राकृतानां यज्ञविशेषाणां यो धर्मः, अङ्गविशेषः तस्य प्रतिरोधकं निवारकम्। अत्रेदं बोध्यम्---सर्वेषामपि सोमयागानामग्निष्टोमः प्रकृतिः। तथैव पाकयज्ञानां दर्शपूर्णमासेष्टिः। हविर्यज्ञानामग्निहोत्रम्। इतरास्तु विकृतयः। यत्र विकृतिषु धर्मनिर्देशो न स्यात् तत्र 'प्रकृतिवद्विकृति'रित्यतिदेशात्प्राकृतधर्मः स्वीक्रियते। यत्र वैकृतधर्मो दृष्टार्थः स्यात् तत्र प्राकृतधर्मः परित्यज्यत इति। अन्यत्र प्राकृतधर्माः त्रिगुणात्मकाः तेषां प्रतिरोधकम्।

प्रकृतिवदिति। प्रकृतिरग्निष्टोमादिः, विकृतिषु दीर्घसत्रेषु कालयापनार्थं पारिप्लवशंसनमिति किञ्चित् स्तुतिशस्त्रं धर्मतयाऽऽश्रीयते। प्रकृतिषु स नास्ति। अन्यत्र अचञ्चलधर्ममित्यर्थः। स्थिरस्वभावत्वात्। ज्योतिष्टोममिवेति। भूयिष्ठः अङ्गकलापः अङ्गसमूहः यस्य, तस्य प्रकृतित्वेन समग्राङ्गवत्त्वादिति भावः। अन्यत्र अङ्गकलापः, अङ्गभूषणादिकम्। नित्यमिति। सोमः लतारसविशेषः मुखे यस्मिन्, सोम इव मुखं यस्येति च। सर्वेषामपि फलानां स्वर्गादीनां साधनम्। तदुक्तम्"एकैकस्मै कामाय अन्ये क्रतवः आश्रीयन्ते, सर्वेभ्यो दर्शपूर्णमासौ, सर्वेभ्यो ज्योतिष्टोम" इति। अन्यत्र सर्वेषां धर्मादीनां, फलानां पुरुषार्थानां साधनम्। तथा चोक्तम् ---

"आयुरारोग्यमैश्वर्यं भोगांश्चैवानुषङ्गिकान्।
ददाति ध्यायिनां नित्यमपवर्गप्रदो हरिः॥" इति।

व्याकरणमिवेति। व्याक्रियन्ते शब्दा निष्पाद्यन्ते अनेनेति व्याकरणं शास्त्रम्। तदिव प्रकृतीनां "राम-भू" इत्यादीनां, प्रत्ययस्य "सु, ति," इत्यादेर्विधानेन

प्रकृतीनां प्रत्ययविधानेन साधुत्वनिष्पादकमुपदिष्टागमादेशं च, शारीरकमिव सुमनसाममृतप्रदं, योगशास्त्रमिव समाधिकरहितं, सांख्यतन्त्रमिव निरीश्वरं, पाशुपतमिव श्रीकण्ठगुणस्थैर्यनिर्वाहकं, सौगतसंप्रदायमिव दूरीकृतमन्युं, कमप्यन्यादृशमहिमानं त्रिधामानमानम्य धैर्यमवलम्बमानं गीर्वाणसैन्यं साधुवदनमिव नासत्यकलितं, आढ्यसदनमिव वसुभिरलङ्कृतं, जामदग्न्यचरितमिव रौद्रोल्लासनास्पदं, पुण्ड्रेक्षुवदादित्यजनभासुरं, वियोगिनीवदनमिव बलोदञ्चितमरुदितं मुनिकुलमिव पुरस्कृतकौशिकं, तत्सङ्गराङ्गणोन्मुखं प्रातिष्ठत --- यत्र युद्धाय बद्धश्रद्धा निर्धारितस्वपक्षविजया विरोधिवाहिनी समवतस्थे ॥ २९४ ॥

अनुशासनेन साधुत्वनिष्पादकम् । उपदिष्टः विहितः आगमः तुगादिः, आदेशः यणादिः यस्मिन् तादृशम् । अन्यत्र प्रकृतीनां प्रजानां, प्रत्ययविधानेन, ज्ञानोत्पादनेनेति । उपदिष्टः आगम एव आदेशः आज्ञा येनेति च । शारीरकं ब्रह्ममीमांसाशास्त्रमिव, सुमनसां विदुषां देवानां च । अमृतप्रदं मोक्षदायकं, समुद्रमथनसाध्येन सुधासम्पादकम् ।

योगशास्त्रमिवेति । समाधिकराः चित्तवृत्तिनिरोधिनः तेषां हितम् । पुरुषार्थसम्पादकत्वात्, समेन अधिकेन च रहितं "न तत्समश्चाभ्यधिकश्च दृश्यते" इति श्रुतेः ।

साङ्ख्यतन्त्रम् कापिलं शास्त्रमिव निरीश्वरं ईश्वरानभ्युपगन्तृ, ईश्वरान्तररहितं च । पाशुपतं पशुपतिमतमिव, श्रीकण्ठस्य शिवस्य, गुणानां स्थैर्यनिर्वाहकं, दार्ढ्यापादकम् । अन्यत्र श्रियो लक्ष्म्याः कण्ठगुणस्य माङ्गल्यसूत्रस्य स्थैर्यनिर्वाहकम् । सुगताः बौद्धभेदाः तत्सम्प्रदायमिव । मन्युः यज्ञः क्रोधश्च । बौद्धानां वेदबाह्यत्वात्, भगवतः प्रसादशीलत्वाच्च । त्रिधामानं विष्णुमानम्य प्रणम्य ।

साधुवदनमिवेति । असत्याकलितं न भवतीत्यर्थः । अन्यत्र नासत्यावश्विनौ "नासत्यावश्विनौ दस्रा"वित्यमरः । वसूनि धनानि अष्टवसवश्च । जामदग्न्यमिवेति । रौद्रस्य रुद्रसम्बन्धिनः, उल्लासस्य प्रमोदस्य आस्पदं, जामदग्न्यो रुद्रशिष्य इति प्रसिद्धम् । अन्यत्र रौद्रस्य एकादशरुद्रसम्बन्धिनः उल्लासनस्य

सा च बहुमुखवाहिनी विजृम्भितप्रतिकूलपरीतापा, व्यालोल-परमकरवाला, समुन्मिषत्सारसमरालिका, सनादा, स्फुरद्रुचिरङ्कुश-कुन्तादिपीतपरकीलाला, बृन्दारकसैन्यमास्कन्दितुकामा, सर्वतः सदर्पं प्रासर्पत् ॥ २९५ ॥

स्वस्थानवृद्धिमदनीकलसद्विपक्ष-
स्फायन्महाहवमहीनगुणैरवाप्तम् ।
युद्धाजिरं समधिकस्तुतिशस्त्रजाल-
मुच्चैरगाहत गवामयनस्य लक्ष्मीम् ॥ २९६ ॥

मोदस्य आस्पदम् । पुण्ड्रेक्षुः स्वादुतमः इक्षुविशेषः, आदेः उभयतोप्यादि-भागस्य त्यजनं, छेदेन त्यागः, तेन भासुरम् । प्रतीयमानस्वादम् । अन्यत्र आदित्यजनैः द्वादशादित्यलोकैः । वियोगिनी विरहिणी, बलोदञ्चितैः बलोद्भूतैः, मरुद्भिर्देवभेदैवः इतं व्याप्तम् । अन्यत्र बलादुदञ्चतीति बलोदञ्च । अतिशयेन उदञ्च, उदञ्चत्तमं रुदितं रोदनं यस्मिन्निति च । पुरस्कृतेति । कौशिकः विश्वामित्रः इन्द्रश्च ।

२९५. **सा चेति** । सा च असुरसेना च । बहुमुखं वहति गच्छतीति तादृशी । बहुमुखा वाहिनी नदी च ।

विजृम्भितः प्रतिकूलानां शत्रूणां परीतापस्सन्तापः यया । नदीपक्षे विजृम्भितं प्रतिकूलं कूले कूले । परीतं व्याप्तं, आपं अपां समूहः यस्या इति । व्यालोलाः परमाः करवालाः खड्गाः यस्यां, अन्यत्र व्यालोलाः पराणां महतां, मकराणां वालाः यस्यां सा ।

समुन्मिषन्ती, सारा श्रेष्ठा अरिविजयक्षमा इत्यर्थः । समरालिः युद्धपरम्परा यस्यां, अन्यत्र सारसाः पक्षिविशेषाः, मरालिकाश्च । स्फुरद्रुचिः प्रकाशमाना, अङ्कुशैः कुन्तैश्चायुधविशेषैः, पीतं परकीलालं, शत्रुरक्तं यया, अन्यत्र स्फुरद्रुचयः कान्तिमन्तः, रङ्कवः कुरङ्गाः, शकुन्ताः पक्षिणः, तैः पीतं परं कीलालं जलं यस्या इति ।

२९६. **स्वस्थानेति** । स्वः स्वर्गस्य स्थानं तत्र वृद्धिमदभिवृद्धम् । अन्यत्र स्वस्थान एव वृद्धिं प्राप्तं, गवामयने सत्रे स्थानात्स्थानात् वृद्धिस्तच्छास्त्र-

अथ सुकविप्रबन्धवत्सदसि संघर्षेण शोभमानं, कुकविप्रबन्धवदुच्चापशब्दं, उद्यानमिव शिलीमुखक्षतसुमनस्कं, मदोत्कटकरटिपटलविकटदन्तकालायसमुसलदृढविघट्टनोद्भिन्नस्फुलिङ्गदह्यमानयोधश्रमहरानवरतवसासिक्तमत्तगृध्रपक्षसमीरणसमुपनतमक्षिकापलायनसुखितकरालकरवालघातबहिरुद्गतजाङ्गलाङ्गकतुरङ्गसंघातं, सदा विदारितमदान्धभटशिरःक्षरद्रुधिरपङ्किलतया तदीयकरोटीसङ्कदन्तुरतया च गतिमान्द्यकारिषु प्रदेशेष्वपि प्रतिभटमकुटतटखचितमरकतशकलप्रातिभासिकदूर्वाङ्कुरग्रहणचापलसंघटितझटितिचङ्क्रमणरथ्याश्वविलोकनपरिमुदित-

---

प्रसिद्धा । अनीकैस्सैन्यैः लसन्तः उत्सुका ये विपक्षाश्शत्रवः तेषु स्फायन्, महान् आहवो युद्धं यस्मिन् तत् । अनीकेन अधिदेवतासमूहेन लसन् विपक्षे स्थानविशेषे, स्फायन् महान्, हूयतेऽस्मिन्निति हवोऽग्निर्यस्मिन् "अग्नयेऽनीकवते पुरोडाश" इत्यादिषु अग्नेरनीकवत्त्वं प्रसिद्धम् । अहीनगुणैरुत्कृष्टगुणैस्सुरासुरवीरैरवाप्तं व्याप्तम् । अहीनः क्रतुविशेषः, तस्य गुणैरङ्गैरवाप्तं, समधिका स्तुतिः स्तोत्रं शस्त्रजालमायुधसमूहश्च यस्मिन् । अन्यत्र स्तुतिशस्त्रं यज्ञाङ्गस्तवविशेषः ।

॥ अथ देवासुरयोस्समरं वर्णयति ॥

२९७. **अथेति** । सुकविप्रबन्धमिवेति । सङ्घर्षः वाक्यार्थचर्चा । तेन शोभमानम् । समरपक्षे तु सङ्घर्षः पराभिभवेच्छा ।

कुकवीति । उच्चाः अपशब्दाः यस्मिन्, उत् चापशब्दश्च यस्मिन्निति । शिलीमुखा भ्रमरा बाणाश्च, सुमनसः पुष्पाणि देवाश्च । मदोत्कटेति । गजदन्तसंयोजितकालायसमुसलानां परस्परविघट्टनेन, उद्भिन्नैरग्निकणैर्दह्यमानानां योधानां, सन्तापं गृध्रपक्षवाताः परिहरन्ति । तैरेव समीरणैरभिहताः, खड्गविक्षततुरङ्गाङ्गनिर्गलितपिशितास्वादनाय मिलिता मक्षिकाः पलायन्ते । तस्मात्सुखितास्तुरङ्गा यस्मिन्नित्यर्थः । गतीति । पङ्किलत्वेन, निम्नोन्नतत्वेन च समराङ्गणस्य, मन्दं मन्दं गच्छन्तोऽपि रथ्याश्वाः मरकतशकलेषु दूर्वाङ्कुरभ्रान्त्या तद्ग्रहणचापलेन सङ्घटितचङ्क्रमणा भवन्ति । तेषां विलोकनेन, अनायाससम्पादितनिजमनो-

रथिकसारथिकं, निरर्गलधनुर्गुणटङ्कारमृदङ्गारवविलसदुच्चावचसुभटचपेटाघातवाचाटितरिपुकपोलतालयुगध्वानयुक्तमृत्युनर्तकप्रवर्तितकबन्धनर्तनाभिनन्दिशकुन्तगोष्ठीकं,गुरुतरद्विरदकुणपगणपरिवृतिलब्धरोधस्के निशातविशिखनिपातितानां धन्विनां शिरोरुहैर्दर्शितशैवालजालके करच्युतैः करवालैः प्रकटीकृतपाठीनवाटिकापरिपाटिके तथाविधैः खेटकूटैराढौकितकमठपटले नयनात्मनां मीनानां हठाद्ग्रसनादरेणेव स्तिमितैर्नक्तंचराणां व्यात्तवदनगर्तवर्तिभिर्दन्तमयैर्बकैरधिष्ठितप्रतिकूले निकृत्य निपातिताभिस्तदीयबाहुपरम्पराभिः प्रचण्डडुण्डुभमण्डलीभिरिव परिमण्डिते महति लोहितकासारे पर्युषितभावघनीभवदसृग्घुसृणक्षोदैरुद्वर्तितगात्रीभिरस्थिसन्धिस्नेहसन्दोहदिग्धान् चितानलशिखानिकाशान् केशपाशान् अस्थिशकलसान्द्रैरान्त्रकृतमाल्यैरलङ्कृतवतीभिः स्थविष्ठकुणपवरिष्ठवपामयकञ्चुलिकापरिमण्डितस्तनमण्डलाभिः तदीयचर्मनिर्मितानि वसनानि वसानाभिरभङ्गुरतुरङ्गमजाघनीसंघटितमेखलाकलापालंकृतगुरुमध्याभिः व्यात्तपरुषकुणपवदनगर्तोत्खातरदनकदम्बगुम्भितमुक्ताहाराभिः प्रकटायसकङ्कटप्रकरकरवालघातनिघर्षसंजनितधनंजयपुञ्जपचनपिञ्जरीभूतपललशकलचर्वणगर्विताभिः विकटकरोटिकाचषकपिहितवसारससुरापानपीनमदविकाराप्यायितमदनचापलाभिः वेतालीभिस्सह वारिकेलीरसमुपभुञ्जानानां पिशाचयूनामट्टहासारभटीभिः प्रकटीकृतलोकसाध्वसं किमपि समरममरनिशाचरसेनयोरजनि त्रिविष्टपाभ्याशे ॥ २९७ ॥

रथाः रथिकास्सारथयश्च मोदन्त इत्यर्थः । निरर्गलेति । मौर्वीटङ्कारेषु मृदङ्गारवत्वं कपोलचपेटाध्वनिषु तालयुगध्वानत्वं, मृत्यौ नर्तकत्वं, शकुन्तगोष्ठीषु तदभिनन्दिसामाजिकत्वं च उपचर्यते ।

गुरुतरेति । लोहितकासारावयवान् रूपयति । परिवृतिरावरणम् । तदेव रोधः, समरनिपतितानां शिरोरुहाण्येव शैवालजालानि, करवाला एव पाठीनाः मत्स्यविशेषाः, खेटकूटा एव कमठपटलानि, नयनान्येव मीनाः, तद्ग्रहणव्यग्राः, व्यात्तवदनगर्तवर्तिनो विवृतवक्त्रबिलनिष्ठाः दन्ता एव कूलोपविष्टा बकाः, अधो निपतिता बाहव एव डुण्डुभा जलसर्पाश्चेति ।

कश्चिद्देवभटोऽथ कस्यचिदरेश्छेदाय खड्गं झटि-
त्युद्गृह्णन् करकङ्कणस्थितहरिद्रत्नच्छवीनां छटाः ।
तस्याऽऽस्ये विकटाट्टहासविधिषु व्याप्ते प्रसृप्ता मुहुः
तृण्यामेव विलोकयन्निववृते तद्दारणाद्दारुणात् ॥ २९८ ॥
अमर्त्योऽन्यः कण्ठाभरणघनशोणोपलरुचीः
असृग्वीचीर्जानन्नधिनिजभुजं वैरिशरजाः ।
प्रबिभ्राणः क्रोधं परममपराद्धेषुमपि च
द्विषं प्रत्यादत्त प्रतिहननहेतोरिपुगणम् ॥ २९९ ॥
क्षिप्ते वैरिकरीन्द्रमूर्ध्नि विशिखे केनाऽपि नाकौकसा
तस्याऽपास्य कटं निपत्य नदतां पीडोद्गमेनालिनाम् ।
पङ्क्तौ निर्जरमूर्ध्नि दिव्यकुसुमैः सान्द्रे पतन्त्यां रुषा
दन्ती हन्ति हि शृङ्खलाभिररिमित्यानन्दि तत्स्वामिना ॥३००॥

तत्र पिशाचयुवतीभिस्सह पिशाचयूनां जलक्रीडामाह-पर्युषितेत्यादिना । पर्युषितभावेन घनीभवन्ति, यातयामत्वेन शुष्कीभवन्ति यान्यसृञ्जि तेषां घुसृणक्षोदैः स्नानीयचूर्णैरित्यर्थः । उद्वर्तितं, उत्सादितं "उद्वर्तनोत्सादने द्वे" इत्यमरः ।

अस्थिसन्धिगतस्नेहः केशसंस्कारानुकूलं तैलमिति भावः । जाघनी पृष्ठभागवर्ती जुगुप्सितस्सिराविशेषः । शिष्टमखिलं स्पष्टम् ।

२९८. **कश्चिदिति** । धृतखड्गस्य देवभटस्य कङ्कणस्थितमरकतमणि-प्रभायां तृणभ्रान्त्या रणान्निवृत्तिरभिधीयते । हरिद्रत्नच्छवीनां, मरकतत्विषां छटाः समूहान् खड्गम् उद्गृह्णन् कश्चिद्देवभटः । विकटेति । विपुलाट्टहासव्याप्तते तस्यास्ये प्रसृप्ताः पूर्वोक्तच्छटाः, तृण्यां तृणसमूहमेव पश्यन्, दारुणात् क्रूरात्, तद्दारणात् तस्य अरेश्छेदनात्, निववृते निवृत्तः । तृणग्राहिणः शत्रवो न हन्तव्या इति हि धर्मयुद्धसमयः ।

२९९. **अमर्त्य इति** । कस्यचिन्निजभुजप्रसृतायां कण्ठाभरणकान्तौ वैरिशरक्षतजनितरक्तभ्रान्त्या, अपराद्धेषोरप्यरेर्हननोद्योगः प्रतीयते । "अपराद्ध-पृषत्कोऽसौ लक्ष्याद्यश्च्युतसायकः" इत्यमरः ।

३००. **क्षिप्त इति** । पीडोद्गमनेन व्यथाप्राप्त्या, अलीनां भ्रमराणां, पङ्क्तिः ततो गजकटान्निर्गत्य, योधिनः देवस्य मूर्ध्नि पुष्पसमूहे मकरन्दलोभा-

यष्ट्या घ्नता द्विषदसिं विमले तु लग्नं
स्वप्रातिभासिकवपुः स्वयमेव योद्धा ।
केनाऽप्यभज्यत ततः सरुषा परेण
तत्पारमार्थिकवपुश्च तदा व्यदारि ॥ ३०१ ॥
शूरस्य कस्यचिदिषुक्षतगाढवक्षाः
रक्षोभटः प्रतिनिवृत्य पलायमानः ।
रक्तस्रवैररुणिमानमुरस्यवाक्षीत्
स श्यामिकामधिमुखं तु जनोपहासैः ॥ ३०२ ॥
कङ्को निशाचरशिरो युधि कङ्कपत्र-
दत्तस्वरैस्सुरशरैर्दलितं जहार ।
आस्माकपक्षसहकारबलार्जितोऽय-
मंशोऽर्ह एव न इतीव कृतोच्चघोषः ॥ ३०३ ॥

दपतत् । तां दृष्ट्वा गजस्वामी निजगज एव शृङ्खलाभिस्तं हन्तीति बभ्राम । अयमाशयः, असुरसैन्यस्थगजमूर्ध्नि गंडस्थले मदजललोभात् भ्रमराः पङ्क्तिशः पूर्वमासन् । देवभटेन गजकुम्भतटे बाणे प्रयुक्ते सति, बाणहतिव्यथया तत्रस्थाः भ्रमराः, ततो निर्गत्य, देवभटमूर्ध्नि स्थितकुसुमेषु मकरन्दप्रत्याशया निपेतुः, तान् दृष्ट्वा गजस्वामी, स्वकीयगज एव शृङ्खलाभिर्देवभटं हन्तीति बभ्राम । मस्तकोपरि अनुस्यूतभ्रमरपङ्क्तेः शृङ्खलातुल्यत्वात् तथा भ्रमः इति ।

३०१. **यष्ट्येति** । द्विषदसिं यष्ट्या घ्नता केनचित् योद्धा निर्मले तत्र कृपाणे लग्नं प्रतिबिम्बितं स्वप्रातिभासिकवपुः स्वेनैव भग्नं आश्रयनाशे तस्याप्यभावात् । ततः तन्निमित्तरोषयुक्तेन परेण योद्धा तदीयपारमार्थिकवपुश्च व्यदारि दारितम् ।

३०२. **शूरस्येति** । रक्षोभटः, राक्षसभटः, कस्यचिच्छूरस्य बाणहतवक्षाः रक्तप्रवाहैरुरसि आरुण्यमावहत् । स एव मुखे जनोपहासैः पलायननिमित्तपरिहासैः मुखे श्यामिकां मालिन्यमवाक्षीत् आवहत्, रक्तस्रवैरारुण्यं वक्षसि युक्तम् । सितैरुपहासैः मुखे श्यामत्वमयुक्तम् । म्लानवदनोऽभूदिति भावः ।

३०३. **कङ्क इति** । कङ्कः गृध्रः, युधि सुरशरैः कङ्कपत्रैश्शब्दायमानैः दलितं राक्षसशिरो जहार । आस्माकः अस्मदीयः पक्षः गरुत्, पक्ष्यश्च,

केनचिद्युधि सकृत्प्रयोजितोऽ
प्युच्चकैरसिररेगलं तथा ।
अच्छिनत्त्वरितमाहवे समं
तत्कलत्रगलसूत्रमप्यहो ॥ ३०४ ॥

एकतस्तु केषांचित् —

गात्रालयादरिशरोत्करघातभीताः
प्रस्थातुमामिषभुजामसवः प्रवृत्ताः ।
युद्धाजिरे किमु मुखाध्वनि दुर्निमित्तं
दर्भाङ्कुरस्खलनमेत्य पुनर्निवृत्ताः ॥ ३०५ ॥

धनुष्मते तत्र रिपून् प्रहर्त्रे दत्त्वाञ्जलीन् केचिदसून् ररक्षुः ।
ये नाम तस्मै ददुरञ्जलीन् न स्वानामगृह्णन्नुदकाञ्जलींस्ते ॥ ३०६ ॥

गर्वोन्नमद्बलिबलक्षपणप्रवीणः
प्राप्तो जनार्दनतया प्रथनं गरीयः ।
विक्रान्तलोक इह सन्निहितो हिताय
कृष्णः कृपाण इति तारतमी किमास्ते ॥ ३०७ ॥

अंशः नः अस्माकं अर्ह एव । आर्जकांशग्रहणं निर्विवादमेवेति भावः । वेगातिशयार्थं शरेषु कङ्कपत्रबन्धनं प्रसिद्धम् ।

केचिद्राक्षसा मुखे तृणं निधाय स्वजीवितं ररक्षुरित्याह—

३०५. **गात्रेति** । शरीरं हित्वा कण्ठमार्गेण प्रस्थातुकामानां प्राणानां दर्भाङ्कुरस्खलनमेव, गमनविरोधिदुर्निमित्तमित्युत्प्रेक्षा । लोके हि प्रस्थितानां जनानां गमनस्खलनं चेदपशकुनमिति प्रयाणान्निवृत्तिः प्रसिद्धा ।

३०६. **धनुष्मत इति** । प्रहर्त्रे अञ्जलिं ये न चक्रुः, ते स्वानां ज्ञातीनां उदकाञ्जलीन् निवापाञ्जलीन्, अपिबन्नित्यर्थः । मृता इति यावत् । स्वशब्दस्य ज्ञातिवाचकत्वात् 'स्वमज्ञातिधनाख्यायामि'ति सर्वनामसंज्ञानिषेधः ।

३०७. **गर्वेति** । गर्वेण उन्नमन् उद्धतः बलिः तन्नामाऽसुरः बलशाली च, तस्य बलनाशनसमर्थः । जनार्दनतया जनार्दन इति नाम्ना, जनहिंसकतया च । प्रथनं ख्यातिं प्राप्तः, विक्रान्तलोकः त्रिविक्रमाक्रान्तभुवनः, निगृहीतलोकः,

तदनु सुरराजभटैर्विद्राव्यमाणां यातुधानसेनाममर्षशाली सुमाली समाश्वासयन् मदमूढमनाः सङ्गरभुवि संक्रम्य सद्य एव सद्विद्यामिव दुरूहः सुरवरूथिनीं शरवर्षसंजनितोपद्रवां विद्रावयामास केकसीगुरुः ॥३०८॥

तां च ततः कान्दिशिकां सान्त्वयन् तेजोविजितविभावसुः सावित्रनामा वसुरसुरपतिषु विहितहृदयगदया गदया विदयाशयः पूर्णरोषमचूर्णयत्तूर्णं दुर्णयमहार्णवं सुमालिनम् ॥ ३०९ ॥

तरसाशाधिपोऽप्याजौ तरसाशाधिपार्दनः ।
निर्माता महतामाधेर्निर्मातामहतामगात् ॥ ३१० ॥

शरवर्षजकीलालपङ्किले दुर्दिने तदा ।
भीतिकृत्समरालीषु मेघनादो व्यजृम्भत ॥ ३११ ॥

सत्वरं प्राप्य संग्रामचत्वरं रावणिं सुरान् ।
जयन्तमभिदुद्राव जयन्तस्सह सेनया ॥ ३१२ ॥

मन्दोदर्युदरजयुद्धभीरुरात्मा
मन्दोदर्युदरमगात् क्षतो भटौघः ।
आश्चर्यं तदिषुधुतं जयन्तमाजौ
अस्वप्नावलिरजयन्तमेव जज्ञे ॥ ३१३ ॥

हिताय जगद्धिताचरणाय, सन्निहितः शत्रून् हन्तुं सन्निकृष्टः, कृष्णः वासुदेवः कृष्णवर्णश्च । कृपाणः खड्ग इत्यनयोस्तारतमी, गुणक्रियाकृतं तारतम्यं नास्तीत्यर्थः । उभयोरपि तुल्यगुणक्रियत्वात् ।

३०८. **तदन्विति** । सद्विद्यां ब्रह्मविद्यां, दुरूहः दुस्तर्कः । दुस्तर्कस्य ब्रह्मविद्याविरोधित्वात् ।

३१०. **तरसाशेति** । आशाधिपानां दिक्पालकानां अर्दनः पीडनः तरसाशानां मांसाशिनां अधिपः रावणः तरसा शीघ्रं, महतां, साधूनां आधेर्मानसव्यथाया निर्माता सः, निर्मातामहतां, मातामहहानिमगादित्यर्थः ।

३११. **शरेति** । सः मरालीषु इति छेदः मेघनादस्य हंसभीकृत्त्वात् ।

३१३. **मन्दोदरीति** । मन्दः कुण्ठितशक्तिः, दर्युदरमगात् भयात् पर्वतगुहां प्रापेत्यर्थः । अजयन्तं जयन्तभिन्नं, जयरहितं च । मन्दोदर्या उदरजः

ततश्च — मायासमासादितशक्तिनैव-
मायासमासां सृजता चमूनाम् ।
पराकृते तेन परा जयन्ते
सुरास्त्वमन्यन्त पराजयन्ते ॥ ३१४ ॥

अनन्तरमन्तर्हितं जयन्तमवधार्य पुरन्दरः सक्रोधं रथमारुह्य स्वयमेव सङ्गराङ्गणमलंकुर्वन् सर्वतो गर्वतो विबुधकदनं विदधानं यातुधानप्रधानसैन्यमभिध्यां निदिध्यासनप्रकर्ष इव सहर्षमुत्पादितशरवर्षो बलात् पलाययत् ॥ ३१५ ॥

प्रतिक्षणक्षिप्तपृषत्कषण्डयोः
स्फुटाट्टहासस्फुटदण्डभाण्डयोः ।
अभूतपूर्वं समरं प्रचण्डयो-
रभूदथाखण्डलपङ्क्तिकण्ठयोः ॥ ३१६ ॥

इत्थं वृद्धश्रवसा युद्धं वर्धयन्तं स्वपितरं निशाम्य, 'सौम्येतरहृदये मय्यस्मिन्नुदग्रविग्रहपरसुरवर्गनिग्रहबद्धाग्रहे महोग्रे स्वयमग्रत एव जाग्रति, कुतः परिश्राम्यत्यार्य' इति तं निवार्य स्वयममोघनादो मेघनादः किमपि समरममरचक्रवर्तिना सह प्रावर्तयत् ॥ ३१७ ॥

तत्पुत्रः मेघनादः, तज्जन्यं च । तत्कृतयुद्धभीरुः, भटौघः, मन्दोदर्युदरमिति । समस्तपदे भयहेतुमेव प्रविवेशेति प्रतीत्या आश्चर्यम् । तथा अस्वप्नानाममराणां आवलिः आजौ युद्धे, तदिषुधुतं मेघनादबाणहतं जयन्तं जयन्तभिन्नं जज्ञे इत्याश्चर्यम् । जयरहितं जज्ञे इति परिहारः ।

३१४. मायेति । जयन्ते तेन पराकृते सति पराः इतरे ते सुराः, देवाः पराजयममन्यन्तेत्यन्वयः । 'पूर्वपरावरे'त्यादिना जसि विकल्पान्न शी भावः ।

३१५. अनन्तरमिति । निदिध्यासनप्रकर्षः अभिध्यामिव "अभिध्या तु परस्वविषये स्पृहा" इत्युक्तम् ।

३१६. प्रतिक्षणेति । आखण्डलपङ्क्तिकण्ठयोः इन्द्रदशकण्ठयोः ।

३१८. प्रकाशमान इति । पुरुहूतचापे इन्द्रधनुषि । इन्द्रस्य चापे च । उद्यन्ती बहुकन्धरस्य, दशग्रीवस्य श्रीः जयलक्ष्मीः अन्यत्र बहूनां

प्रकाशमाने पुरुहूतचापे
विजृम्भमाणो युधि मेघनादः ।
अदृश्य उद्यद्बहुकन्धरश्रीः
अचिच्यवत् सायकवृष्टिमभ्रात् ॥ ३१८ ॥

'मायाविना मया विना को नाम दिवौकोनाथजेते'ति हृदि निधाय मायामयबलेन निरायास एव रावणिर्निर्जित्य वज्रिणमभिगर्जन् बद्ध्वा च तं पितुरन्तिकमानीय तेन पुरस्कृतः पुरमेव स्वीयमनयत् ॥ ३१९ ॥

अथ त्रिबुधगणेन समं कमलसंभवः स्वयमेव रावणाभ्यर्णमेत्य तदात्मजाभ्यर्थितं सम्पूर्णयजनप्रसन्नाद्वह्नेस्सहयो रथः परमनोरथविभञ्जकः समुदञ्चत्विति वरं च प्रदाय विरिञ्चिः शक्रजिदिति नाम च विधाय मोचयति स्म तत्कारागृहात्तुरासाहम् ॥ ३२० ॥

स च शचीपतिस्तद्बन्धनान्मुक्तोऽपि लज्जापाशबन्धादवनमितवदनः विरिञ्चिं किंचिदप्यनालपन् तेन तावदेवं उच्यते स्म ॥ ३२१ ॥

" हन्त स्वादूभवति यदसत्कर्म निर्माणकाले
नीचानां तत्पचनसमये यातनामातनोति ।
मन्दाग्नीनां निगरणदशास्वेव सन्तोषहेतुः
माषापूपः किमथ न दिशत्यक्षयं कुक्षिरोगम् ॥ ३२२ ॥

कन्धराणां, जलधराणां श्रीः समृद्धिः यस्य सः मेघनादः इन्द्रजित् मेघध्वनिश्च ।

३२०. अथेति । तदात्मजाभ्यर्थितं इन्द्रजिदभ्यर्थितं वरमित्यन्वयः । सम्पूर्णात् पूर्तिं प्राप्तात्, यजनात् प्रसन्नादग्नेः, सहयः साश्वः रथः, परमनोरथभञ्जकस्समुदञ्चत्विति वरः ।

३२२. हन्तेति । यदसत्कर्म करणकाले मनोरमं भवति, तदेव तस्य परिपाककाले तीव्रवेदनामातनोति । इममर्थं दृष्टान्तेन समर्थयति । मन्दाग्नीनामिति अन्यत् स्पष्टम् ।

स्वच्छन्दं संचरन्ती बत परयुवती प्रागुपच्छन्दनीया
तत्स्वामी विप्रलभ्यः कथमपि विदुषामभ्युपेत्यापि गर्हाम् ।
सौख्याभासं सकम्पं क्षणिकमुपयताऽऽकल्पमल्पेतरार्तिः
दुष्कीर्तिश्चानुभाव्ये तदपि परवधूं वष्टि कष्टं बुधोऽपि ॥ ३२३ ॥

अध्येषि तस्य परमाद्भुतवस्तुलाभ-
लुब्धः पवित्रचरितेऽपि ऋषेः कलत्रे ।
शृङ्गारवैकृतमवाप्य सुरत्नलोभात्
अङ्गारहारिण उपैष्यसि वर्त्म दस्योः ॥ ३२४ ॥

शृणु चैतत् —

स्वात्मन्येव स्थितमविदितं हन्त जन्तोः पुराणं
पापं भूयः प्रथयति फलं पक्त्रिमं कालयोगात् ।
वीटीचूर्णप्रकृतिरिह या शर्करा तत्र गूढो
वह्निर्दाहं दिशति समये व्यञ्जितो वारिसेकैः ॥३२५ ॥

---

३२३. **स्वच्छन्दमिति** । उपच्छन्दनीया प्रलोभनीया, तत्स्वामी तस्याः पतिः, विप्रलभ्यः वञ्चनीयः । सौख्याभासं न वस्तुतस्सौख्यमित्यर्थः । सकम्पं भयादिति भावः । उपयता प्राप्नुवता अल्पेतरार्तिः दुष्कीर्तिश्चेत्युभे आकल्पमनुभाव्ये इत्यर्थः । तदपि तथापि, वष्टि इच्छति । कष्टमित्याश्चर्ये ।

३२४. ब्रह्मा भूतपूर्वमिन्द्रस्य दुश्चरितं वर्तमानवत्कृत्य विवृण्वन् शिक्षते **अध्येषीति**—तस्य प्रसिद्धस्य ऋषेः कलत्रे शृङ्गारवैकृतमवाप्य अध्येषि उत्सुको गच्छसि । अत एव रत्नलोभात्, अङ्गारहारिणो दस्योः वर्त्म उपैष्यसि । अकृत्यकरणं सर्वथा अनर्थावहमित्यर्थः ।

३२५. **स्वात्मन्येवेति** । पुराणं जन्मान्तरे कृतमपि पापं परिपाककाले फलं दिशत्येव । न तु नश्यति । अत्र अनुरूपं दृष्टान्तमाह ।

वीटीचूर्णेति । ताम्बूलसम्मेलनार्हसुधाचूर्णप्रकृतिः या शर्करा । तत्र गूढः अप्रकाशः वह्निः तदुपरि जलसेकेन व्यञ्जितस्सन्, दाहं तापं, यथा जनयति तद्वत् ।

ततश्च, तस्यैव पश्यत्पादावरोधपरिमर्शनपातकस्य फलमेतद्भवताऽनुभूतमिति तेन मागमस्त्वं विषादम् ॥ ३२६ ॥

प्रतिकूलेऽनुकूले वा प्राप्ते विधिविपाकतः ।
न खेदं न च सम्मोदं पण्डितः प्रतिपद्यते ॥ ३२७ ॥

सम्प्रति पुनस्सर्वानर्थनिवर्तकं वैष्णवं यागमनुष्ठाय ततो लब्धशुद्धिर्यथापुरं स्वपुरं उपयाही"त्यादिश्य स्वलोकमाकलितवति भगवति पितामहे, महेन्द्रस्तथैव तदादिष्टामिष्टिमनुष्ठाय त्रिविष्टपं गत्वा दिव्यं साम्राज्यमभोभुज्यत" इति ॥ ३२८ ॥

दुरिततिमिरभानोः तद्वचः कुम्भसूनोः
सह मुनिभिरतन्द्रस्सादरं रामचन्द्रः ।
सदसि किल निशम्य प्राञ्जलोकाभिगम्य-
स्सवितृकुलवतंसश्शिश्रिये विस्मयं सः ॥ ३२९ ॥

पूषान्ववायधौरेयः पुनरेव नरेश्वरः ।
पारावारस्य पातारं पर्यपृच्छत्तपोधनम् ॥ ३३० ॥

"अशेषविजयित्वं यदुत्सृष्टं तस्य रक्षसः ।
तस्यापवादं शुश्रूषे तवैव वचना"दिति ॥ ३३१ ॥

इदं भाषितं श्रुत्वा कुम्भसम्भवो भूयः कथयितुमारेभे ॥ ३३२ ॥

---

३२६. **ततश्चेति** । पश्यत्पादः अक्षचरणो गौतमः, तस्य अवरोधः पत्नी अहल्येत्यर्थः । एतत् इन्द्रजित्कृतपराभवरूपं फलम् ।

३३०. **पूषेति** । पारावारस्य समुद्रस्य पातारं पानकर्तारमगस्त्यम् ।

३३१. **अशेषेति** । उत्सृष्टम् उत्सर्गतः प्राप्तं, सामान्यतः सम्पादितम् । तस्य अपवादं क्वचिदभावं शुश्रूषे श्रोतुमिच्छामि । 'न हिंस्यात् सर्वा भूतानी'ति सामान्यनिषेधस्य "अग्नीषोमीयं पशुमालभेत" इति विधिरपवादो यथा तद्वदिति । उत्सर्गापवादन्यायसमन्वयो बोध्यः ।

ततः क्षितिसुतापते तरलयन् धरामण्डलं
दिशाधिपविनिर्जयद्विगुणितावलेपोदयः ।
विजेतुमयमर्जुनं विदलिताखिलद्विड्जनं
पुलस्त्यकुलपांसनः पुरमवाप माहिष्मतीम् ॥ ३३३ ॥

ततः प्रागेव तन्वङ्गीभिस्सह तोयक्रीडाचिकीर्षया नर्मदामुपगतवन्तं कार्तवीर्यं तदीयमन्त्रिमुखादाकर्णयदुदीर्णयुद्धोत्कण्ठो दशकण्ठः ॥ ३३४ ॥

तं कार्तवीर्यं मुखवर्णहीनं
संज्ञाङ्गयोस्संयति कर्तुकामः ।
प्रतिष्ठमानः प्रथमानसेनः
पथि व्यलंकिष्ट स विन्ध्यशैलम् ॥ ३३५ ॥

[अथ त्रयोदशभिः पद्यैः कुलकेन विन्ध्यं वर्णयति]

गृहीतवेणुं तरुजालबालप्रवाळकाषायपटं वसानम् ।
मुहुर्घनाम्भःकलिताभिषेकं यतिं रविं मेलुमिव प्रवृत्तम् ॥ ३३६ ॥

---

३३३. अगस्त्य वचनमाह—तत इति । क्षितिसुतापते सीतापते । तरलयन् कम्पयन् ।

३३५. तमिति । संज्ञायां मुखवर्णः ककारः तेन हीनं आर्तवीर्यमित्यर्थः । कार्तवीर्येति नाम्नि आदिवर्णः ककारः खलु । अङ्गे तु, मुखवर्णहीनं विवर्णवदनं तं कर्तुकाम इत्यर्थः ।

३३६. गृहीतवेणुमिति । वेणुः वेणुदण्डः, अन्यत्र वेणवो वंशाः, बालप्रवालान्येव काषायपटमिति रूपकम् । घनाम्भसि प्रभूतोदके कृतस्नानमिति यतिपक्षे । यतीनां त्रिषवणस्नायित्वात् । विन्ध्यशैलपक्षे उपरि सञ्चरन् मेघजलकृतसेकमित्यर्थः । यतेः सूर्यमण्डलभेदित्वादिति भावः ।

सुशोभनागं दधतं हि शृङ्गं सिंहासनाश्चच्छरभारवन्तम् ।
उच्चामरं पुष्पवदातपत्रच्छायावृतं सार्थमहीभृदाख्यम् ॥ ३३७ ॥
द्विजावृतं प्रस्तरपृष्ठलग्नध्रुवादिकं साधुधृतग्रहौघम् ।
उपाश्रितं भद्रमृगादिघोषैरुच्चैर्मखोद्देशमिवोल्लसन्तम् ॥ ३३८ ॥
हरिं गुहाशायिनमाकलय्य निरुद्धमत्ताशयनागचेष्टम् ।
सत्त्वाश्रयं सत्पथमाश्रयन्तं स्थितं समाधाविव निश्चलाङ्गम् ॥ ३३९ ॥

---

३३७. **सुशोभेति** । सुशोभा नागाः गजाः यस्येति राजपक्षे । पर्वतपक्षे तु सुशोभनाः अगाः वृक्षाः यस्मिंस्तथोक्तम् । यद्वा सुशोभा नागास्तोयदा यस्मिंस्तम् । 'नागः पन्नगमातङ्गकूराचारिषु तोयदे' इति मेदिनी । शृङ्गं शिखरः प्राधान्यं च । सिंहासने राजलक्षणे आसने अञ्चन् यशशराणां भारस्तद्वांश्च तम् । अन्यत्र सिंहानां असने निरसने अञ्चन् उदञ्चन्, शरभस्य सिंहवैरिणो मृगविशेषस्य आरवो यस्मिन् तादृशम् । अत्र पक्षे तमिति पृथक् पदम् ।

उच्चाः उच्चस्थानस्थिताः अमराः यस्मिन्, उद्गते चामरे यस्येति च । पुष्पवन्तौ सूर्यचन्द्रौ "एकयोक्त्या पुष्पवन्तौ दिवाकरनिशाकरा"वित्यमरः । तावेव आतपत्रे इति रूपकम् । अन्यत्र पुष्पवत् पुष्पालङ्कृतमित्यर्थः । अत एव सार्थमहीभृदाख्यम् । अन्वर्थमहीभृदभिधानमित्यर्थः ।

३३८. **द्विजेति** । द्विजैः पक्षिभिः विप्रैश्च आवृतम् । प्रस्तरपृष्ठे शिलापृष्ठे, लग्नास्सम्बद्धाः ध्रुवादयः ध्रुवनक्षत्रादयः यस्य । अन्यत्र प्रस्तरस्य सोमलताभिषवाद्युपयुक्तस्य पृष्ठे उपरि लग्नः निहितः ध्रुवादिः, होमसाधनपात्रविशेषो यस्मिन् । साधुधृताः सम्यक् धृताः ग्रहाः सूर्यचन्द्रादयः तेषामोघः । साधुभिर्धृतः गृह्यते अनेनेति ग्रहः । हविरादिग्रहणसाधनानि तेषामोघः यस्मिन् तादृशं, भद्रो मृगश्चेति गजजातिविशेषः । अन्यत्र भद्रं ऋगादिघोषैरिति पदच्छेदः । मखोद्देशमिव यज्ञोद्देशमिव ।

३३९. **हरिमिति** । हरिस्सिंहो विष्णुश्च, गुहाः कन्दराणि दहराकाशश्च । "परेण नाकं निहितं गुहायां" इति श्रुतेः । निरुद्धाः स्वस्मिन्नेव नियन्त्रिता इत्यर्थः । मत्ताशयानां मदशालिनां, नागानां चेष्टाः यस्मिन्, अन्यत्र मत्ताः विषयान्तरप्रवृत्त्या मदिनः आशयाः हृदयादय एव नागाः तेषां चेष्टाः येन, सत्त्वानि जन्तवः सत्त्वगुणश्च तदाश्रयम् । सत्पथमाकाशं सन्मार्गं च ।

प्रवाळमालाभिरलङ्कृताङ्गीः पात्रीर्मधूनां नवजातपुष्पाः ।
प्रनर्तिता गन्धवहेन वल्लीर्वेश्या इवामोदवतीर्वहन्तम् ॥ ३४० ॥
गात्रोपरिन्यस्तपयोधरोरुभारां परिभ्रान्तमहोडुमालाम् ।
चुम्बन्तमुत्फुल्लसुधांशुवक्त्रां वीरायमाणां वनितामिव द्याम् ॥ ३४१ ॥
विरोचनोद्भूतवसुप्रतापहरागमं प्राप्तदिगम्बरान्तम् ।
पादाग्रसंलग्नसुपर्वसिन्धुं त्रैविक्रमं देहमिव प्रवृद्धम् ॥ ३४२ ॥
अन्योन्यव्यतिघातदीपितबृहद्वंशोत्थशुष्मोच्चल-
द्धूमस्तोमविधूतदंशकदने मार्ताण्डरथ्यार्वति ।
चञ्चच्छाखिशिखाभिघातजकशाघातानपेक्षत्वरे
निर्व्यापारमनूरुराशु यदुपर्याकाशभागे ययौ ॥ ३४३ ॥

---

३४०. **प्रवालेति** । प्रवालानि पल्लवानि, विद्रुमाश्च । तन्मालाभिः । मधूनां पात्रीः मकरन्दभाजनभूताः " त्रिषु पात्री पुटी पेटी " इत्यमरः । अन्यत्र आसवविशेषाणां पानकर्त्रीः । पा पाने इत्यस्मात् शत्रन्तात् ङीप् । नवजातं पुष्पं आर्तवं प्रसूनं च यासां ताः आमोदः परिमळस्सन्तोषश्च तद्वतीः ।

३४१. **गात्रेति** । गात्रोपरि न्यस्तः पयोधरयोः कुचयोरुरुभारः यस्यास्तां, अन्यत्र पयोधराणां मेघानामुरुभारः । उडुमाला नक्षत्रपरम्परा, नक्षत्रमालाख्यहारविशेषः च । " सैव नक्षत्रमाला स्यात् सप्तविंशतिमौक्तिका " इत्यमरः । उत्फुल्लं उदितं मुदितं च । सुधांशुरेव वक्त्रं यस्याः, वीरायमाणां पुरुषायितरतमाचरन्तीम् ।

३४२. **विरोचनेति** । विरोचनस्सूर्यः तस्य उद्भूतवसूनि, प्रकाशमानाः किरणाः तेषां प्रतापस्य हराः परिहारकाः । अगमाः वृक्षाः यस्मिन् तं, अन्यत्र विरोचनोद्भूतो वसुः वस्ववतारभूतो बलिचक्रवर्ती, तस्य प्रतापस्य तेजसो हरः आगमः प्राप्तिर्यस्य प्राप्तदिगम्बरान्तं दिक्षु आकाशे च व्याप्तम् । पादाग्रेति । सुपर्वणां देवानां सिन्धुः गङ्गा त्रिविक्रमपादात्तस्या उद्भूतत्वात् । पर्वतपक्षे तु, पादाग्रे शिखराग्रे गङ्गासम्बन्धवन्तमित्यर्थः ।

३४३. **अन्योन्येति** । अन्योन्यव्यतिघातेन परस्परसङ्घर्षणेन दीपिताः ज्वलिताः बृहद्वंशाः वेणवः तज्जन्याग्नेरुत्थितधूमस्तोमेन विधूतम् । दंशानां

किञ्च —

वियति विहरतां सुपर्वयूनां व्यतिहतवेणुसमुद्भवह्निपूर्णाः ।
यदुरुतटभुवो हिमर्तुरात्रिष्वभिकलयन्ति हसन्तिकोपचारम् ॥ ३४४ ॥

अपि च —

भ्रमद्भ्रमरदम्पतिस्मररणाभिघातोत्थितैः
यदुच्चलितभूरुहस्फुरितपुष्परेणुव्रजैः ।
अवेक्ष्य कलुषीकृतान्यनिमिषाङ्गनालोचना-
न्यमर्त्यपतिरावृणोत्यसकृदम्बुदैर्यं ध्रुवम् ॥ ३४५ ॥
श्रुत्वा यस्य गुहागृहान्तरचरद्गम्भीरकण्ठीरव-
क्रीडोत्सृत्वरमेष मा भयमयत्वारावमैरावतः ।
इत्यालोच्य निहन्यते दिवि सुरैः किं सप्तरत्नाकरी-
घोषारम्भविडम्बिभिः पटुरवैर्वाचाटितो दुन्दुभिः ॥ ३४६ ॥

मक्षिकाणां कदनं हिंसनं यस्मिन् मार्ताण्डरथ्यार्वति सूर्यरथस्थे अश्वे । चञ्चद्वृक्षाग्रभागाभिघातजा अत एव कशाघातानपेक्षा त्वरा वेगः यस्य । निर्व्यापारं अश्वचोदनार्थव्यापाररहितं यथा तथा । अनूरुः अरुणः यदुपरि यस्य गिरेरूर्ध्वं आकाशे ययौ । सूर्यमण्डलपर्यन्तमुन्नत इत्यर्थः ।

३४४. **वियतीति** । व्यतिहताः परस्परसंसृष्टाः । यस्य विन्ध्यस्य उरुतटभुवो महावृक्षाः । हसन्तिकोपचारं शैत्यबाधापरिहारं कुर्वन्तीत्यर्थः ।

३४६. **श्रुत्वेति** । उत्सृत्वरं प्रवृत्तं आरावं श्रुत्वा एष ऐरावतः भयं मा अयतु भीतो मा भवतु इति हेतोः । अयत्विति परस्मैपदम् । चक्षिङो ङित्करणात् ज्ञापकादनुदात्तेत्त्वलक्षणस्य आत्मनेपदस्य अनित्यत्वात् । तथा चाभियुक्तप्रयोगः ' उदयति विततोर्ध्वरश्मिरर्ज्जो ' इति । सप्तसमुद्रघोषातिशायिभिः गम्भीरशब्दैः दुन्दुभिर्वाचाटितः शब्दितः किमित्युत्प्रेक्षा । देवदुन्दुभिनिस्वनैर्विन्ध्यगुहान्तर्वर्तिसिंहनादः तिरस्क्रियत इति भावः । सिंहनादस्य गजभयङ्करत्वात् तत्तिरोधानमावश्यकम् । विन्ध्यः स्वर्गलोकपर्यन्तोच्छ्रित इत्यर्थः ।

अपो धत्ते रत्नैस्सह किल वहत्यौर्वभरम-
प्यगश्रेणीगुप्त्यै भवति विधुकान्ताभ्युदयभूः ।
समानस्सम्बन्धी स मम हरिणोपाश्रित इति
व्यवाक्षीदम्भोधिस्स किमु सरितो यस्य तनुजाः ॥ ३४७ ॥
जाग्रत्केसरिचक्रशोभिकुहरं श क्रोपलश्यामलं
सालग्राममनुक्षणं स्तनितिकरारब्धघण्टाध्वनिः ।
यत्सानुष्वभिषिच्य किं घनततिच्योतज्जलैरुज्वल-
द्विद्युद्दीपशतं प्रदर्श्य भुवनेशत्वं प्रचेता ययौ ॥ ३४८ ॥

---

३४७. **अप इति** । रत्नैस्सह अपः निर्झरजलानि धत्ते, उर्व्या अयं और्वः तं बडबानलं च । अगानां वृक्षाणां पर्वतानां च श्रेण्या गुप्त्यै, रक्षणाय गोपनाय च । विधुकान्तश्चन्द्रकान्तशिला । विधोर्विष्णोः कान्ता लक्ष्मीश्च । हरिणैः मृगैः हरिणा सिंहेन वा । अन्यत्र हरिर्नारायणः, अत एव साम्यात्, यस्य विन्ध्यस्य तनुजाः तत्रत्या नदीरित्यर्थः । पुत्रीरिति च । व्यवाक्षीत् पर्यणैषीत् किलेत्युत्प्रेक्षा । विपूर्वाद्वहतेर्लुङ् । लोके हि विवाहः सदृशैरेव क्रियते । विन्ध्यसमुद्रयोरुक्तरीत्या साम्यात् विन्ध्यसुतास्समुद्र उपयेमे किमित्यर्थः । समुद्रगा नदीरुत्पादयति विन्ध्य इति तस्य महत्त्वमनेन गम्यते ।

३४८. **जाग्रदिति** । जाग्रत् प्रबुद्धं प्रकाशमानं, केसरा रेखाविशेषाः अस्य सन्तीति केसरी । चक्रं चक्ररेखा । अन्यत्र सिंहसमूहः तेन शोभि कुहरं बिलं गुल्मश्च । समीचीनसालग्रामशिलाया बिले चक्ररेखावश्यंभावात् । शक्रोपलैः इन्द्रनीलैः श्यामलं, अन्यत्र तद्वत् श्यामलं । सालानां वृक्षविशेषाणां ग्रामं समूहं सालग्रामशिलां च । स्तनितकैः मेघध्वनिभिः, आरब्धघण्टाघोषः घनततयो मेघसमूहास्तदुद्वृष्टजलैः नीरन्ध्रप्रवाहरूपेण समर्पितैश्च जलैः । विद्युत एव दीपाः, प्रचेताः वरुणः, प्रकृष्टमनाश्च । भुवनेशत्वं अपां पतित्वं, भुवनाधिपत्यं च । विशुद्धचेतसा पुरुषेण सोपचारं क्रियमाणसालग्रामाभिषेकस्य महीपतित्वप्राप्तिः फलम् इति । विन्ध्यपर्वते अजस्रं प्रभूतमेघवर्षणमस्ति । तावता वरुणप्रभावो व्यज्यत इति भावः ।

ततश्च —

तं धरोत्तममनेककन्धरो लोकयन् जनमनस्सशोकयन् ।
रागमन्युमदसिन्धुरागमत् नर्मदां तृषितलोकशर्मदाम् ॥ ३४९ ॥
पयःप्रवाहैः परितापहन्त्रीं पुण्यां वृषोल्लासकरावलोकाम् ।
समांसमीनां स ददर्श रेवां धीरारवां धेनुमिवोच्चलन्तीम् ॥ ३५० ॥

सा खलु शङ्करमूर्तिरिव शैवलाल्याकारशोभिता, कैटभध्वंसितनुरिव कमलाश्लेषणधन्या, पद्मासनाकृतिरिव कलितभुवनसर्गा, राजनीतिरिव कुवलयामोदमेदुररसा, वैष्णवमूर्तिरिव महादरचक्राङ्किता, तैजसानामतैजसानां च हंसपादानां संघट्टनेन दलितनलिनषण्डा, महाभागवतैरिव मधुरोधकोज्ज्वलरसैः मधुरोदकैः अपनीतजनोदन्या,

---

३४९. **तमिति** । तं धरोत्तमं पर्वतश्रेष्ठं विन्ध्यं, अनेककन्धरः रावणः । सशोकयन् शोकयुक्तं कुर्वन्, कामक्रोधमदानां आश्रयः । तृषितानां लोकानां जनानां शर्मदां सुखदां नर्मदामागमदित्यन्वयः ।

३५०. **पय इति** । पयःप्रवाहैः जलप्रवाहैः, क्षीरप्रवाहैश्च, वृषस्य सुकृतस्य उल्लासकरः अभिवर्धकः, अवलोकः आत्मकर्मकदर्शनं यस्याः । धेनुस्तु वृषस्य वृषभस्य उल्लासकरः सन्तोषकरः अवलोकः वीक्षणं यस्याः तादृशी । समांसाः भक्ष्यमांसमुखाः पीना वा मीना यस्यां । धेनुस्तु समांसमीना प्रतिवर्षप्रसूः । "समांसमीना सा यैव प्रतिवर्षं प्रसूयते" इत्यमरः ।

३५१. **सा खल्विति** । सा नर्मदा । शैवलालिः जलनीलीपङ्क्तिः, अन्यत्र शैवैः शिवभक्तैः लाल्येन आकारेण शोभिता । कमलानामाश्लेषणं कमलाया आश्लेषणं च । कुवलयानां परिमलेन व्याप्तः रसः जलं यस्याः, अन्यत्र कुवलयस्य भूमण्डलस्य आमोदे सन्तोषे मेदुरः व्यग्रः रसः अभिलाषः यस्याः । दराः शङ्खाः चक्राः चक्रवाकाः तैरङ्किता, अन्यत्र दरचक्राभ्यां शङ्खचक्राभ्यां अङ्किता भुजामूलयोश्चिह्निता । अतैजसा हंसपादाः मरालचरणाः तैजसा हंसपादाः सूर्यकिरणाः । दलितं भग्नं विकसितं च । मधुनो रोधको विरोधी उज्ज्वलः स्पष्टं प्रतीयमानः रसः आस्वादः येषां, अन्यत्र मधोरसुरस्य रोधकः कृष्णः तस्मिन् उज्ज्वलरसाः उत्पन्नरुचयः । उदन्या पिपासा ।

समयसमुचितसमीरणसञ्चरणसमुल्ललितकल्लोलनिर्लोलितझिल्लीकहल्लक-तल्लजप्रसूमरमरन्दलुण्टनलम्पटतया पर्यटाट्यमानानां षडङ्घ्रिसङ्घानां मनसिजकोदण्डनिनदशङ्काकरेण झंकारेण, निदाघविदाहजनिततर्षप्रकर्ष-तया निमज्ज्योन्मज्ज्य नीरपानकेळीमनुभवतां काननकरटियूनां तारेण फीट्कारेण, लीलासलिलावगाहनवेळाविस्तारितशबरीजनकबरीभरदर्शनो-पनतबर्हिबर्हभ्रमचकितानां तटीपटीरकुटीरशयानां बिलेशयानां घोरेण फूत्कारेण, कम्बुडम्बरविडम्बनकृदम्बुझरावलम्बिनिजानुबिम्बनिशामन-दशाभ्युदितप्रतियुवतिमतिग्लपिततत्क्षणकुपितलक्ष्मणाप्रसादसम्पिपादयि-षया जलविलोकनविलासदम्भादनुबिम्बं लुम्पतस्सादरं निजप्रियाधरं चुम्ब-तस्सारसयूनः सारतरेण सीत्कारेण, बडिशगतपलशकलकलनाभिलाषतः समागतेष्वपि तद्विनोदविलोकनकुतूहलदत्ताननानां दाशमत्तकाशिनीनां विपुलतमेषु प्रतिमाविलोचनेषु निजकलेबरकबलनपरपृथुलशफरमोहेन परावृत्य बलात्पलायमानेषु मीनेषु मोघश्रमान् प्रियतमानवलोक्य

समुल्ललिताः चञ्चलाः निर्लोलिताः आन्दोलिताः झिल्लीका गन्धयुक्ताः हल्लकाः पुष्पविशेषाः । लुण्टनं अपहरणं तत्र लम्पटतया लोलुपतया पर्यटाट्यमा-नानां, भूयो भूयस्सञ्चरतां, मनसिजः मन्मथः तस्य कोदण्डनिनदः धनुष्टङ्कारः तच्छङ्काकरेण कामोद्दीपकत्वादिति भावः । तर्षप्रकर्षः पिपासाप्रकर्षः, काननकरटियूनां, वन्यगजानां, तारेण गम्भीरेण बर्हिबर्हः मयूरपिञ्छा, तद्भ्रमेण, चकितानां भीतानां मयूरदर्शनस्य सर्पभयङ्करत्वात् , बिलेशयाः सर्पाः । कम्बुडम्ब-रेत्यादिना । निर्मलजलप्रतिफलितनिजदेहदर्शनावसरे तत्र प्रतियुवतिबुद्ध्या लक्ष्मणाः सारसस्त्रियः, प्रक्षीणहर्षाः कुप्यन्ति। तत्प्रसादनाय सारसाः, अन्तर्भागविलोकनव्याजेन जलं विलोडयन्तः प्रतिबिम्बलोपनात् सान्त्वयन्तो लालयन्ति निजप्रिया इत्यभिधीयते।

बडिशेत्यादि । बडिशं मत्स्यवेधनं, तत्रस्थमांसशकलाभिलाषेण समागतेषु मीनेष्वित्यन्वयः । अत्र धीवरेषु मत्स्यग्रहणार्थपिशितखण्डयुतं बडिशं जले प्रसारयत्सु सत्सु, तत्कान्तास्तद्विलोकनकुतूहलात् फुल्ललोचनाः पश्यन्ति । तदानी-मागता मीनाः तासां विलोचनप्रतिबिम्बेषु जलस्थेषु निजनिगरणार्थमागतमहामीन-बुद्ध्या भयात् पलायन्ते, तासां मीनाक्षीत्वात्। अबलस्वकुलान्येव बलिनो मत्स्याः अश्नन्तीति प्रसिद्धेः । तेषां पलायने विफलप्रयत्ना निजप्रिया धीवरा भवन्ति ।

परिहसन्तीनां धीवरपुरन्ध्रीणां मदादुदारेण हीहीकारेण च, वाचालिताशाकाशान्तरा तरङ्गिणी पापैकनिरतेनाऽपि तेनाभिननन्दे ॥ ३५१ ॥
तत्र काचिद्वैचित्री —

प्रसार्य परिरिप्सिता भुजयुगं नृपालेन याः
ह्रिया न ययुरेव ता इतरहस्तकामाङ्कुशैः ।
क्षतोरुजघना मनाक् तमभिसृत्य तोये स्वयं
झषक्षतिविशङ्कया झटिति चक्रुरालिङ्गनम् ॥ ३५२ ॥

अन्या चमत्कृतिः —

कचप्रचयकर्षणं प्रसभमङ्गसंश्लेषणं
घनस्तनविमर्दनं किमपि नीविविस्रंसनम् ।
नखक्षतसमर्पणं ननु सहस्रबाहुस्स्वयं
समक्षणमलक्षयत् सहचरीषु सर्वास्वपि ॥ ३५३ ॥

ततस्तस्यास्तटिन्या गाम्भीर्यप्रकर्षचिकीर्षया निजभुजबलनिर्दिधारयिषया च पञ्चशाखपञ्चशतीमेकां तत्स्रोतसि सेतूकुर्वन्नन्यां च धन्यां वरवर्णिनीनामङ्गेषु स्वयमनङ्गेषुपीडितो व्यापारयन् समक्रीडत हैहयचक्रवर्ती कार्तवीर्यः ॥ ३५४ ॥

तस्य तु दीप्रबाहोत्करप्रतिरुद्धेन नदीप्रवाहोत्करेण दुर्निमित्तदर्शनात् प्रस्थितजनेनेव यथागतं प्रतिधावता वेलातिलङ्घिकीलालबृन्दतुन्दिलतया निश्शेषनिमज्जत्सैकतेन पशुपतिपूजनाय पौलस्त्येन स्थापितः पुष्पराशिरपाहारि ॥ ३५५ ॥

तान् परिहसन्तीत्यर्थः । एतादृशी सा तरङ्गिणी पापैकनिरतेनापि तेन रावणेन अभिननन्दे । पापिनो रम्येऽपि दोषारोपेण दुःख्यन्तीति भावः ।

३५४. तत इति । पञ्चशाखाः कराः तेषां पञ्चशतीं अन्यां अवशिष्टां पञ्चशतीं अनङ्गेषुपीडितः, मन्मथबाणव्यथितः व्यापारयन् । अत्र पूर्वार्धेन हस्तसंज्ञेन नदीप्रवाहनिरोधे नदीप्रवाहस्य गाम्भीर्यं अगाधता, तस्य प्रकर्षः आधिक्यं, तत्सम्पिपादयिषया, प्रवाहमध्ये सेतुवदूर्ध्वं प्रतिबन्धात्, पश्चाज्जलमुद्गच्छति । तावता अगाधत्वं च भवतीति भावः ।

३५५. तस्य त्विति । दीप्रबाहोत्करः प्रकाशमानबाहाव्रजः, नदीप्रवाहोत्करेण प्रवाहकूटेन दुर्निमित्तेति । लोके कञ्चन देशविशेषं प्रति प्रस्थितो

मारातेश्शिरसि निहितो मत्सपत्न्यास्तनौ स्यात्
मञ्जुस्स्थूनव्रज इति वलन्मत्सरा हन्त रेवा ।
पूजाहेतोः पुरविजयिनः संचितं पुष्पराशिं
वेणीं स्वीयां प्रसभमनयत् किं व्यतिक्रान्तवेला ॥ ३५६ ॥

अनन्तरं पुरान्तकपूजान्तरायतः पुरन्दरजितः पिता कुपितान्तःकरणश्चारःखादर्जुनदौर्जन्यविशेष इत्यवधार्य तमेव विद्विषां भीषणमभिषेणयामास ॥ ३५७ ॥

अर्जुनश्च —

विहृत्य सस्त्रीषु विलासभेदैः
विहर्तुमस्त्रीषुविलासभेदैः ।
नदीप्रवाहं परिहाय तस्मात्
स दीप्रवाहं प्रविवेश सैन्यम् ॥ ३५८ ॥

जनः मार्गे अपशकुनादिदर्शनेन यथा यथागतं प्रतिनिवर्तते तद्वदित्यर्थः । जलप्रतिरोधात् यथागतं धावनं । निश्शेषं निमज्जत् सैकतं यस्य तादृशेन उत्करेणेति पूर्वेणान्वयः ।

३५६. **मारेति** । मारातेः, मन्मथशत्रोः रुद्रस्य । मत्सपत्न्या गङ्गायाः तनौ शरीरे, निहितः इत्यावृत्तिः इति हेतोः जातरोषा रेवा, नर्मदा व्यतिक्रान्तवेला, व्यतिक्रान्ता वेला तटं मर्यादा च यया सा । पुरविजयिपूजाहेतोः सञ्चितं पुष्पराशिं स्वीयां वेणीं केशबन्धं प्रवाहं च । किमित्युत्प्रेक्षा । सर्वासां नदीनां सागरपत्नीत्वात् गङ्गायाः नर्मदासपत्नीत्वम् ।

३५७. **अनन्तरमिति** । पुरन्दरजितः इन्द्रजितः, पिता रावणः अभिषेणयामास । शत्रुमुद्दिश्य युद्धसन्नाहं चकारेत्यर्थः । "यत्सेनयाभिगमनमरौ तदभिषेणन"मित्यमरः ।

३५८. **विहृत्येति** । सः स्त्रीषु, सस्त्रीषु स्त्रीयुक्तेषु, अस्त्रीषु स्त्रीरहितेषु अस्त्री अस्त्रवान्, इषुविलासभेदैः, बाणमोचनवैचित्रीभिरित्यर्थः । दीप्राः प्रकाशमाना वाहा अश्वा यस्मिन्, तत्सैन्यम् । वबयोरभेदात् दीप्रबाहमिति च ।

तदानीं मदानीतरोषेण दोषाचरपतिना शिलीमुखैः शिथिलीकृत-विग्रहा हेहयाधिपभटाः स्फुटं विषेदुः ॥ ३५९ ॥

प्रतिपन्नमहावनं भटास्ते प्रथितोच्छ्रायसहस्रपञ्चशाखम् ।
दशकण्ठशरातपाभितप्ताः प्रचुरच्छायमथार्जुनं पन्नाः ॥ ३६० ॥

दोषाकरः स बलवानद्भुतमुद्भूतनैकनाळीकः ।
अपजयमेव प्रायादर्जुनपक्षे विजृम्भमाणेऽपि ॥ ३६१ ॥

विंशत्याहो बाहुभिराजिं विदधानं
तावत्संख्यैरेव भुजैस्तं प्रतियोद्धुः ।
चत्वारिंशद्विंशतयस्तस्य भुजानां
कृत्याभावात्तत्रपुरेवात्र नवापि ॥ ३६२ ॥

तदा गदां भूमिभृददानो मुदाहितां नाकसदामुदारः ।
द्रागक्षिपद्रक्षसि राक्षसीये मूर्तामिवासौ युधि मृत्युशक्तिम् ॥ ३६३ ॥

---

३६०. प्रतिपन्नेति । दशकण्ठस्य शरा एवातपः, दुस्सहत्वात् । प्रतिपन्नं प्राप्तमङ्गीकृतमित्यर्थः । महत् अवनं रक्षणं वनं जलं वा वनं अरण्यं च । प्रथितोच्छ्रायाः प्रसिद्धातिशयाः । प्रसिद्धौन्नत्याश्च । सहस्रम् । पञ्चशाखाः पाणयः, पञ्चा विस्तीर्णाः शाखाश्च यस्य । प्रचुरा बहुळा छाया कान्तिः अनातपश्च यस्य । अर्जुनो वृक्षविशेषः कार्तवीर्यार्जुनश्च । आतपतप्तानां तमालतरुमूलाधिश्रयणं युक्तं किलेति भावः ।

३६१. दोषेति । दोषाकरश्चन्द्रः दोषप्रचुरश्च, उद्भूतनैकनाळीकः विमुक्तबहुशरः कम्पितबहुनलिनश्च । अर्जुनपक्षे शुक्लपक्षे, कृष्णपक्षे चन्द्रस्य प्रकाशाभावेऽपि, शुक्लपक्षे अपजयादाश्चर्यम् । कार्तवीर्यार्जुनपक्षे विजृम्भमाणे रावणः पराभवं प्रापेति परिहारः ।

३६२. विंशत्येति । भुजानां चत्वारिंशद्विंशतयः नवापि विंशतयः, कृत्याभावात् युद्धव्यापृत्यभावात् तत्रपुः ललज्जिरे ।

क्षमं गदाभिहननं सहस्रकरवैरिणः ।
दशास्यो दर्शयन्नित्थं निपपात गदाहतः ॥ ३६४ ॥
निर्जित्य निर्जराराति मर्जुनो दुर्जनोत्तमम् ।
गर्जन् पर्जन्यवज्जन्ये निन्ये बध्वा निजं पुरम् ॥ ३६५ ॥

ततस्तु पुलस्त्यः पौत्रानर्थनिशमनप्रादुर्भूतखेदः माहिष्मतीमागत्य कार्तवीर्येण कृताहेणः पौत्रमुक्तिमातिथ्यं प्रार्थितवान्, प्राशंसच्चैवमेनम् ॥ ॥ ३६६ ॥

"वत्स कार्तवीर्य !

मार्गं सतां कलयितुं विगळत्तमस्कं
प्राप्तोदयस्य परिशोषितशत्रुकीर्तेः ।
सर्वोत्तरं तव सहस्रकरस्य तेजः
नक्तञ्चरोऽर्हति न सोढुमितीह युक्तम्" ॥ ३६७ ॥

किं बहुना —

आप्स्यं चेन्नाकलोकस्य नागलोकस्य चेशताम् ।
ततस्तेऽद्रक्ष्यमस्तोष्यं दोःसहस्रगुणान् पृथक् ॥ ३६८ ॥

परन्त्वेतदवधार्यताम्—

सुमनःकम्पनचरितः सहस्रकर तावकप्रसादेन ।
दृढपङ्कजनिर्बन्धं मलिनो विजहातु रावणो मधुपः" ॥३६९॥

---

३६४. **क्षममिति** । सहस्रकरवैरिणः सूर्यशत्रोः गदाभिहननं रोगबाधा । "आरोग्यं भास्करादिच्छेदि"ति स्मृतेरिति भावः ।

३६७. **मार्गमिति** । सतां मार्गं नक्षत्रमार्गं, साधूनां मार्गं च । विगलत् तमः अन्धकारः तमोगुणश्च यस्मिन् तम् । कीर्तिः यशः कर्दमश्च, सहस्रकरस्य सहस्रकिरणस्य, सहस्रबाहोश्च नक्तञ्चरत्वादेव न सोढेत्यर्थः ।

३६८. **आप्स्यमिति** । नाकलोकस्य स्वर्गलोकस्य ईशतां इन्द्रत्वं, नागलोकस्य पातालस्य ईशतां शेषत्वं, आप्स्यं चेत् प्राप्नुयां चेत् । क्रियाया अनिष्पत्तौ लृङ् । सहस्राक्षः शेषश्च यदि स्याम् । तदा तव बाहुसहस्रगुणान् अद्रक्ष्यं पश्येयम् । अस्तोष्यं स्तुवीय । अत्राप्यनिष्पत्तौ लृङ् । उभयमपि न सिद्ध्यतीति भावः ।

३६९. **सुमन इति** । हे सहस्रकरेति सम्बोधनम् । सुमनसः पुष्पाणि देवाश्च तेषां कम्पकारि चलनं तादृशव्यापारश्च । रावणः ध्वनन् मलिनो मधुपः भ्रमरश्च । दृढं पङ्कजनिर्बन्धं कमलबन्धनं पापजन्यं बन्धं च । त्वदुदये सति पद्मानां विकासात्, भ्रमरा बहिर्गच्छेयुरित्यर्थः ।

इत्यैवं प्राज्ञाग्रगण्यस्य महर्षेराज्ञां शिरसि निदधता राज्ञां वरेण वधकर्मोचितो निर्मोचितोऽयमर्जुनकृतनिर्जयलज्जया मलिनवदनपरम्परः स्वकं पुरं विवेश पलाशनेशः ॥ ३७० ॥

तस्मादस्माकमियमवधारणा —

श्रीमन् राम जयत्यरिलोकानेकान्ततो भवानेकः ।
अपरस्यास्त्रभृतः स्यादन्यतरस्यां जयः क्षितावस्याम् ॥ ३७१ ॥
जम्भारिक्षतिलम्भकं दशमुखं योऽसावजैषीन्नृपः
ब्रह्मक्षत्रियवर्णसंकरपदं यश्चैनमास्यन्मुनिः ।
तं च त्वं चकितीकृतत्रिभुवनं दीनं क्षणात्तेनिथ
श्लाघा ते दशकण्ठकण्ठलवनात् काकुत्स्थ का कुस्थले ॥ ३७२ ॥
अपरोऽप्याशरपतेरमुष्य रघुनन्दन ।
अशेषविषयोत्सृष्टावपवादो निशाम्यताम् ॥ ३७३ ॥

आसीच्छुनासीरसुतो बलीयान् वाली जवालीढविरोधिगर्वः ।
यस्यासुभिस्तावकसायकाग्रौ एधायितं षड्क्तिरथात्मजन्मन् ॥ ३७४ ॥

---

३७१. **श्रीमन्निति**। एकान्ततः नैयत्येन जयति । अपरस्य अस्त्रभृतः शस्त्रधारिणः जयः अन्यतरस्यां विकल्पेन स्यात् । त्वत्कर्तृकश्शत्रुजयो निश्चितः । इतरेषामरिजयः काकतालीय इति भावः ।

३७२. **जम्भारीति** । जम्भारिक्षतिलम्भकं महेन्द्रजयिनं रावणं योऽसावर्जुनः अजयत् । ब्रह्मक्षत्रियेति । ब्रह्मक्षत्रवर्णयोस्साङ्कर्यस्थानं एनमर्जुनं मुनिः जामदग्न्यः आस्यत् अजयदित्यर्थः । असु क्षेपणे लङ् । तं चकितोकृतेति । अचकितं चकितं कृतं चकितीकृतं त्रिभुवनं येन तादृशं त्वं, दीनं कृपणं, तेनिथ अकरोः । तादृशस्य ते, दशकण्ठकण्ठलवनात् , कुस्थले भूमण्डले, का श्लाघा इत्यर्थः । रावणजेतृजेतृजयिनः रावणजयात् कोऽतिशयः इति भावः ।

३७३. **अपर इति** । आशरपतेः राक्षसराजस्य रावणस्य उत्सृष्टिः उत्सर्गः, तद्विजयोत्सर्गे अपरोऽप्यपवादः श्रूयताम् ।

३७४. **आसीदिति** । हे षड्क्तिरथात्मजन्मन् दाशरथे इति सम्बोधनम् । जवेन आलीढः आक्रान्तः विरोधिवर्गः येन सः वाली । बलीयानासीदित्यन्वयः । यस्य असुभिः प्राणैः एधायितम् काष्ठायितम् ।

तमपि त्रैलोक्यविस्मयकरविक्रमं सुरचक्रवर्तिनस्तनयमविनयेन जेतुं यातुधाननाथो मदान्धसुधान्धःपरिबृढपरिभवोत्सिक्तस्तत्तनुज-कलितचिरानुबन्धां किष्किन्धामगमत् ॥ ३७५ ॥

तं च युद्धाय वालिनमेव आह्वयमानं तदमात्यो दर्शितरोषावतार-स्तारस्तारतरमेवं व्याजहार ॥ ३७६ ॥

"अमरपतिविजेतुस्तत्सुतो मे कियानि-
त्यहह तव युयुत्सा वालिना रावणाभूत् ।
अरणिमहमगृह्णां पाणिनैवेति गर्वात्
तदुदितमपि वह्निं धारयेत् कः करेण ? ॥ ३७७ ॥

दृप्यत्प्रत्यर्थिपृथ्वीपरिबृढपटलीकन्धरारन्ध्रपद्या-
विद्राणप्राणपानस्फुरितघनमदोद्दण्डदोर्दण्डनागात् ।
अन्यो जन्योपपन्नत्रिदशजयनिराशङ्कलङ्काधिनेतुः
हन्ताऽहन्तानिहन्ता तव क इव यशःशालिनो वालिनोऽस्मात् ॥ ३७८ ॥

३७५: **तमपीति** । सुरचक्रवर्तिनस्तनयं वालिनं, सुधान्धः-परिबृढः देवेन्द्रः, तस्य परिभवेन उत्सिक्तः गर्वितः, तस्य तनुजः वाली तेन कलितचिरानुबन्धां चिरकालपालितामित्यर्थः ।

३७६. **तं चेति** । तदमात्यः तस्य वालिनो मन्त्री ताराख्यः, तारतरमुच्चैस्तरं, एवं वक्ष्यमाणक्रमेण व्याजहार । तदुक्तिमेवाह अमरेति'—

३७७. **अमरेति** । युयुत्सा योद्धुमिच्छा । अरणिमिति । जनकापेक्षया जन्येपि तेजोतिशयेऽयं दृष्टान्तः । तथा च इन्द्रजयिनापि त्वया तत्सुतो वाली दुर्जय इति भावः ।

३७८. **दृप्यदिति** । दृप्यन्तः प्रत्यर्थिराजाः तेषां पटली समूहस्तस्य कन्धरा कण्ठः, तस्य रन्ध्रपद्या रन्ध्रमार्गः, तेन विद्राणाः प्राणा एव वायुरिति श्लिष्टम् तस्य पानेन उज्जृम्भितमदेन सर्पाणां वाताशनत्वात् । उद्दण्डदोर्दण्ड एव नागस्तर्पः इति । जन्ये युद्धे उपपन्नः प्राप्तस्त्रिदशानां जयः तेन निराशङ्कस्य लङ्कापतेः, अहन्तायाः अहम्भावस्य निहन्ता नाशकः वालिनोऽन्यः क इव स्यादित्यन्वयः ।

परन्तु, संप्रति प्लवङ्गपुङ्गवः सन्ध्यामुपासितुं सागरं सोऽगात् ॥ ३७९ ॥

तव तु भवति यदि तस्मात्पराजयं लब्धुमतितरां त्वरा, ततो दक्षिणार्णवाभ्यर्णमेव याही''ति ॥ ३८० ॥

इमं पुनस्तारव्याहारमाकर्ण्य तत्क्षणेनैव दक्षिणार्णवं प्रतिपन्नो राक्षसनाथः तद्रोधसि सन्ध्यामुपासीनं महीगतमिव मयूखमालिनं वालिनं निरवर्णयत् ॥ ३८१ ॥

निर्वर्ण्य चैनं दुर्निरीक्ष्यं सन्ध्योपासनव्यासक्तमानसम्, 'अयं बाहुभ्यां परिरभ्य मया सुग्रह' इति व्यग्रहृदयो निश्शब्दपदं तदन्तिकमुपससर्प ॥ ३८२ ॥

सोऽपि पापिनमेनमनन्यवेदनीयोन्मीलनविशेषया सरोषया दृशा निशाम्य ग्रहिकर्तृतामीप्सन्तं ग्रहिकर्मीकर्तुमुद्युक्तस्तत्क्रियानुगुणावधानमवतस्थे ॥ ३८३ ॥

परस्परं वञ्चयितुं चिरेण
प्रतीक्षमाणावबकाशमेव ।
विदिद्युताते कपिराक्षसेन्द्रौ
विवेकमोहाविव सावधानौ ॥ ३८४ ॥

---

३८२. **निर्वर्ण्येति** । निश्शब्दपदमिति, पादन्यासशब्दरहितं यथा तथा मृदु उपससर्पेत्यर्थः ।

३८३. **सोपीति** । अनन्यवेदनीयोन्मीलनविशेषा दृक्, ज्ञानदृष्टिः तद्विकासस्य परैरवेद्यत्वात् । ग्रहिः ग्रहणं, तत्कर्तुमिच्छन्तं तं, तत्कर्मीकर्तुं, वयमेव ग्रहीतुम् । तत्क्रियायाः ग्रहणक्रियायाः अनुगुणमवधानं चित्तैकाग्र्यं यस्मिन्निति क्रियाविशेषणम् ।

३८४. **परस्परमिति** । विवेकमोहाविवेति । विवेकः मोहं निवर्तयितुं प्रभवति । कदाचित् प्रबलो मोहश्चेत्, अल्पतरं विवेकं नाशयितुं प्रभवति, तद्वदित्यर्थः । अस्योदाहरणं स्पष्टम् ।

अपि च —

कक्षान्ते स्वजिघृक्षयार्पितभुजं संलक्ष्य तं तत्क्षणात्
बाहुभ्यामवमर्दयन् स बलवानुत्क्षिप्य रक्षःपतिम् ।
उत्प्लुत्य स्वयमाततान गगने यातानि चेतोऽनिल-
श्लाघालोपकृता जवेन महता शाखामृगग्रामणीः ॥ ३८५ ॥

रक्षःपतिं व्योमनि कक्षलम्बं
विधाय धावन्तमथानुगन्तुम् ।
न तं कुरङ्गो न च तत्तुरङ्गो
न तद्भुजां शत्रुरपि क्षमोऽभूत् ॥ ३८६ ॥

किं चित्रं राक्षसराजमोक्षचिकीर्षवस्तदमात्या हरीश्वरमन्वेतुमशक्नुवन्तः परिश्रान्ताः सत्पथादपतन्निति ! ॥ ३८७ ॥

ततश्च,

भ्राम्यद्रावणवक्त्रगर्तदशकस्वैरप्ररोहन्मरु-
द्धारानुन्ननिजापराङ्गकतया लब्धातिमात्रत्वरः ।
व्याळग्राहिविहङ्गपुङ्गवगतिं व्यश्नन् चतुस्सागरी-
मर्घाम्भः क्रमशो दिशो दश दिशन् चक्राम शक्रात्मजः ॥ ३८८ ॥

---

३८५. **कक्षान्त इति** । स्वजिघृक्षया स्वग्रहणेच्छया । चेतोऽनिल-श्लाघालोपकृता । मनोवाखतिशायिनेत्यर्थः । जवेन वेगेन गगने यातान्याततानेत्यन्वयः । शाखामृगग्रामणीः वानरश्रेष्ठो वाली ।

३८६. **रक्षःपतिमिति** । सः कुरङ्गः तुरङ्गो यस्य सः वायुः । तद्भुजां वाताशनानां सर्पाणां शत्रुः गरुडः । एते सर्वेऽपि वालिवेगमनुगन्तुं न क्षमा बभूवुरित्यर्थः ।

३८८. **भ्राम्यदिति** । आकाशे वेगातिशयेन गमनकाले रावणवक्त्रेभ्यो निस्सृतवातधाराप्रेरितस्वकीयपश्चाङ्गकतया त्वरातिशयं प्राप्तः सर्पग्राहिगरुडगतिमनुकुर्वन् वाली चतुस्सागरीं अर्घाम्भः दिशन् सागरचतुष्टयमपि, सविन्ने अर्घ्यत्वेन दिशन् क्रमशो दशदिशश्चक्राम ।

तदानीम् —

दक्षश्शान्तो नवक्रो नरहितचरितो हर्षवान्रोषशून्यो
वाक्यज्ञो लीनपाप्मेत्यधिजगति पदेष्वित्थमष्टासु लग्नैः ।
लब्धार्थाः स्वाद्यवर्णैः स्वयमतिचकितास्तापसा राक्षसेन्द्रा-
दन्योन्यस्मै स्वधर्मप्रवचनकपटाद्वालिनं तुष्टुवुस्ते ॥ ३८९ ॥

स चतुर एवं चतुरकूपारपरिभ्रमणपारिप्लवविकृतमानसं समुन्मिषदेनसं परिश्रान्तं पङ्क्तिकन्धरं मन्दहसितमुखपुष्करः किष्किन्धामभितः स्वकक्षादचिच्यवदपृच्छच्च 'कैकसेय ! कुतस्त्वमि'ति ॥ ३९० ॥

अनन्तरं मन्दाक्षमलिनवदनगणो राक्षसस्तद्बलविलोकनेन विस्मयमानोऽपि स्मृतमानोद्रेकस्तमेवमावेदयत् ॥ ३९१ ॥

"भवानिवासौ भगवान् पतङ्ग-
श्शाखामृगात्मानमुपैति मूर्तिम् ।
नित्यं चतुस्सागरयायिनस्ते
स किंनु सिन्धुद्वयगो हि तुल्यः ? ॥ ३९२ ॥

---

३८९. दक्ष इति । राक्षसेन्द्रादतिचकितास्ते तापसाः अन्योन्यस्मै परस्परं, अधिजगति लोके दक्षः वर्णाश्रमोचितकर्मानलसः शान्तः सुखदुःखानभिभूतान्तःकरणः, नवक्रः करणत्रयेऽपि ऋजुः, नरहितचरितः परोपकारैकप्रवणः, हर्षवान् यावल्लाभसन्तुष्टः, रोषशून्यः अभीष्टलाभेऽप्यनाग्रहः । वाक्यज्ञः प्रस्तावोचितमृदुमधुरवाक्, लीनपाप्मा परहिंसादिपापनिवृत्तश्च । भूयात् पुरुष इति शेषः, इति स्वधर्मस्य प्रवचनकपटात् बोधनव्याजात्, अष्टासु पदेषु दक्ष इत्यादिषु लग्नैः संसक्तैः स्वेषां पदानामाद्यवर्णैः लब्धार्थाः प्राप्ताभिलषितार्थास्सन्तः वालिनं तुष्टुवुः । स्तुतिप्रकारश्च दक्ष इत्यादिषु आद्यवर्णानां घटने "दशानन-हरो वाली" इत्यवसेयम् ।

३९०. स इति । स चतुरो वाली, समुन्मिषत् एनः दुःखं यस्य तादृशम् । किष्किन्धामभितः, तत्समीप इत्यर्थः । अचिच्यवत् च्यावयतेर्लुङ् ।

३९२. भवानिति । पतङ्गस्सूर्यः । त्वं, शाखामृगात्मानं मूर्तिं कपिस्वरूपमुपैषि । स तु ऋगात्मानं शाखां, ऋग्रूपां वेदशाखामुपैति । "ऋग्भिः

किञ्च —

क्रमेण चतुर्णवाक्रमणतो मदो माऽस्तु ते
भवन्तमपि हन्त निर्जयति सन्ततं त्वद्यशः ।
यदेतदवगाहते युगपदेव देवापगां
धरास्वपि दुरासदानपि च सप्तरत्नाकरान् ॥ ३९३ ॥
अद्य पुनरियमस्मदभ्यर्थना ॥ ३९४ ॥
साधारणाशेषधनं सख्यं सौख्यविवर्धनम् ।
अप्रत्यूहोदयं भूयादावयोरावयोयुतम् ॥ ३९५ ॥
हन्त प्लवङ्गपुङ्गव तवाऽयमनितरसाधारणो भागधेयः! ॥ ३९६ ॥
साम्बत्र्यम्बककुम्भिनीधरवरप्रोत्कम्पसम्पादन-
क्रीडापाटवरूढगर्वदमुनोदुर्वीक्ष्यदोर्विंशतिः ।
एवं रावण एव तावकभुजामूलात्तडोलारसो
वेधोदेयवरार्थनास्वविनतैस्सख्यं मुखैर्याचते" ॥ ३९७ ॥

पूर्वाह्णे दिवि देव ईयते" इति सूर्यस्य छन्दोमयत्वात् । सिन्धुद्वयगः पूर्वापर-सागरावगाही किं तुल्यः? । हिरनुनये । नित्यं चतुस्सागरगामी वाली, सूर्यस्तु समुद्रद्वयमात्रगामी ।

३९३. **क्रमेणेति** । एककालावच्छेदेनैव दिवि देवगङ्गां, भुवि च सप्तसागरानाक्रामत् त्वदीयं यशः पर्यायेण चतुर्णवगामिनं त्वामपि निर्जयतीति । तज्जेतुः कस्यचित्सद्भावानुवादेन स्वापकर्षं परिहरति । त्वं तज्जितः अहं त्वज्जित इत्यावयोर्जितत्वसाधारण्यात्, ते मदो मास्त्विति भावः ।

३९५. **साधारणेति** । साधारणम् आदानोत्सर्गयोस्तुल्यम् । अप्रत्यूहोदयं अविच्छिन्नमित्यर्थः । वयोयुतं वयसामयुतं दशसहस्री । भागधेयमेवाह साम्बेति —

३९७. **साम्बेति** । साम्बत्र्यम्बकः पार्वतीपतिः, तस्य कुम्भिनीधरः कैलासः तद्विचालनजन्यः गर्व एव दमुनाः अनलः तेन दुर्निरीक्षविंशतिबाहुः रावणः सोऽप्येवं तावकभुजामूललम्बमानः ब्रह्मदेयवरप्रार्थनावसरेप्यनवनमितैः मुखैः सख्यं याचते वरप्रार्थनावसरे दुर्बलत्वबुद्ध्या उपेक्षितैर्वानरैरेव सख्यं याचते । इदं महत्तरं भाग्यमिति भावः ।

एतदाकर्ण्य जातदयेन वालिना जातवेदस्साक्षिकं सम्पादितसख्यः किष्किन्धायां तेन सुचिरं विरचितस्वोचितसपर्यस्तदनुमत्या नित्याभिराम-गृहनिकरं निजनगरमगमत्किञ्चिद्दुःखापत्रपो विरिञ्चिनसा ॥ ३९८ ॥

आस्तां तावदसौ प्रसङ्गः ॥ ३९९ ॥

तावकस्तु प्रभावस्तनोति विस्मयमस्माकम्, यतः ॥ ४०० ॥

तमपि कपिमुदञ्चद्वातगत्या स्वशक्त्या
विरचितसुरचेतोविस्मयं भस्मयन्तः ।
रघुकुलतिलक! त्वद्विक्रमाश्शक्रमान्याः
ददति हृदि न केषां निर्विषादं प्रमोदम् ॥ ४०१ ॥

किञ्च,

विचित्रं चारित्रं ननु मनुजतागुप्तमपि ते
कृपारम्य श्रीमन् पिशुनयति पारम्यमतुलम् ।
अपि च्छन्नं पर्णैः कुसुमपटलं पाटलतरोः
प्रगल्भं सौरभ्यं प्रकटयति दूरात्प्रसृमरम् ॥ ४०२ ॥

स तेन मुनिनोदितं समुपभुज्य तत्तत्कथा-
सुधाभिरभिधारितं श्रुतिपुटानुकूलं वचः ।
नवाद्भुतरसोदयस्तिमितचित्तसामाजिको
ननन्द रघुनन्दनः सकललोकसङ्क्रन्दनः ॥ ४०३ ॥

पुनरप्येवं कुम्भिनीजम्भारिः कुम्भसम्भवममवेक्ष्य सम्बभाषे ॥ ४०४ ॥

---

४०२. विचित्रमिति । मनुजतागुप्तं मनुष्यत्वतिरोहितमपि परत्वं विचित्रं चारित्रमेव प्रकटयति । यथा पर्णैश्छन्नमपि कुसुमपटलं दूरादेव सौरभ्यं प्रकटयति ।

४०४. पुनरिति । कुम्भिनीजम्भारिः महीन्द्रः श्रीरामः, कुम्भ-सम्भवमगस्त्यम् ।

इदं पुनरत्रभवान् विदाङ्करोतु ॥ ४०५ ॥

न लङ्कालङ्कारो निशिचरपतिः श्लाघनपदं
न वाली वा लीनप्रतिभटमदाटोपकपटः ।
महाश्चर्याश्चर्या जगति विदधानस्तु मरुतः
कुमारो मारोपप्लवविकृतिदूरो नुतिपदम् ॥ ४०६ ॥

अदः पुनरनुयुज्यते यदेष वेषतः कपिरप्यशेषभुवनश्लाघनीयविद्याविक्रमबलविवेकधैर्यचातुर्यगाम्भीर्यमुख्यैर्भूयोभिश्शुभगुणैरखिलानप्यतिशेते तनूमानिव वीररसो हनूमान् ॥ ४०७ ॥

लीलातीर्णमहार्णवानि बलवद्बालाग्रजाग्रच्छिखि-
ज्वालाभक्षितराक्षसेन्द्रनगरागाराणि घोराणि च ।
न्यञ्चत्कोणपराजि सज्जनमनस्संरञ्जनान्यञ्जना-
सूनोरुत्सुकयन्ति नन्दितधरापत्यानि कृत्यान्यहो ॥ ४०८ ॥

एतादृशोऽपि वातात्मजस्सुग्रीवपक्षपाती तदनुग्रहाय वालिनिग्रहं कथमिव न व्यधात्तत्र च मूलं भवता वक्तव्यमिति ॥ ४०९ ॥

ऊचे रामोऽथ सामोदश्शश्वद्विश्वप्रवृत्तिषु ।
साक्षिणा दाक्षिणात्येन हर्षिणा स महर्षिणा ॥ ४१० ॥

---

४०६. **न लङ्केति** । मरुतः कुमारः मारुतिः, मारोपप्लवविकृतिः, मदनबाधाजनितो विकारः, तस्याः दूरः, तदस्पृष्ट इति यावत् । महापराक्रमो रावणस्तज्जेता वाली च न स्तोत्रपदम् । अपि तु ततोऽप्यतिशयिता, मानुषव्यापारान् कुर्वन् महाबलवानपि हनुमान् । मदनकदनवशंवदो नाभूदित्ययमेव नुतिपदम् । तथा चोक्तम्—

"अन्यत्र भीष्माद्द्रोणादन्यत्र च हनूमतः ।
हरिणीखुरमात्रेण चर्मणा मोहितं जगत् ॥" इति ।

४१०. **ऊच इति** । दाक्षिणात्येन दक्षिणदिग्वासिना महर्षिणा अगस्त्येनेत्यर्थः ।

यदि भवतीहानुमतं हानुमतं चरितमीरयितुम् ।
अभिधास्यामि यथामति दाशरथे श्रोतुमवधेहि ॥ ४११ ॥

अस्ति कश्चिदष्टापदशिखरिशिखरवास्तव्यः प्रतिभटकरटिघटाकेसरी केसरी नाम वानरेन्द्रः ॥ ४१२ ॥

स च रचितहृदयरञ्जनामञ्जनां नाम जायामुपायच्छत ॥ ४१३ ॥

अयं जातो हरिस्तस्यामञ्जनायां प्रभञ्जनात् ।
प्रकृत्यामिव सङ्कल्पात्परस्य ब्रह्मणो महान् ॥ ४१४ ॥

अथ कदाचिदञ्जनायां फलेभ्यो यातायां मुक्त इव निरञ्जनः प्रभञ्जनशिशुर्जातमात्रोऽप्यतिमात्रमुद्भूतः पृथ्वीतलादुत्थितः उद्यन्तमादित्यमुद्वीक्ष्य विकसदरुणकुसुममोहादेनमपचिचीषुरधिगगनमतिवेगादभ्यधावत् ॥ ४१५ ॥

---

४११. यदीति । हानुमतम् । हनुमत्सम्बन्धि चरितं वक्तुं यदि अनुमतं भवति, तर्हि अभिधास्यामीत्यर्थः ।

४१२. अस्तीति । अष्टापदशिखरी मेरुपर्वतः, प्रतिभटा एव करटिनः गजाः, तत्समूहस्य केसरी सिंहः ।

४१३. स चेति । रचितेति । मनस्तोषकरीमित्यर्थः । उपायच्छत उपयेमे ।

४१४. अयमिति । प्रभञ्जनात् वातात् । प्रकृत्यां मूलप्रकृत्यां, महान् महत्तत्वं, भगवदिच्छया मूलप्रकृतौ गुणवैषम्ये सति महत्तत्वमुत्पद्यते इति सृष्टिक्रमः ।

४१५. अथेति । फलेभ्यो यातायां फलान्याहर्तुं यातायामित्यर्थः । मुक्तः । मोक्षं प्राप्तः । निरञ्जनः प्रकृतिसम्बन्धशून्यः । विकस रुणकुसुमभ्रान्त्या, अपचिचीषुरपचेतुमिच्छुः, अधिगगनं आकाशे ।

तदा तु —

कथमिव शिशुराशूत्क्रामति व्योमनीति-
स्तिमितनयनपद्मैर्दैवतैर्दृश्यमानः ।
सरभसमभियातो विभ्रमाद्भ्रमार्गात्
न्यपतदभिपतङ्गं स प्लवङ्गस्फुलिङ्गः ॥ ४१६ ॥

अथ सुत इति हार्दादार्द्रगात्रस्सुधौघै-
रभिहरि विहरन्तं हन्त वातो ववौ तम् ।
उपगतवति तस्मिन् उष्णरश्मिस्समीपं
शिशुरिति दयमानश्शीतरश्मिर्बभूव ॥ ४१७ ॥

तर्कयामस्तावदेवम् —

मध्यं रवेरधिवसन् मधुसूदनस्त-
मभ्याशमागतमलोकत जातमात्रम् ।
सर्वोत्तमत्वमखिलैरभिनन्दनीयं
शाखामृगस्य भविता कथमन्यथाऽस्य ? ॥ ४१८ ॥

---

४१६. **कथमिति** । अभिपतङ्गं सूर्याभिमुखमित्यर्थः । प्लवङ्गः स्फुलिङ्ग इवेत्युपमया अग्रे महत्त्वाय कल्पिष्यमाण इति प्रतीयते ।

४१८. **मध्यमिति** । तर्कयाम इति । एवमूहितव्यं भवतीत्यर्थः ऊहप्रकारमाह जातमात्रं शिशुं हनूमन्तं समीपमागतं, आदित्यमण्डलमध्यवर्तीं मधुसूदनः, अपश्यत् कटाक्षपात्रीकृतवानित्यर्थः । अन्यथा, भगवत्कटाक्षाभावे अखिलाभिनन्द्यं सर्वोत्तमत्व शाखामृगस्य कथं भविता इत्यन्वयः ।

"जायमानं हि पुरुषं यं पश्येन्मधुसूदनः ।
सात्त्विकस्स तु विज्ञेयः स वै मोक्षार्थचिन्तकः"

इत्युक्तेरिति भावः । वाक्यार्थहेतुकं काव्यलिङ्गम् ।

तदैव पुनस्तरणिग्रहणाय दत्तोद्यमस्सिंहिकापुत्र उपकण्ठमधितिष्ठता तेन वानरडिम्भेन पाणिना स्पृष्टो महाभयाविष्टो यथागतमभिधावन् सुरोत्तममभ्येत्य रुरोद जगाद चैवम् ॥ ४१९ ॥

कृतोद्यमस्य ग्रहणे खरांशो-
र्ममैव कश्चिद्ग्रहणे प्रवृत्तः ।
आस्ते पुरस्तात्तरणेरतस्ते
राज्ञोऽपि नाज्ञोन्मिषति त्रिलोक्याः ॥ ४२० ॥

इदमाकर्ण्य धृतमन्युश्शतमन्युरैरावतमारुह्य स्वर्गतो निर्गतो निजाबलम्बावलेपेन पुरत एव गत्वा पूषग्रहणे कृतोद्यमं तं तस्याग्रतः कृतसंरम्भेण कपिडिम्भेन सुदूरमभिद्रुतं सिंहिकासुतमवलोक्य समधिककोपाटोप उपतपनमापपात ॥ ४२१ ॥

तदनु —

मारुतिर्ग्रसितुं यातो महत्फलमिदन्त्विति ।
सम्भ्रमादभ्रमातङ्गं विभ्रमादभ्रमार्गगम् ॥ ४२२ ॥

ततश्च —

चेष्टामनिष्टां शिशुतां च तस्य
विलोकमानेन पुलोमजेत्रा ।
तदा कदुष्णेन तदार्तिदाने
डोलाविलासः क्षणमन्वभावि ॥ ४२३ ॥

---

४२०. **कृतोद्यमस्येति** । खरांशोः तिग्मरश्मेः सूर्यस्य त्रिलोक्याः राज्ञस्ते आज्ञा नोन्मिषति न सिद्ध्यतीति काक्वा अधिक्षिपति ।

४२२. **मारुतिरिति** । मारुतिः अभ्रमार्गगं आकाशमार्गगमैरावतं महत्फलमिति भ्रमात्, त्वरया ग्रसितुं प्रवृत्तः ।

४२३. **चेष्टामिति** । तस्य वायुसूनोरनुचितां चेष्टां, शैशवं च विलोक्य तस्य दुःखोत्पादने संशयानोऽभवत् । व्यापारकौर्याद्दण्ड्य इति भाति । अथापि बाल्यात् क्षन्तव्यमिति च भातीति भावः ।

अथ विबुधनाथस्य शुभकरान्तस्थात्मनापि निराकृतबलरयेण पविना पुनरीषत्स्पृष्टतनुरप्यपगतकरणशक्तिरुन्मिषदूष्माविवृतस्वरश्च हनूमान् भग्नबाहुः कस्याचिद्गिरेरधित्यकायामभिपत्य मुह्यति स्म ॥ ४२४ ॥

तनयं पुनस्तादृशं निरीक्ष्य वृद्धश्रवसे कुध्यन् गन्धवहस्सर्वस्य जन्तोर्महोदरतासंपादकमननुकम्पः सम्पादयामास श्वासनिरोधम् ॥ ४२५॥

विश्वासां वीक्ष्य विश्वासां प्रजानां त्रिदशा दशाम् ।
प्राणेषु त्यक्तविश्वासास्तासां पतिमुपासदन् ॥ ४२६ ॥

विश्वमेतदथ निष्प्रभञ्जनं
वीक्ष्य दिव्यमपि निष्प्रभं जनम् ।
अत्रसत्स च सहस्रपत्रभू-
रत्र सन्मतिरचिन्तयद्गतिम् ॥ ४२७ ॥

---

४२४. **अथेति** । शुभकरः अन्तःस्थात्मा अन्तरात्मा यस्य तथापि निराकृतस्तिरस्कृतः, बलरयः, बलासुरवेगो येन । तेन पविना वज्रेण, शुभकरत्वेप्यन्यदीयबलनिराकरणमनुपपन्नमिति भावः । विबुधनाथस्य शुभो यः करः तस्य । अन्ते तिष्ठतीत्यन्तस्थः, आत्मा स्वरूपं यस्य तादृशेन । उन्मिषदूष्मा विवृतस्वरश्च । ऊष्माणमुद्गमन् दीनस्वरश्च । अत्र अन्तस्थः, ईषत्स्पृष्टः, ऊष्मा, विवृतः, स्वरश्चेति वैयाकरणसंज्ञाप्रतीतेर्वैचित्र्यम् ।

४२६. **विश्वासामिति** । विश्वासां सर्वासां, विश्वासां श्वासहीनां, दशां, त्यक्तविश्वासाः परित्यक्तप्रीतयः, तासां पतिं, प्रजानां पतिं ब्रह्माणं उपसन्नाः ।

४२७. **विश्वमिति** । निष्प्रभञ्जनं निरुद्धवातं विश्वं, दिव्यं जनं निष्प्रभं कान्तिहीनं, अत्रसत् अबिभेत्, अत्र विषये, सहस्रपत्रभूः कमलसम्भवः, सन्मतिः सती समीचीना मतिः यस्य तादृशः, गतिमुपायमचिन्तयत् चिन्तितवान् ।

अथ प्रस्तुतप्रजारुजापनयनाय सदागतिरेव सद्यः प्रसाद्य इति मनसि कृत्वा मरुत्वदादिभिर्नाकसद्भिः साकं तत्राटिटीके लोकेशो यत्र मूर्च्छितं निजशिशुमङ्के निधाय रुपाकषायिताशयः प्रतिरुद्धसमस्तजननिश्वसनश्वसनस्सखेदविषादमासामास ॥ ४२८ ॥

अथ सविनयमभ्युत्थाय चरणयोः पतन्तं नभस्वन्तं शुभस्वान्तस्सरस्वतीकान्तस्सान्त्वयन्मूर्ध्नि शिशुं पाणिना कृपानिधिः पस्पर्श ॥ ४२९ ॥

अहो पितुः करस्पर्शेऽप्यजातां हनुमानसौ ।
पितामहकरस्पर्शात्संज्ञामभजत क्षणात् ॥ ४३० ॥

ततस्तनयप्राणनेन सुप्रसन्नो जगत्प्राणो विधूतश्वासनिरोधव्यथो यथापूर्वं प्रावर्तत जन्तुषु जगदगदप्रदानजातमुदो नाकसदोऽपि महान्तो देवाः स्वस्वायुधावध्यतावरान् व्यतरन् ॥ ४३१ ॥

धाता ददावायुरनन्तमस्मै
स ब्रह्मदण्डैरविनश्यतां च ।
स्वतेजसोंऽशं सविता व्यतारीत्
स्वस्माच्च शास्त्रग्रहणक्षमत्वम् ॥ ४३२ ॥

---

४२८. **अथेति** । प्रजानां रुजा श्वासनिरोधरूपरोगः, सदागतिः वायुः, आटिटीके आगच्छत् । टीकृ गतावित्यस्माल्लिटि रूपम् । आसामास, आसीदित्यर्थः ।

४३०. **अहो इति** । अजातां संज्ञां, पितामहः पितुः पिता, चतुर्मुखश्च । अहो इति पितुः करस्पर्शेऽप्यजाता, पितामहकरस्पर्शात् अभूदित्युक्त्या आश्चर्यम् । सर्वशक्तेः ब्रह्मणः स्पर्शाज्जातेति वास्तवार्थः ।

४३१. **तत इति** । जगत्प्राणः समीरणः तनयप्राणनेन पुत्रसञ्जीवनेन । विधूतेति श्वासनिरोधान्निवृत्त इत्यर्थः । प्राणिषु पूर्ववत् वर्तितवानित्यर्थः । जगतो लोकस्य अगदप्रदानेन, आरोग्यप्रदानेन, उत्पन्नहर्षाः नाकसदो देवाः आयुधावध्यत्वरूपवरं प्रायच्छन्नित्यर्थः । हनूमत इति शेषः ।

४३२. **धातेति** । स्वस्मात् सूर्यात्, शास्त्रग्रहणक्षमत्वं च व्यतारीदित्यन्वयः । सूर्यादपि शास्त्रग्रहणस्य पुराणप्रसिद्धत्वादिति भावः ।

दशकण्ठकण्ठखण्डने च क्रीडिष्यतो दाशरथेः सहायो भवाननन्य-साध्यान्याश्चर्यकर्माणि विविधानि विधास्यतीत्यभिधाय यथागतं गतेषु दैवतेषु, तद्वरदानसमेधमानबलवत्तावलिप्तचित्तो वायुपुत्रोऽयं तपोवनेषु तपोधनेभ्योऽप्रगल्भबुद्धिरपराध्यति स्म ॥ ४३३ ॥

आचामन् सोममुच्चैर्ग्रहचमसचयानर्दयन्नाज्यपूर्णान्
स्थालीमालिह्य गर्जन्मुहुरनुशमयन्नद्भिरग्नीन् प्रणीतान् ।
खादं खादं हवींषि क्षपितपरिजनो यूपमुत्पाटय नाटयं
कुर्वन् पीडामृषीणामदिशदुटजभूभञ्जनादञ्जनाभूः ॥ ४३४ ॥

शङ्करस्य पुरतस्स्वयम्भुवा
ब्रह्मदण्डविभवैरवध्यता ।
अर्पितेत्यभिविमृश्य मारुते-
रक्रमं तमसहन्त तापसाः ॥ ४३५ ॥

परन्तु,

'अज्ञातस्वबलो भूयादाराघवसमागमम् ।
भवान् पवनपुत्रे'ति तापसाश्शापमैरयन् ॥ ४३६ ॥

---

४३४. **आचामन्निति** । सोमं सोमरसं पिबन्, प्रणीतान् अग्नीन् अद्भिः शान्तान् कुर्वन्, खादं खादं खादित्वा खादित्वा, णमुल्प्रत्ययान्तमव्ययम् । अञ्जनाभूः आञ्जनेयः, उटजभुवः आश्रमस्थलस्य भञ्जनात् नाशनात्, आश्रम-वृक्षभञ्जनादिति वा अर्थः ।

४३५. **शंकरस्येति** । स्वयम्भुवा विधात्रा, शङ्करसमक्षं ब्राह्मण-शापादिभिरवध्यता दत्तेत्यालोच्य, तापसाः हनूमतः तमक्रमं असहन्त । शापा-दिभिस्तं निग्रहीतुं शक्ता अपि, तपोधनाः ब्रह्मवरदानं विचिन्त्य तस्मिन् न किमपि चक्रुरित्यर्थः । अथापि —

४३६. **अज्ञातेति** । 'श्रीरामेण समागमपर्यन्तं अज्ञातस्वबलो भवे'ति शापमदुस्तापसाः ।

तत एव,

वाली मुखं राज्यमवाप्य कुर्वन्
वाली मुखं श्यामलमर्कसूनोः ।
अनेन सारं स्वमजानता प्राक्
अनेनसाऽरं निधनं न निन्ये ॥ ४३७ ॥

ईदृशं पाण्डित्यमेतस्य प्रसादविकाससाक्षात्कृतकर्मसाक्षिण एव समस्तशास्त्राध्ययनात् ॥ ४३८ ॥

तथा हि,

आदेवेशदिशास्पृशः क्षितिधरादा च प्रतीचस्स्वयं
हस्तावस्थितशास्त्रपुस्तकमसावग्रे भृशं जाग्रतम् ।
धीरं मारुतनन्दनं स्थितिजुषं हर्षादधिस्यन्दनं
भानुर्व्याकरणादिशास्त्रमखिलं तथ्यार्थमध्यापयत् ॥ ४३९ ॥

तत एवेति । तादृशशापादेव हेतोः ।

४३७. वालीमुखमिति । वलीमुखा वानराः, तत्सम्बन्धिराज्यमित्यर्थः । अर्कसूनोः सूर्यपुत्रस्य सुग्रीवस्य मुखं विषादेन मलिनं कुर्वन् वाली । स्वं सारं बलं अजानता, अनेनसा अपापेन, अनेन हनूमता, निधनं मरणं न निन्ये, न प्रापितः । वालिनं हन्तुं समर्थोऽपि हनुमान् सुग्रीवप्रियं चिकीर्षन्नपि, निजबलाज्ञानादेव तूष्णीं बभूवेत्यर्थः ।

४३८. ईदृशमिति । कर्मसाक्षी सूर्यः, तस्मात् समस्तशास्त्राध्ययनादस्य सर्वातिशायि पाण्डित्यं जातमित्यर्थः ।

४३९. आदेवेशेति । आ देवेशदिशास्पृशः प्राचीदिग्वर्तिनः, क्षितिधरात् पर्वतात्, प्रतीचः पश्चिमात्, उदयाचलमारभ्य अस्ताचलपर्यन्तमित्यर्थः । पुस्तकहस्तः सावधानः सूर्यस्य रथे सूर्याभिमुखं तिष्ठन्, व्याकरणादिशास्त्रमधीतवान् । स च यथावदध्यापयामास एनं व्याकरणादिशास्त्रमिति भावः ।

सूर्याभिमुख्यमुच्चैर्विना न वैदुष्यमिति निदर्शयता ।
अग्राहि शास्त्रमसमादहरीशादप्यहो हरीशेन ॥ ४४० ॥

आचार्यवद्भवति तत्तनयेऽपि वृत्ति-
रित्याकलय्य किल सेवितभानुपुत्रः ।
नूनं क्षमो गुरुकुले श्रम इत्यसौ त्वा-
मासेवते सवितृवंशजमर्कशिष्यः ॥ ४४१ ॥

इत्थं खलु निर्धार्यते —

राम व्योमनि लाघवेन चलनं रत्नाकरोल्लङ्घनं
रक्षःपेषणमक्षजीवहरणं लङ्कापुरप्लोषणम् ।
दूरादौषधपर्वतोपहरणं दुस्साधमन्यच्च यत्
तत्सर्वं स्थितमीक्षया तव तमोलोपावनौ पावनौ ॥ ४४२ ॥

---

४४०. **सूर्येति** । सूर्याभिमुख्यम् सूरेर्विदुषः सूर्यस्य च । आभिमुख्यं उच्चैर्वैदुष्यं विना न घटेतेति निदर्शयता, हरीशेन वानरश्रेष्ठेन, हनुमता असमात् असदृशात्, निस्समाच्च । अहरीशः अह्नामीशः, हरीशभिन्नश्च, तस्मात् शास्त्रमग्राहि गृहीतम् । अहो हरीशस्य अहरीशात् शास्त्रग्रहणमित्याश्चर्यम् । सजातेरेव शास्त्राध्ययनमिति सत्सम्प्रदायः । एवं पूर्वार्धे विद्वदभिमुखं स्थातुं विद्वानेव प्रभवतीत्यस्य उत्तरार्धेन समर्थनम् । अर्थान्तरन्यासः ।

४४२. **आचार्यवदिति** । सेवितः भानुपुत्रः सुग्रीवः येन सः । सवितृवंशजं श्रीरामं अर्कशिष्यः हनुमानासेवते । नूनमित्युत्प्रेक्षा । स्वतस्सिद्धभक्त्यैव खलु श्रीराममासेवतेऽयम् ।

४४२. **रामेति** । रक्षसां सम्पेषणं वनभङ्गसमये, अन्यदपि यथासमयं, तत्सर्वं, तमोलोपस्य अज्ञानाभावस्य, अवनौ भूमौ, पावनौ पवनसुते, तव ईक्षया दृष्ट्या, स्थितम् । भगवत्कटाक्षाभावे एवंविधप्रभावः न स्यादिति भावः ।

आकलय्य परमोदकपीनां
वाहिनीं धुतमहाशरवेगः ।
रामभद्र गुणरत्नसमुद्रो
नन्वनेकमुखभङ्गमकार्षीत् ॥ ४४३ ॥
परिजृम्भमाणघनपङ्क्तिकन्धरा-
धरपक्षदारचणं बुधैर्वृतम् ।
नृपते भवन्तमरिशान्तये हरिं
भुवि वासवन्तमवलोकयामहे ॥ ४४४ ॥

किञ्च,

मरुत्पोतोपेतो मधुसरसशब्दालिरुचिर-
स्सदावल्ल्यावासः श्रितसुरभिरुत्कान्तिकपिकः ।
भवान् प्रौढामोदः श्रितधरणिजाश्लेषरुचिर-
स्सदारामः श्रीमान् शमयति परीतापममितम् ॥ ४४५ ॥

---

४४३. **आकलय्येति** । परो मोदः येषां तेषां कपीनां, परमै-रुदकैः पीनां पूर्णां, वाहिनीं सैन्यं नदीं च । आकलय्य दृष्ट्वा, धुतः महतामाशराणां रक्षसां वेगः । अन्यत्र महतां शराणां जलानां वेगः । रामचन्द्र एव गुणरत्नाकरः समुद्रः — अनेकमुखस्य रावणस्य भङ्गः, अनेकमुखः नानाविधः भङ्गस्तरङ्गः तं च अकार्षीत् । श्लेष ।

४४४. **परिजृम्भमाणेति** । परिजृम्भमाणः अभिवर्धमानः, घनः सान्द्रः यः पङ्क्तिकन्धरस्य अधरः नीचः पक्षः सहायः कुम्भकर्णादिः । अन्यत्र, परिजृम्भमाणघनपङ्क्तिकम् इति पदच्छेदः । इन्द्रस्य मेघाधिपति-त्वात् । धराधराः पर्वताः । तेषां पक्षदारणचणं पर्वतपक्षविदारकम् । वासवन्तं वासयुक्तं वसन्तमित्यर्थः, वासवं तमिति च । इन्द्रः पर्वतपक्षच्छेत्ता देवैर्वृतः, पण्डितैर्वृतोऽयम् । अन्यत् सुगमम् । श्लेषानुप्राणितं रूपकम् ।

४४५. **मरुदिति** । मरुत्पोतः मन्दमारुतः, हनूमांश्च । मधुनि सरसशब्दाः अलयः भ्रमराः तै रुचिरः मनोज्ञः, अन्यत्र मधुवन्मधुरव्यवहार-

धार्यो भवान् हृदयतस्सुदृशां हि भास्व-
द्वंशोद्भवश्शुचितमस्सुगुणाभिरामः ।
शुक्त्यागतो नृपतिमौलिभिराश्रितस्सन्
मुक्तोपमस्त्वमिति वा रघुनाथ साधुः ॥ ४४६ ॥
निर्मलं प्रतिगृहीतलक्ष्मणं
त्रातहंसकुलमार्ततृप्तिदम् ।
त्वां गभीरमतिशीतलं हृदं
जानकीरमण जानते बुधाः ॥ ४४७ ॥

श्रेणीरमणीयः । सदा वल्लीनामावासः वासस्थानं, अन्यत्र तां साधूनां आवलिः तदाश्रयः । श्रितः सुरभिर्वसन्तः यं तादृशः, श्रितानां आश्रितानां कामधेनुरिति च । उत्कान्तिकाः शोभमानाः पिकाः यस्मिन् सः इति, अन्यत्र उत्कान्तयः शोभमानाः कपयो यस्य । प्रौढः आमोदः परिमलः सन्तोषश्च यस्य सः । श्रिताः आश्रिताः धरणिजाः वृक्षाः तेषामाश्लेषेण सम्बन्धेन रुचिरः, अन्यत्र धरणिजायाः सीतायाः आश्लेषः आलिङ्गनं तेन रुचिरः । परीतापः आतपबाधा, तापत्रयं च । रामपक्षे सदा रामः इति पदद्वयम् । अप्रस्तुते सन् आरामः इति कर्मधारये समस्तं पदम् । अत्रापि श्लेषानुप्राणितं रूपकम् ।

४४६. **धार्य इति** । हृदयतः मनसि वक्षसि च । सुदृशां विदुषां सुन्दरीणां च । भास्वद्वंशः सूर्यवंशः, भास्वान् वंशः वेणुः तदुद्भवः । शुचितमः पवित्रतमः शुक्लतमश्च । शुक् शोकः तस्याः त्यागतः, त्यागात् मुक्तोपमः, अन्यत्र शुक्तेरागतः, तदुद्भवः इत्यर्थः । मुक्तानां तुल्यः इति । नृपतिमौलिभिराश्रितः सेवितः, अन्यत्र राजशिरोभिरवश्यं मुक्ताहारधारणसम्भवात् । श्लिष्टोपमा ।

४४७. **निर्मलमिति** । प्रतिगृहीतः लक्ष्मणः येन, अन्यत्र प्रतिगृहीताः लक्ष्मणाः सारसस्त्रियः येन, "सारसस्य तु लक्ष्मणा" इत्यमरः । त्रातं रक्षितं परमहंसानां हंसानां च कुलं येन । आर्तानां तापार्तानां तृषार्तानां च तृप्तिदं, अतिशीतलं दयापूर्णतया शीतस्वभावं । अन्यत् स्पष्टम् । "एष ब्रह्म प्रविष्टोऽस्मि ग्रीष्मे शीतमिव ह्रदं" इत्युक्तिः स्मार्यते । श्लेषानुप्राणितं रूपकम् ।

जगद्भाजनेऽस्मिन् जनेश त्वदीय-
प्रतापप्रदीपः स्थिरस्नेहपुष्टे ।
प्रजागर्ति योऽयं द्विषच्चक्रवर्ति-
व्रजस्तत्र वर्तिस्वभावं बिभर्ति ॥ ४४८ ॥

अपि च,

पद्मोल्लासविधायिनि प्रणमतामातङ्कभङ्गावहे
दीप्ते राम तव प्रतापतपने दिक्चक्रमाक्रामति ।
तत्तादग्गलदश्मशत्रुमहिभृच्चित्तात्मकेषु स्थिरः
सप्ताश्वोपलमण्डलेष्वविकलस्सप्तार्चिरुज्जृम्भते ॥ ४४९ ॥
अन्योन्यसंगतिमवाप्य विजृम्भिताभ्यां
कीर्तिप्रतापमयचन्द्रदिवाकराभ्याम् ।
काकुत्स्थ दर्शयसि कौशलतश्शुभानि
सर्वाण्यहान्यपि दिशो दश दीपयद्भ्याम् ॥ ४५० ॥

---

४४८. **जगदिति** । योऽयं त्वदीयः प्रतापदीपः जागर्ति प्रज्वलति । तत्र द्विषच्चक्रवर्तिव्रजः प्रत्यर्थिमहीपालगणः, वर्त्याः स्वभावं स्वरूपं बिभर्ति, दीपप्रज्वालनेन दीपवर्तिवत् तव प्रतापज्वलनेन अरयः क्षीयन्ते इति भावः । रूपकम् ।

४४९. **पद्मेति** । पद्मानां कमलानां, पद्मायाः लक्ष्म्याश्च उल्लास-कारिणि । प्रणमतां नमस्कुर्वतां, आश्रितानां च । आतङ्कः रोगः शङ्का च, तद्भङ्गजनके । "आरोग्यं भास्करादिच्छेत्" इति सूर्यस्य रोगनिवर्तकत्वात् । अन्यत्र प्रणाममात्रेण अपराधिनां दण्डचत्वशङ्कानिवर्तक इत्यर्थः । सप्ताश्वोपल-मण्डलेषु सूर्यकान्तशिलासमूहेषु, सप्तार्चिः अनलः उज्जृम्भते वर्धते । सूर्ये तपति सति, सूर्यकान्तेष्वग्नि दुर्भावः प्रसिद्धः । त्वदीयप्रतापविजृम्भणेन रिपूणां मनांसि शोकानलेन दह्यन्ते इति भावः । रूपकम् ।

४५०. **अन्योन्येति** । चन्द्रसूर्ययोः समागमो दर्शे भवति, तदा हीनकलो नष्टशोभश्चन्द्रो भवति । कीर्तिप्रतापरूपौ चन्द्रसूर्यौ तु परस्परसमागमेऽपि विजृम्भमाणौ सर्वेष्वहस्सु यौगपद्येन भासयसीति कौशलमिति भावः । रूपकम् । दर्शयसीत्यत्र दर्शं करोषि इति श्लेषचमत्कारः अधिकः ।

पारे गिरां प्रविपुलो भवदीयकीर्ति-
क्षीराब्धिरेष जयति क्षितिपालमौले ।
ब्रह्माण्डभाण्डमपि यत्र विचित्रभूम्नि
धत्ते चिरं तरणसाधककुम्भलीलाम् ॥ ४५१ ॥

वृद्धिं क्षयं प्राप्तवतोः प्रताप-
प्रतीपयोस्ते रणमूर्ध्नि चित्रम् ।
लोकान्तरास्कन्दनशक्तिभाजो-
रादित्यभेदित्वमभूत्समानम् ॥ ४५२ ॥

आरक्तयन्नपि हरित्तरुणीमुखानि
बालार्कवद्रघुपते भवतः प्रतापः ।
तन्तन्यते रिपुनृपालवधूमुखेषु
ताम्बूलरागमपि हन्त कथावशेषम् ॥ ४५३ ॥

---

४५१. **पार इति** । ब्रह्माण्डान्तर्वर्ती क्षीराब्धिः । अस्मिन् कीर्ति-क्षीराब्धौ तु ब्रह्माण्डस्य जलतरणोचितकुम्भवत्प्लवमानत्ववर्णनेन यशसः आधिक्यं प्रतीयते । रूपकं अतिशयोक्तिश्च ।

४५२. **वृद्धिमिति** । रणमूर्ध्नि, प्रतापः पराक्रमः वृद्धिं प्राप्तः, प्रतीपः शत्रुः क्षयं प्राप्तः, उभावपि लोकान्तराक्रमणशक्तिभाजौ । तथा हि रामचन्द्रप्रतापः लोकान्तराक्रमणे शक्तः तथा शत्रुश्च युद्धे हतः स्वर्गलोकप्राप्तौ समर्थः । अनयोरादित्यभेदित्वं समानमभूदिति चित्रम् , कुत इति चेत् , प्रतापस्य सूर्यगतौष्ण्यादाधिक्येपि, प्रतीपस्य क्षीणस्य तथात्वासम्भवादाश्चर्यम् । सूर्यमण्डल-भेदित्वमभूदिति परिहारः ।

४५३. **आरक्तयन्निति** । दिक्कामिनीमुखानि शोणयतोऽपि रिपु-रमणीताम्बूलरागहारित्वं चित्रम् । तासां वैधव्यसम्पादनेन ताम्बूलं त्याजय-तीति भावः । विभावना ।

चिरं हरिदणूदरीचिकुरमल्लिकामालीका-
पदं यश इदं हि ते प्रभजते रघूणां पते ।
प्रपुष्यति वपुस्सितं यदभिगानगौरीभव-
च्चतुर्मुखचतुर्मुखीसततचारतश्शारदा ॥ ४५४ ॥

क्षोणीमाक्रम्य कृत्स्नामपि तव यशसः क्षिप्रमास्कन्दतो द्यां
यात्राविघ्नाय वर्त्मन्यजनि शशधरः चन्द्रमास्तत्प्रतीपः ।
तं चानादृत्य सर्वे तदुपरि सरता तेन लोका गृहीताः
दोदुह्यन्ते शुचिभ्यो न खलु रघुपते दुर्निमित्तानि सद्भ्यः ॥ ४५५ ॥

पर्यङ्कं श्वशुरं च वामनयनं पादाम्बु तद्वारिणो-
प्यावासश्वशुरौ तनूभववधूवाहावपि स्वस्य च ।
प्रत्यर्थित्वधिया त्वदीययशसा दृष्ट्वा जितानि स्वयं
सत्त्वात्मापि हरिर्भयादिव तनुं धत्ते घनश्यामलाम् ॥ ४५६ ॥

---

४५४. **चिरमिति** । इदं तव यशः मालिकापदं प्रभजते । दिगङ्गनाचिकुरेषु मल्लिकामालायते - त्वदीययशःपद्यगानासक्तस्य चतुर्मुखस्य मुखवलयविहारादेव शारदा सितं वपुः पुष्यतीत्युत्प्रेक्षा । यशसो धवलत्वात् तत्सम्बन्धेनास्याः अपि शौक्ल्यमिति गम्या हेतूत्प्रेक्षा, तद्गुणालङ्कारश्च ।

४५५. **क्षोणीमिति** । क्षोणीमाक्रम्य द्यां प्रस्थितस्य यशसः । तत्र शशधरस्य दर्शनात् शशस्यापि दर्शनमर्थसिद्धम् । तच्च दुर्निमित्तत्वाद्यात्रा-विघ्नकरम् । अथापि तदविगणय्य चन्द्रोपरि विद्यमाना अपि सर्वे लोकाः आक्रान्ता यशसा । एतत्समर्थयति दोदुह्यन्ते इत्यादिना । शुचिभ्यः शुद्धेभ्यः शुक्लेभ्यश्च सद्भ्यः साधुभ्यः दुर्निमित्तानि न दोदुह्यन्ते न फलन्तीत्यर्थः । दुहेर्यङ्लुगन्तात् कर्मकर्तरि लट् । अर्थान्तरन्यासः ।

४५६. **पर्यङ्कमिति** । सत्त्वात्मापि सत्त्वगुणमयोऽपीत्यर्थः । पर्यङ्कं शेषं, श्वशुरं क्षीराब्धिं, वामनयनं चन्द्रम् । भगवतो वामनेत्रत्वेन चन्द्रस्य प्रसिद्धेः । पादाम्बु गङ्गाम् , तद्वारी शिवः, आवासश्वशुरौ कैलासहिमालयौ,

यशश्शशाङ्कस्तव भाति यस्य
ज्योत्स्नायते सत्त्वमयी विभूतिः ।
यस्मिन् महेन्द्रोपलनीलमेतत्
कळङ्कशङ्कां गगनं तनोति ॥ ४५७ ॥

दशाननारे तव कुम्भिनीन्द्र
दानाम्बुभिर्यस्य कराब्जमार्द्रम् ।
तदैव तस्यावसथाङ्गणं च
कुम्भीन्द्रदानाम्बुभिरार्द्रमास्ते ॥ ४५८ ॥

स्वर्धेनुरर्थिषु समस्तपुमर्थदात्रा
स्पर्धां विधाय भवता प्रथितावलेपा ।
सीतापते तव वदान्यतया जिता सा
गर्ह्येण जीवति तृणग्रहणेन नूनम् ॥ ४५९ ॥

तनूभवश्चतुर्मुखः तस्य वधूः शारदा वाहः हंसश्च, स्वस्येति सर्वत्र सम्बध्यते । प्रत्यर्थित्वधिया शत्रुत्वबुद्ध्या एतेषां शुक्लत्वात्, त्वदीययशसा जितानि इमानि वीक्ष्य हरिः भयात्, इवेत्युत्प्रेक्षा । निजतनु श्यामां बिभर्ति प्रत्यर्थित्वशङ्कापरिहाराय ।

४५७. **यश इति** । सत्त्वमयी विभूतिः नित्यविभूतिः, यस्य यशश्चन्द्रस्य, चन्द्रिकायते तथा यस्मिन् यशसि चन्द्रे महेन्द्रोपलनीलमिदं गगनं, कलङ्कशङ्कां तनोति । गगनापेक्षया विभुत्वात् त्वद्यशस इति भावः । अधिकालङ्कारः ।

४५८. **दशानन इति** । हे कुम्भिनीन्द्रेति सम्बोधनम् । कुम्भीन्द्राः गजश्रेष्ठाः । तव दातृत्वमर्थिषु गजान्तमैश्वर्यं जनयतीति भावः । अतिशयोक्तिः ।

४५९. **स्वर्धेनुति** । समस्तपुरुषार्थदात्रा भवता प्रथितः अवलेपः औदार्यमदः यस्याः सा । स्वर्धेनुः कामधेनुः, स्पर्धां विधाय, अन्ते जिता

स्वर्णस्तोममहो विकीर्णमखिलं भूयो हरत्यर्णवा-
द्यो मित्रेण गृहीतमम्बरमपि प्रायेण गृह्णाति च ।
कण्ठे हन्त कपालिना चिरधृतं लुण्टन्नसावंशुकं
त्वद्दाने रघुनाथ कालजलदः स्प्रष्टा न दृष्टान्तताम् ॥ ४६० ॥

पत्रं च पुष्पमथवा फलमाश्रितेभ्यः
केभ्यश्चिदेव परिदाय वृथोन्नतेन ।
दातुं त्वमत्र चतुरश्चतुरः पुमर्थान्
देवद्रुणा दशरथात्मज नोपमेयः ॥ ४६१ ॥

सती, गर्ह्येण निन्द्येन, तृणगृहणेन जीवति नूनमित्युत्प्रेक्षा, युद्धे पराजितानां तृणग्राहित्वात् । गोसामान्यस्य निसर्गतः तृणजीवित्वमेवमुप्रेक्ष्यते ।

४६०. **स्वर्ण इति** । सु, अर्णसामम्भसां स्तोमं, स्वर्णानां स्तोमं च वृष्टिरूपेण विकीर्णं भूयो हरति गृह्णाति । मित्रः सूर्यः मित्रं सखा च, तेन गृहीतमम्बरं वस्त्रमाकाशं च गृह्णाति । कपालिना रुद्रेण भिक्षार्थं कपालहस्तेन अर्थिना च, अंशुकं वस्त्रं अन्यत्र अंशुरेव अंशुकः कान्तिः, तं, लुण्टन् अपहरन् कालजलदः नीलमेघः त्वदीयदानविषये नैव दृष्टान्ततां उदाहरणत्वं स्प्रष्टा स्पृशेर्लुट् । लोके हि वर्षुकः पर्जन्य औदार्ये दृष्टान्ततया प्रसिद्धः । रघुनन्दनदानविषये तु स न तथात्वमर्हति । रघुनन्दनो हि " दद्यान्न प्रतिगृह्णीयात् " इति प्रसिद्धः । मेघस्य तु उक्तरीत्या परोपभुक्तत्यक्ताम्बरादीनां ग्रहणान्महदन्तरमनयोरिति भावः । व्यतिरेकप्रतीपालङ्कारौ ।

४६१. **पत्रमिति** । " पत्रं पुष्पं फल "मिति गीतोक्तरीत्या सर्वसुलभान्येव । तानि च स्वाश्रितेभ्यः केभ्यश्चिदेव न तु सर्वेभ्यः दत्वा वृथोन्नतेन " कल्पवृक्षो महोदार " इति वृथा श्रैष्ठ्यं प्राप्तेन देवद्रुणा कल्पवृक्षेण, सर्वेभ्यश्चतुरोऽपि पुरुषार्थान् दातुं समर्थस्त्वं नोपमातुं योग्यः । प्रतीपम् ।

काठिन्यैकास्पदमिह मणिः कश्चिदास्तां जडात्मा
चिन्तापूर्वं जगति विबुधा यस्य गृह्णन्ति नाम ।
सर्वज्ञं त्वां सदयहृदयं नित्यदौर्गत्यचिन्ता-
सन्तापघ्नं रघुकुलपते संश्रयन्ते गुणज्ञाः ॥ ४६२ ॥

जगति वितरणेन धैर्यतो वा
जयसि सुपर्वतरूपमाश्रितस्त्वम् ।
भजसि हिमकराङ्कतुल्यभावं
स्वयमभिरूपतया च वर्णतश्च ॥ ४६३ ॥

रविक्रमाणां नरविक्रमाणां
त्वदोजसा व्रीलकृता जिता ये ।
मनोऽदयं ते नमनोदयं ते
कृत्वा द्विषस्त्वेष्वपि शीतयन्ति ॥ ४६४ ॥

---

४६२. **काठिन्येति** । जडात्मा ज्ञानशून्यः, चिन्तामणेरपि पाषाणत्वेन अचेतनत्त्वात् । यस्य नाम चिन्तापूर्वकं, चिन्ताशब्दपूर्वकं व्यसनपूर्वकं च । सर्वज्ञमिति सदयहृदयमिति च चिन्तामण्यपेक्षया महान् व्यतिरेकः दर्शितः । दौर्गत्येति । सांसारिकसर्वतापहरं गुणज्ञास्त्वां संश्रयन्ते । त्वयि दातरि सति तन्नामग्रहणेऽपि जुगुप्सन्त इत्यर्थः ।

४६३. **जगतीति** । सुपर्वतरुः कल्पवृक्षः, तस्य उपमां सादृश्यमाश्रितः सुशोभनः पर्वतो मेरुः, तस्य रूपमाश्रितः तद्वदप्रकम्प्य इत्यर्थः । जयसि सर्वोत्कर्षेण वर्तसे । अभिरूपतया सौन्दर्येण वर्णतश्च । मन्मथपक्षे 'हि' इति पृथक्पदम् । मकराङ्कस्य मन्मथस्य, हिमकरस्य चन्द्रस्य अङ्कस्य कलङ्कस्य च । तुल्यभावं सादृश्यं भजसि प्राप्नोषि । वर्णतः श्यामत्त्वात्, मन्मथवत्सुन्दरत्वाच्च ।

४६४. **रवीति** । रविक्रमाणां व्रीलकृतापि, न रविक्रमाणां व्रीलकृतेति विरोधः, सूर्यतेजःप्रसराणां इतरनरपराक्रमाणां च व्रीलकृतेत्यर्थः । मनः,

यदीश्वरोऽप्यञ्चसि राघवत्वं
नराघवत्वं तदपाकरोषि ।
सीतापते युक्तमिदं तु चित्रं
यशोधनस्त्वं नयशोधनोऽपि ॥ ४६५ ॥

राम त्वच्चरणारविन्दरजसा संक्रन्दनासक्तिम-
च्छापार्तप्रमदाशिलामयवपुर्भङ्गाय टङ्कायितम् ।
आश्चर्यं शशिखण्डमण्डनमहाकोदण्डसारस्य तु
च्छेदे त्वत्करपल्लवेन मृदुना बाल्ये कुठारायितम् ॥ ४६६ ॥

अदयं, ते, नमनोदयं ते इति पदच्छेदः । ते तव, द्विषः, ते नमनोदयं प्रणाम-प्रसङ्गं कृत्वा, स्वेषु विषये, अदयमपि, दयारहितमपि, ते मनः शीतयन्ति दयया आर्द्रयन्ति । "यदि वा रावणः स्वय"मिति वैरिष्वपि प्रणिपातान्तमेव वैरं विवृणोषीत्यर्थः । विरोधाभासः ।

४६५. **यदिति** । हे सीतापते ! त्वं ईश्वरोऽपि अजायमानोऽपीत्यर्थः । राघवत्वं रघुकुलोद्भवत्वं, अञ्चसि गच्छसि । तद्राघवत्वं च नापाकरोषि नापलपसि च । नराणां, अघवत्त्वं, पापवत्त्वं, अपाकरोषि अपनुदसीति युक्तमिदं, यशोधनोपि न यशोधन इति तु चित्रम् । नयस्य राजनीतेः, शोधनः परामर्शक इति परिहारः । विरोधाभासः ।

४६६. **रामेति** । संक्रन्दनासक्तिमती अत एव शापार्ता प्रमदा अहल्या । तस्याः शिलामयवपुर्नाशाय रजसा टङ्कायितमित्यन्वयः । टङ्कः शिलाभेदनसाधनमयोमयायुधविशेषः । शशिखण्डमण्डनः रुद्रस्तस्य महाकोदण्डः महद्धनुः तस्य छेदे भङ्गे, मृदुना करपल्लवेन, कुठारायितमित्याश्चर्यम् । त्वदीयचेष्टितम् अमानुषमित्यर्थः । उपमा ।

बाहाकल्पमहाकुठारदहनस्वाहाकृतक्षत्रियो
हा हा साहसिकाग्रणीः स्वजननीदेहावदानादपि ।
क्रोधान्धो बत नाजुगुप्सत जगत्क्षोभाय यो भार्गवः
श्रीमन् राम वियोजितस्स भवता चापेन कोपेन च ॥ ४६७ ॥

वरहितभार्गवकार्मुकविजयात्तव राम भूजयावाप्तिम् ।
निश्चितवान् मिथिलायां जनकस्साकेतपुरपथे तातः ॥ ४६८ ॥

कोदण्डस्य गुणेन तत्रभवतः कर्णान्तमास्कन्दता
ताटङ्कप्रकरास्तमीचरवधूकर्णान्ततश्च्यावितः ।
किञ्चैनं रघुनन्दन त्वयि बलाद्दूरं समाकर्षति
त्रुट्यन्ति प्रतिकूलराजमहिषीमाङ्गल्यसूत्राण्यहो ॥ ४६९ ॥

---

४६७. **बाहेति** । बाहायाः बाहोः, आकल्पः अलङ्कारः यः कुठारस्स एव दहनः तत्र स्वाहाकृताः हताः क्षत्रियाः येन सः । स्वजननी देहावदानात् तन्नाशनादपि क्रोधान्धः जगत्क्षोभाय यो नाजुगुप्सत स भार्गवः परशुरामः, भवता चापकोपरहितः कृत इत्यर्थः ।

४६८. **वरेति** । तातः दशरथः । साकेतपुरपथे मिथिलायां जनकः च । वरहितेति । वकारेण रहितं, त्यक्तं यद्भार्गवकार्मुकं शिवकोदण्डं, भार्गवशब्दे वकारत्यागे भार्गं भर्गसम्बन्धीत्यर्थलाभात् । तस्य विजयात् भङ्गात्, तथा वरं, शिवकोदण्डजयित्वात् श्रेष्ठं, हितं रावणादिवधोपयोगित्वादनुकूलं च, यद्भार्गवकार्मुकं वैष्णवं धनुः तस्य विजयात् वशीकारात् । पूर्वं विष्णुशिवयोः पारम्यनिर्दिधारयिषया प्रवृत्तायां बलपरीक्षायां वैष्णवधनुषा शिवधनुषः स्तम्भितत्वात्, देवा विष्णुमधिकं निश्चितवन्त इति कथात्रानुसन्धेया । भूजया सीतया सह अवाप्तिं समागमं भुवः जयावाप्तिं च निश्चितवान् निरचिनोत् । श्लेषः काव्यलिङ्गं च ।

४६९. **कोदण्डस्येति** । गुणः कर्णान्तमास्कन्दन् राक्षसवधूनां कर्णान्तात् ताटङ्कान् च्यावयति । रघुनन्दनेन बलादाकृष्टः स्वयं न त्रुट्यति,

तव प्रतिभटैरहो तपनवंशमुक्तामणे
रणे प्रहरणग्रहे विरचितः स्थलव्यत्ययः ।
उदग्रतरवारिसन्ततिरधीक्षणं तैर्दधे
गदाधिगतिराशये पदयुगेऽपि चापक्रमः ॥ ४७० ॥

बाणेभ्यः प्रतिबिभ्यतां सपदि नो वक्त्रावलीढैस्तृणैः
प्राणत्राणमहो कृतं रणभुवीत्येते कृतज्ञा इव ।
त्वत्प्रत्यर्थिमहीक्षितः स्वनयनादुज्जृम्भितैरम्भसां
पूरैः राघव जीवयन्ति विजले तृण्यामरण्यान्तरे ॥ ४७१ ॥

साम्राज्यं भरताय भौममतुलं प्रादाय पित्राज्ञया
सीतावल्लभ काननेऽथ भवता सख्ये पितुः पक्षिणे ।
दिव्यं राज्यमनिर्जरैरसुलभं दत्तं ततो दातृतां
स्तोतुं वा पितृभक्ततां निरुपमां कोऽनाम जानाति ते ॥ ४७२ ॥

किं तु शत्रुराजमहिषीमङ्गलसूत्राण्येव त्रुटयन्ति । रामस्य पराक्रमः शत्रुवधकारीति यावत् । असंगतिरलङ्कारः ।

४७०. **तवेति** । हे तपनवंशमुक्तामणे हे रामचन्द्र ! तव शत्रुभिः रणे युद्धे प्रहरणग्रहे, आयुधग्रहे स्थलव्यत्यासः कृतः । तथा हि उदग्रतरवारिसन्ततिः, उदग्रा तरवारिसन्ततिः खड्गपरम्परा उदग्रतराणां वारीणां सन्ततिः, अविच्छेदः । अधीक्षणं नेत्रयोः । गदायाः, गदस्य रोगस्य च अधिगतिः प्राप्तिः, आशये मनसि । पदयुगेऽपि चापक्रमः धनुःक्रमश्च । अपक्रमः पलायनमित्यर्थः । नेत्रयोः मनसि पादयोश्च उक्तायुधविशेषधारणात्, स्थानव्यत्यासः स्फुटः । अक्ष्णोरश्रुपरम्परा, मनसि शोकः पदयुगे पलायनमिति परिहारः । श्लेषः ।

४७१. **बाणेभ्य इति** । बाण इति भीताः शत्रवः भूमौ पतिताः तृणानि आस्यसम्बद्धानि कुर्वन्ति । पलायिता वनान्तरे कथञ्चित् प्राणान् धारयन्तीत्यर्थः । तृणेषु कृतज्ञतया नेत्रस्रुतैरश्रुभिः तृणसमूहं जीवयन्तीवेत्युत्प्रेक्षा ।

घनेन भवताप्यहो घटितपङ्कभङ्गश्रिया
कबन्धज उपद्रवः खलु कथावशेषीकृतः ।
रघूद्वह रुमापतेरपि विजृम्भितास्सम्पदः
पदापि सुतरः कृतः प्लवगसंहतेस्सागरः ॥ ४७३ ॥
उचितो रघुसिंह विक्रमैस्ते
परमैरावणकुम्भकर्णभङ्गः ।
शरभारवतो न ते विषादः
समपादीति तु चित्रमत्र विद्मः ॥ ४७४ ॥
विभीषणं राज्यपदे कपीनां
देहेष्वसून् दिव्यपि राम देवान् ।
दृढं प्रतिष्ठाप्य च दिक्षु कीर्तिं
पुरीमयोध्यां पुनरागतोऽसि ॥ ४७५ ॥

---

४७३. **घनेनेति** । घनेन मेघेन महात्मना च, पङ्कः कर्दमः पापं च । कबन्धजः उदकजन्यः कबन्धासुरजन्यश्च उपद्रवः । कथेति लोपित इत्यर्थः । अहो इति मेघवर्षजलेन पङ्कवृद्धिरेव स्यात् न तु भङ्ग इत्याश्चर्यम् । पापभङ्गकारीति परिहारः । रुमा सुग्रीवभार्या । सागरस्सुतरः कृत इत्यर्थः ।

४७४. **उचित इति** । परमैः विक्रमैः रावणकुम्भकर्णभङ्गः परं ऐरावणकुम्भकर्णभङ्ग इति च । तथा शरभारवतः, शरभस्य सिंहशत्रोर्मृगविशेषस्य आरवतः ध्वनेः, शराणां भारोऽस्यास्तीति शरभारवान् तस्य च । ते सिंहविक्रमेण ऐरावतकुम्भादिभङ्गजनकत्वस्य युक्तत्वेपि सिंहस्य स्वशत्रुमृगविशेषध्वनितो विषादो न जात इत्याश्चर्यम् । शरभारविमोक्षणदक्षत्वात् युद्धे विषादो न जात इति परिहारः । विरोधाभासः ।

४७५. **विभीषणमिति** । लङ्काराज्यपदे विभीषणं, कपीनां युद्धे मृतानां देहेषु प्राणान् , स्वर्गलोके देवांश्च, दिक्षु च कीर्तिं प्रतिष्ठाप्य अयोध्यां पुनरागतः । राज्यं विहाय वनप्रस्थानेन एतावत्फलमभूदिति भावः ।

दशरथनृपदुग्धोदन्वतश्शीतभानो
दशलपनमुखानां दारणाद्दारुणानाम् ।
जगति विगतिकत्वात् सीदतां तापसानां
जनकदुहितृजाने जीवनं त्वां विजाने ॥ ४७६ ॥

पुराण विदुषां गणं पुनरकृत्रिमाणि स्वयं
विचारय वचांसि च व्यसनिनां दयेथा नृणाम् ।
प्रवर्तय सुवर्तनीं प्रणिजहि प्रतिद्वन्द्विना-
मशेषमवनीतले त्वमवनीतलेखोत्सवः ॥ ४७७ ॥

गर्वत्पर्वतपक्षतक्षणचणस्वर्वंशनिर्वंशित-
क्रुध्यत्पूर्वसुपर्वधूर्वहरणारम्भाय जम्भारये ।
काशस्तम्बनिकाशतां प्रददति श्रीराम घोरार्तिकृ-
त्संचारेऽपि दशास्यहस्तिनि भवानानश्च पञ्चास्यताम् ॥ ४७८ ॥

---

४७६. **दशरथेति** । दशरथनयनानन्दकरेत्यर्थः त्वत्वात् । पुदारुणानां दशमुखादीनां दारणात् छेदनात्, तापसानां जीवनकरं त्वां विजाने इत्यर्थः ।

४७७. **पुराणेति** । प्रतिद्वन्द्विनां अरीणां । अशेषं निःशेषं यथा तथा । प्रणिजहि सर्वान् शत्रून् जहीत्यर्थः । 'जासिनि प्रहणे'त्यादिना कर्मणि षष्ठी । अवनीतः न्यक्कृतः लेखानां देवानामुत्सवो येन तादृशः । देवापेक्षया अधिकैः उत्सवैः स्वप्रजाः प्रमोदयतीत्यर्थः ।

४७८. **गर्वदिति** । पूर्वसुपर्वाणः असुराः तेषां रणारम्भः । स्वरुः वज्रः तस्यांशः तेन निर्वंशितः निर्मूलितः येन, तादृशाय जम्भारये इन्द्राय काशतौल्यं प्रददति दशास्यहस्तिनि रावणरूपगजे पञ्चास्यतां सिंहत्वं प्राप्तवानित्यर्थः ।

बहुशस्त्रिदशाननप्रभा भवता दाशरथे हृता यदा ।
बहुशस्त्रिदशाननप्रभा जनिता हन्त तदैव सङ्गरे ॥ ४७९ ॥

त्वयि रामचन्द्र सति राज्ञि जृम्भिते विकचीभवन्त्यपि च नीरजश्रियः ।
भुवि साधुचक्रपरितोष एधते परिशोशुषीति जलधी रयादहो ॥ ४८० ॥

आयुस्समस्तसमयानपि भाविनस्ते
व्याप्नोतु कीर्तिरपि राघव सर्वदेशान् ।
शास्त्राणि बुद्धिरतुला सकलानि शश्वत्
आज्ञासमृद्धिरखिलानि शिरांसि राज्ञाम् ॥ ४८१ ॥

इदं तु श्रोतव्यम्—

सन्दर्शनेन तव सार्थकमीक्षणं नः
सम्भाषणेन रसना रघुनाथ पुण्या ।
भद्रं तवास्तु परिपूर्णमनोरथाः सो
गन्तुं निजाश्रमपदं क्रियतामनुज्ञा ॥ ४८२ ॥

इति कुम्भसम्भवोपनीताः कथासुधाः कर्णाभ्यर्णं आस्वाद्य मन्दस्मितसुन्दरमुखारविन्दो रघुनन्दनः सानन्दमेवं दक्षिणहरिद्वास्तव्य-मुनीन्द्रमवोचत् ॥ ४८३ ॥

---

४७९. **बहुशस्त्रि**ति । बहूनि शस्त्राणि अस्य सन्तीति बहुशस्त्री दशाननः । बहुशः त्रिदशानामाननप्रभा जनिता । रावणहननेन देवानां मुखोल्लासोऽभूदित्यर्थः । विरोधालङ्कारः ।

४८०. **त्वयी**ति । राज्ञि चन्द्रे राजनि च । नीरजश्रियः निर्गतं रजः रजोगुणः येभ्यस्तेषां श्रियः सम्पदः । नीरजानां पद्मानां कान्तयः च । विकचीभवन्ति, विकसिता भवन्ति । साधूनां चक्रं, साधु सम्यक्, चक्रवाकपरितोषः । जलधिः सागरः, रयात् वेगात् । परिशोशुषीति भूयः शुष्यति । डलयोरभेदात् । जडधीर्जनः अयात् शुभावहाद्विधेः "अयश्शुभावहो विधि"रित्यमरः । शोशुषीति । शुषेर्यङ्लुगन्ताल्लट् । चन्द्रोदये पद्मो ल्लासस्य चक्रवाकहर्षस्य समुद्रशोषस्य च सम्भवादाश्चर्यम् । विरोधाभासालङ्कारः ।

वासभूरपि निजा मुने त्वया
वासराणि कतिचिद्विभूष्यताम् ।
मद्गृहानपि पुनः पुनः पुन-
न्त्वादरेण तव पादरेणवः ॥ ४८४ ॥

एवमैक्ष्वाकेण राज्ञाऽनुज्ञातो वातापितापनस्समं तापसैराप स्वाश्रमपदं, तरणिरपि पश्चिमधरणीधरशिखरम् ॥ ४८५ ॥

निशि किल दम्पतिभ्यांमारभ्यमाणस्य मनसिजमहोत्सवस्य नीराजनोपहरणाय समयबन्धुना संभृतमिव कुङ्कुमजलपूर्णसुवर्णभाजनं, पथिकयुवतिजनसंहननकनकशलाकोपतापनोपयोगितिमिरमयेङ्गालसङ्घातसम्पिपादयिषया विधिसुवर्णकारेण चरमगिरिविपिनभुवि संहियमाणमिव प्रत्यग्राङ्गारराशिं, विक्रयार्हपदार्थप्रसारणानुगुणवासरपरिणामे पश्चिमरत्नाकरवणिजा पाश्चात्यभूभृत्कटकापणे क्रयार्थं प्रसारितमति-पृथुलमनर्घमिव पद्मरागोपलं मधुपानमत्तचित्ताभिः अपरगिरिशबर-युवतीभिरलघुपललभ्रमेण स्पृष्टमित्यपरिशुद्धिनिवृत्तये विधिना वह्निभिर्दह्यमानमिव वरुणालयजनकनकभाजनं, अधिक्षपमाविर्भविष्यन्तीनामतिशीतयातनानां अपनोदनाय वरुणान्तःपुरं नेतुं बहिरेव विधूमीक्रियमाणवह्निकामिव हसन्तिकां, जगदेव जेतुं प्रतिष्ठमानस्य मनसिज-महाराजस्य नवायुधनिर्माणार्थं सन्तन्यमानमिवोर्ध्वविसरत्किरणमय-बृहदायुधान्तरप्रहारसमुत्थितस्फुलिङ्गदीपितदिगन्तरमयोगोलकं, प्रचेतसा राज्ञा प्रादोषिकपूजनाय पश्चिमाचलपीठे प्रतिष्ठापितमिव पद्मराग-शिवलिङ्गं अस्तगिरितटवनकुटीरवास्तव्याभिर्भिल्लवल्लभाभिरनल्पाकल्प-कल्पनाय संगृहीतमिव गुञ्जापुञ्जं, कञ्जबन्धुमण्डलं पारेपारावार-मवलोकयन् युवलोक एवमालोचयत् ॥ ४८६ ॥

---

४८६. **निशीति** । सूर्यास्तमयवर्णनमारभते । मनसिजमहोत्सवस्य कामोत्सवस्य । 'पथिकेत्यादि' । सुवर्णकारो हि लोके स्वर्णताटङ्काद्याभरण-निर्माणाय प्रत्यग्राङ्गाराणि इङ्गालानि संपाद्य कार्यावसरे धूपनं कृत्वा स्वर्णतापनं करोति । तद्वदित्युत्प्रेक्षा । पश्चिमरत्नाकरः पश्चिमसागरः पाश्चात्यो रत्नवान् वणिक्

अपि विष्णुपदं विहाय हंसो
जलराशिं प्रतिपित्सते यतोऽसौ ।
अपरागसमागतोऽपि तस्मात्
अतिरागं पतयालुरेति युक्तम् ॥ ४८७ ॥
द्विजराजवसुहरोऽसौ तीक्ष्णकरैः कलितकुवलयग्लानिः ।
अन्ते सानुशयः किं, पूजा काषायमंशुकं धत्ते ? ॥ ४८८ ॥ इति ॥

च । पाश्चात्यभूभृत् अस्ताचलः तस्य कटक एव आपणे । पद्मरागोपलमिति । अस्तमयकाले सूर्यबिम्बस्य रक्तत्वात् । पललं मांसम् , अशुचिजनस्पृष्टपात्रस्य वह्नौ तापनात् शुद्धेः वह्निभिर्दह्यमानमित्युक्तम् । अधिक्षपं क्षपायां । हसन्तिके ति । अतिशीतकाले शीतबाधापरिहाराय धूमरहिताङ्गारसम्भृतः साधनविशेषः वर्तुलाकारः हसन्तिका । मनसिजेति । अयोगोलके हि लोके तत्तदायुधनिर्माणाय तप्तान्ययःकीलकानि निधाय तदुपरि बृहदयोमयसाधनेन प्रहृत्य तक्षणं क्रियते लोहकारेण, तदात्वे स्फुलिङ्गाः परितः प्रसरेयुः । तद्वदस्तमयकाले सूर्यविम्बमित्यर्थः । कञ्जबन्धुः सूर्यः ।

४८७. **अपीति** । विष्णुपदं आकाशः भगवच्चरणारविन्दं च । हंसः सूर्यो योगी च । जलराशिस्समुद्रो जडसमूहश्च । विशेषेण सामान्यं समर्थयति । अपरागेति । अपरागः अपरो अगः पश्चिमाचलः, अपगतो रागश्च । अतिरागं अत्याशामारुण्यातिशयं च । पतयालुरिति । पतन्नित्यर्थः । नाशसमये दीपज्वालेव सर्वोऽपि पतनावसरे प्रकाशते इति भावः । श्लेषः अर्थान्तरन्यासश्च ।

४८८. **द्विजेति** । द्विजराजवसुहरः ब्राह्मणस्वापहर्ता, तीक्ष्णकरैः कठोरकिरणैः दुस्सहबलिनियमैश्च । बलिर्नाम राज्ञे देयो भागः । कुवलयं भूमण्डलं, अन्ते वयःपरिणामे दिवसावसाने च, सानुशयः सपश्चात्तापः, पश्चिमगिरिशिखरस्थश्च । कषायमेव काषायं स्वार्थे अण् , कषायेण रक्तं, काषायं, अंशुकं द्युतिं वस्त्रं च धत्ते धारयति । अन्यत्र द्विजराजस्य चन्द्रस्य कान्तिहारी, कलिता कुवलयानां ग्लानिः येन सः । पूर्वं पापी पश्चादनुतापी सन् सन्यासाश्रमं भजते । किमिति काक्वा निन्दा प्रतीयते । सन्ध्याकाले सूर्यस्य रक्तवर्णत्वादेवमुच्यते । किं शब्दवाच्या त्वपेक्षा ।

ततश्च —

अजस्रमन्तःप्रतिपन्नहंसः
प्राप्तः परागं परमं च रागम् ।
आसीदिनः कोकनदैकबन्धुः
तदानुकूल्यादिव तौल्यतोऽपि ॥ ४८९ ॥

महसां मम मापगादपा-
मुपघातात् परमुष्णतेति किम् ।
निदधद्दहने निजत्विषो
निपपात स्वयमर्णवे रविः ? ॥ ४९० ॥

स्ववंशजातैः सगरस्य पुत्रैः
विनिर्मितं सागरनामधेयम् ।
पूतं महत्साधयितुं स पूषा
पुनः पुनर्मज्जति तत्र नूनम् ॥ ४९१ ॥

---

४८९. **अजस्रमिति** । हंसः विष्णुः मरालश्च । परागः पश्चिमाचलः रेणुश्च । इनः सूर्यः । आनुकूल्यात् विकासादिबन्धुकृत्यनिर्वर्तनात् । तौल्यतः साधर्म्याच्च । कोकनदे हंससत्त्वात् रेणुमत्त्वात् रक्तत्वाच्च तत्साम्यं सूर्यस्य ।

४९०. **महसामिति** । अर्णवे निपततो मम महसामुष्णता, अपामुपघातात्, मापगात् मागमत् इति निजत्विषः दहने निदधत् निक्षिपन् रविः निपपात किम । सायङ्काले सूर्यकिरणाः वह्नौ संङ्क्रामन्तीति प्रसिद्धेरेवमुक्तम् । उत्प्रेक्षा ।

४९१. **स्ववंशेति** । पूर्वं खातं, महत् साधयितुं महितं कर्तुं । पूषकिरणसंसर्गादेव पूर्तस्य पावनत्वमिति भावः । उत्प्रेक्षा ।

तदानीन्तु —

अभ्युत्थाय वरासनात्प्रणमतोऽनुज्ञाप्य विज्ञाग्रणीः
राज्ञस्स्वस्वनिकेतनाभिगतये रामो नरामोदकृत् ।
सामस्तोमजुषे स्वगोत्रमहसे सामोदमर्घ्यं दिशन्
सन्ध्याकर्म विनिर्ममे निगमतस्सञ्चोदितेनाध्वना ॥ ४९२ ॥

अनन्तरन्तु —

सीदद्घूकविलोचनामयहरं सिद्धाञ्जनं दिग्वधू-
रत्नानामवकुण्ठनासितपटीराजीवजीवान्तकः ।
लुभ्यन्नीचपिशाचविभ्रमवनी लुण्टाकनाट्यावनी
व्योमाम्भोनिधिशैवलं वसुमतीमास्कन्ददन्धं तमः ॥ ४९३ ॥

किञ्च —

पाश्चात्यसन्ध्याप्रभवानलेन
प्राप्तासु संवित्सरसीषु शोषम् ।
पङ्का इवासां परितः प्रकामं
तदाभ्युदञ्चन् तमसां प्रपञ्चाः ॥ ४९४ ॥
स्मरो निशि जयश्रियः परिणयोद्यतस्तारका-
सुलाजपरिभर्जनं व्यधित सान्ध्यरागानले ।
समुद्रजलसेकवत्सलिलनाथकाष्ठोद्भवा
ततःपरित उत्थिता तिमिरधूमपारम्परी ॥ ४९५ ॥

---

४९२. अभ्युत्थायेति । सामस्तोमजुष इति "सामवेदेनास्तमये महीयते" इति श्रुतेः । स्वगोत्रमहसे सूर्याय श्रीरामचन्द्रस्य तत्तत्काले सन्ध्यानुष्ठातृत्वस्य रामायणे बहुलं प्रसिद्धत्वादेवमुक्तम् ।

४९४. पाश्चात्येति संवित्सरसीषु ज्ञानसरस्सु जलशोषणात् पङ्क इव ज्ञाननाशनात् तम उदञ्चतीति भावः । वस्तूत्प्रेक्षा ।

४९५. स्मर इति । विवाहे लाजहोमार्थं अग्नौ लाजभर्जनं प्रसिद्धम् । तद्वत् सलिलनाथः वरुणः, तस्य काष्ठा दिक्, तदुद्भवा । काष्ठं इन्धनं तदुद्भवा च । तिमिराण्येव धूमाः तेषां पारम्परी उत्थिता । जलसिक्त-काष्ठादेव धूमोद्गम इति भावः ।

परिग्राह्यान् राज्ञा समयरजकः पङ्कजसुहृ-
त्करस्पर्शादृश्यानुडुपटगणानुज्ज्वलतमाम् ।
प्रभां नेतुं रोदःपृथुलकलशीगर्भविसर-
त्तमःपालीनीलीसलिलपरिमग्नानकलयत् ॥ ४९६ ॥

निर्मज्जितं हि विधिना निजतातमब्धौ
निर्धार्य सूर्यतनया निशि जातरोषा ।
मन्ये समस्तमपि मज्जयितुं प्रपञ्चं
ध्वान्तात्मना परिससर्प दिगन्तरेषु ॥ ४९७ ॥

भुवि च दिवि च दीपैर्वह्नि नक्षत्ररूपैः
शबलवपुरनल्पोज्जृम्भितैरन्तरन्तः ।
रजनिसुवदनायाश्चम्पकश्रेणिशोभा
रुचिरचिकुरलक्ष्मीमन्धकारं चकार ॥ ४९८ ॥

अन्धकारमयगोमयपङ्कैरङ्कितेऽम्बरतले समयात्मा ।
तारकावलिबलिं नवसन्ध्यावह्निभाजि विदधे विबुधेन्द्रः ॥४९९ ॥

---

४९६. **परिग्राह्यानिति** । राज्ञा प्रभुणा चन्द्रेण च । पङ्कज-सुहृत् सूर्यः, अन्यत्र पङ्के जातान् सुष्ठु निर्विशङ्कं हरतीति सुहृत्, पङ्कजहरणात् तस्य करोऽपि पङ्किल इति भावः तत्स्पर्शादृश्यान् । अदृश्यमानस्वरूपा-नित्यर्थः । मलिनानितियावत् । रजकाः मलिनानि वस्त्राणि शोधयितुं नीली-सलिले निमज्जयन्तीति प्रसिद्धम् । रूपकम् ।

४९७. **निर्मज्जितमिति** । निजतातं सूर्यं, तनया यमुना । ध्वान्तात्मनेति । यमुनाप्रवाहस्य नीलत्वादेवमुच्यते । उत्प्रेक्षा ।

४९८. **भुवि चेति** । शबलवपुः, अन्धकारं कर्तृ । चिकुराणां कृष्णत्वेऽपि, वह्नि नक्षत्रतेजोरूपैर्व्योमिश्रितत्वात् शोणवर्णत्वमपि ।

४९९. **अन्धकारेति** । विबुधेन्द्रः बुधश्रेष्ठः । नक्षत्रावलिरेव प्रकीर्णबलिः । लोके शिष्टैः गोमयोपलिप्तस्थले वैश्वदेवबलिहरणकरणात् अत्र तथा रूप्यते ।

अनुन्मीलद्वृष्टिः प्रकृतिरपरा वा जलमुचा-
मनौज्ज्वल्याधायी किमु जनदृशामञ्जनरसः ।
अवस्त्रारब्धा किंन्वभिसृतिपराणां यवनिका
तमःश्रेणीमेणीदृश इति विदग्धा बुबुधिरे ॥ ५०० ॥

विश्वविमोहितमोमयदृप्य-
त्कुण्डलिमण्डलखण्डनचण्डः
भूषयति स्म पुरन्दरकाष्ठा-
भूमिभृतः शिखरं द्विजराजः ॥ ५०१ ॥

दिक्सौधप्रकरसुधाद्रवायमाणः
कन्दर्पक्षितिपयशोभरायमाणः ।
चाकोराननकुहरे सुधायमानः
चान्द्रीणामथ रुरुचे रुचां प्रचारः ॥ ५०२ ॥

---

५००. अनुन्मीलदिति । रात्रौ तमःश्रेणीम् विदग्धाःप्रौढाः एणीदृशः हरिणाक्ष्यः । वृष्टिरहिता मेघपङ्क्तिर्वा । विलक्षणः दृष्टेरप्रकाशकारी अञ्जनरसविशेषः । अभिसृतिपराणां, स्वैरिणीनां वस्त्रेण विनैव कृता यवनिका वा तिरोधानकारिणी । तासामन्धकारेण तिरोधानात् इति संदिदिहुः । ससन्देहालङ्कारः ।

५०१. विश्वेति । कुण्डलिनां सर्पाणां मण्डलं समूहः । पुरन्दरकाष्ठेति । प्राचीदिग्वर्त्युदयाचलशिखरमित्यर्थः । द्विजराजश्चन्द्रः गरुत्मांश्च । रूपकम् ।

५०२. दिक्सौधेति । चन्द्रोदयस्य मन्मथोद्दीपकत्वात्तथोक्तम् ।

अनन्तरमनन्तरत्नदीपस्थापनादनाघ्रातध्वान्तगन्ध, मानन्दमन्दाकिनीप्रवाहाणां प्रभवस्थानमपरमिव तुषारधराधरं, कम्पनसम्पादनेन कृतापराधस्य दशकण्ठस्य हन्तारं कृतज्ञतया स्वयमेव वोढुमुपगतमिव कैलासशैल, मुत्तरदिक्पालः पुष्पकसमर्पणेन रघुनाथमाराधयतीति स्पर्धया पूर्वदिक्पालेन प्रेषितमिवैरावतं, पारावतपोतपरितन्तन्यमानमणितपाठं पञ्जरकृतसञ्चरणमञ्जुलशुकमाणवकाभ्यस्यमानमदनवेदघोषं नातिसूक्ष्मगवाक्षविवरप्रविष्टमन्दस्पन्दनचन्दनगिरिकन्दरचरसमीरचोरपरिमुषितसुरतसमरार्जितश्रमजलकणमौक्तिकमणिगणं, पीताम्बरविरचितवितानिबद्धविविधकुसुमसमुपगतमधुकरसंघातझङ्कारविवृतशृङ्गाररससम्प्रदायं, प्रत्यासन्ननन्दनवनकनन्मन्दारस्तबकपरागवृन्दपरिपतनसमुपनतधूसरिमधूननक्षमनिकटविलुठदमरगङ्गातरङ्गालिङ्गनावदातमकुटतटं, परिनिहितस्फटिकमणिरुचिपटलसम्पुटितनिखिलहरित्प्रसादं प्रासादं, सौविदल्लजनदत्तहस्तावलंबः कुसुमकलम्ब इव सशरीरो रघुवीरः स्तनजघननितम्बभरगरिमपुनरुक्तमान्यविलासगतया विदेहसुतया समं तदुच्चलनतरलतरमेखलादिमणिकलापकुलविशृङ्खलसमुत्थितेन झळज्झलध्वानेन, निजचरणनलिनयुगलपरिचुम्बितमणिपादुकावतारेण झङ्कारेण, विस्रब्धशुद्धान्तजनारब्धैस्सावधानादिशब्दैश्च वाचालितेन, मणिमयसोपानपथेन मन्दमन्दमुदयगिरिमिव चन्द्रमास्समारुरोह ॥ ५०३ ॥

पर्यायत्रिदशेन्द्रमन्दिरमथ प्रासादमासादयन्
आस्तीर्णं मृदुचित्रवर्णवसनैराभूषयन्नासनम् ।
पा स्थामवलोकयन् प्रणयिनीं बिम्बं च नैशाकरं
वक्त्रेण स्मितशोभिना रघुपतिर्वाणीमभाणीदिमाम् ॥ ५०४ ॥

---

५०३. **अनन्तरमिति** । तुषारधराधरः हिमवत्पर्वतः । द्वितीयान्तपदानां उत्तरत्र प्रासादे अन्वयः । सौविदल्लेति । कञ्चुकधारी भृत्यः इत्यर्थः । वाचालितेन शब्दायमानेन सोपानपथेन । चन्द्रमा उदयगिरिमिव रघुवीरः प्रासादं समारुरोहेत्यन्वयः ।

निद्रामुद्रान्तरायः कुमुदपरिषदां नीचलुण्टाकनाग-
प्रागल्भ्यच्छेदसिंहः पथिकयुवजनप्राक्तनापुण्यराशिः ।
नीहाराहार्यकन्यापरिबृढमकुटीनित्यभूषाविशेषो
निक्षेपो दृक्सुखानां नयनयुगपदं नीयतामिन्दुरेषः ॥ ५०५ ॥

तृषातुरचकोरकाध्वगजनप्रपामण्डपं
कलङ्कशुकपञ्जरं गगनशाखिनो मञ्जरीम् ।
निशामय निशापतेर्हरिहरिद्धधूकुण्डलं
तमःकवलविभ्रमद्रुचिपिचण्डिलं मण्डलम् ॥ ५०६ ॥

जैत्रच्छत्रमनङ्गवीरनृपतेः जम्भारिदिक्कुम्भिनः
कुम्भादुद्गलितो नु मौक्तिकमणिः कोकीविषादोच्चयः ।
निद्रासाधनमौषधं जलरुहां नीलोत्पलश्रेणिका-
हासोत्पादविदूषको हृदि किरत्यानन्दथुं चन्द्रमाः ॥ ५०७ ॥

अथवा —

---

५०५. **निद्रेति** । नीचा लुण्टाकाश्चोराः त एव नागाः गजाः तेषां सामर्थ्यभञ्जकः सिंहः, तमस्येव चोराणां सञ्चारात् चन्द्रोदयस्य तद्विरोधित्वात् । पथिकयुवजनानां पुराकृताऽपुण्यराशिः तेषां विरहजन्यदुःखवर्धकत्वात । नीहाराहार्यकन्या हिमवत्पर्वतपुत्री, तस्याः परिबृढः नाथः शिवः तस्य शिरोभूषाविशेषः इन्दुः, रुद्रस्य चन्द्रमौलित्वात् ।

५०७. **जैत्रेति** । जम्भारिदिक्कुम्भिनः ऐरावतस्य । नीलोत्पलश्रेणिकायाः हासः, विकास एव हासः, हास्यं, तस्य उत्पादने विदूषकः, "हास्यप्रायो विदूषकः" इति लक्षणादिति भावः । उल्लेखालङ्कारः ।

हरिहरिदणुमध्याहंसको लाञ्छनश्री-
मरकतमणिरक्षामञ्जुमञ्जूषिका वा ।
प्रथमशिखरिसालग्रामपाटीरपिण्डो
मनसिजशुचिकुण्डं मण्डलं शीतभानोः ॥ ५०८ ॥

सपत्नीकैरेव प्रणयिनि निषेव्यो युवजनैः
सतां मार्गं पुष्णन् ग्रहपरिवृतश्शश्वदमृतैः ।
सुरान्धिन्वन् सोमस्सुरजनिकरोऽयं विजयते
क्रतुध्वंसी त्वेनं कथमिव शिरोभूषणयति ॥ ५०९ ॥

इयं चान्या वैचित्री —

स्वयं कुवलयस्वापहारी हृतसदंशुकः ।
दोषाकरस्तथाप्येष पाटच्चरभयङ्करः ॥ ५१० ॥

---

५०८. **हरीति** । हरिहरित्, प्राचीदिक्, सैव, अणुमध्या कृशोदरी, तस्या हंसकः पादकटकः । लाञ्छनं कलङ्कः, तदेव मरकतमणिः नीलत्वात् तस्याः मञ्जूषिका पेटिका । प्रथमशिखरी उदयाचल एव सालग्रामः तस्य पाटीरपिण्डः चन्दनलेपः मनसिज एव शुचिः वह्निः, तस्य कुण्डं, चन्द्रस्य मण्डलम् ।

५०९. **सपत्नीकैरिति** । सतां नक्षत्राणां, मार्गं आकाशं, सन्मार्गं च । पुष्णन् प्रकाशयन् अभिवर्धयंश्च । ग्रहैः कुजगुर्वादिभिः, ग्रहेण चमसविशेषेण, परिवृतः स्वीकृतः, अमृतैः सुरान् धिन्वन् प्रीणयन् "प्रथमां पिबते वह्निर्द्वितीयां पिबते रविः" इत्यादिप्रमाणात् । सोमरसस्त्वमृतात्मना परिणम्य देवान् धिनोति । सुष्ठु रजनिकरः निशाकरः । अन्यत्र सुराणां जनिरुत्पत्तिः स्तस्याः करः, सोमपायिनः खलु स्वर्गे लोके देवभूयं गच्छन्तीति भावः । एवं क्रतोर्मुख्यसाधनं सोमं क्रतुध्वंसी शिवः कथं वा शिर आरोपयतीत्याश्चर्यम् क्रतुसोमयोरभेदारोपात् श्लिष्टरूपकम् ।

५१०. **स्वयमिति** । कुवलयस्य भूमण्डलस्य, यत्स्वं ध

अपरा च —

तुषारभानौ त्रिपुरारिचूडा-
पीडाकृतिख्यातिविराजमाने ।
कृष्णान्तरङ्गे कथमर्जुनेऽस्मिन्
नक्षत्रनेतेति ननु प्रवादः ॥ ५११ ॥

अमी खलु —

गात्रे चन्दनकर्दमन्ति सुदृशां हासन्ति वक्त्राम्बुजे
कौशेयन्ति कटीतटे कुचयुगे कर्पूरचूर्णन्ति च ।
मन्दारप्रसवन्ति कुन्तलभरे मन्दान्यमन्दाकिनी-
कल्लोला वियतस्सृता इव करस्तोमास्त्रियामापतेः ॥ ५१२ ॥

तदपहारी, कुवलयकुसुमप्रबोधकारी च । सदंशुकं, सतां वस्त्रं, नक्षत्राणां कान्तिश्च । पाटच्चराः चोराः तेषां भयङ्करश्चन्द्रः चन्द्रोदये प्रकाशेन भयजनकत्वात् । श्लेष-मूलको विरोधः ।

५११. **तुषारेति** । त्रिपुरारेः ईश्वरस्य चूडायाः आपीड, अवतंसः तदाकृतिरिति या ख्यातिः । अन्यत्र चूडायाः पीडाकृतिः बाधाजनन-तया ख्यातिः प्रथा । अर्जुनः किरातवेषधारिणश्शिवस्य शिरो गाण्डीवेन जघानेति ध्येयम् । कृष्णस्य अन्तरङ्गे सुहृदि, कृष्णं, कलङ्केन श्यामं, अन्तरङ्गं अन्तर्भाग यस्य । अर्जुने धवले पार्थे च । नक्षत्राणां नेता, प्रभुः । क्षत्रनेता नेति च । श्लेषोत्थापितः विरोधाभासः ।

५१२. **गात्र इति** । गात्रे शरीरे चन्दनकर्दमन्ति । आचारार्थे क्विप् । चन्दनपङ्कवदाचरन्तीत्यर्थः । एवमुत्तरत्रापि क्विबन्ताः ज्ञेयाः । मन्दार-प्रसवन्ति मन्दारपुष्पवदाचरन्ति । तद्वद्भान्तीत्यर्थः । मन्दान्या अमन्दं प्रवहन्ती मन्दाकिनी देवगङ्गा, तस्या वियतः सृताः कल्लोला इवेत्युत्प्रेक्षा । प्रसिद्ध-मन्दाकिन्या अतिवेगवत्त्वात् चन्द्रकिरणपातस्य च अतथात्वात् मन्दान्येत्युक्तम् । उपमोत्प्रेक्षयोस्संसृष्टिः ।

इत्थं चात्र मम मतिरुदेति —

लक्ष्मीपतिं लक्ष्ममयं घनाभ-
मुच्चैस्स्वयंभूरुडुपे मनोज्ञे ।
आरोप्य पुष्णात्युडुपद्मभाजि
प्लवोत्सवं पुष्करपुष्करिण्याम् ॥ ५१३ ॥

स्नपयति हरितः किरणैः
स्नापयति रसैर्मनांसि युवतीनाम् ।
ग्लपयति पथिकमुखानि
ग्लापयति तथा सुधांशुरब्जानि ॥ ५१४ ॥

हरति मनसि मानं हन्त रूढं वधूनां
अपि विमनसिमानं हन्ति यूनां मयूखैः ।
हिमरुचिरपरागान् रञ्जयत्येष लीला-
सुमरुचिरपरागाडम्बरैश्शम्बरारेः ॥ ५१५ ॥

---

५१३. **लक्ष्मीपतिमिति** । उडुपश्चन्द्र एव, उडुपं प्लवः । उडून्येव पद्मानि तद्भाजि । पुष्करपुष्करिण्यामित्यस्य विशेषणम् । लक्ष्ममयं कलङ्करूपं घनाभं मेघवर्णं लक्ष्मीपतिं नारायणं आरोप्य, प्लवोत्सवं पुष्णाति । देवालयेषु देवस्य प्लवोत्सवः पद्मादिरमणीयपुष्करिण्यां लोके प्रसिद्धः । तद्वदिति भावः । उत्प्रेक्षा रूपकानुप्राणिता ।

५१४. **स्नपयतीति** । स्नपयति स्नापयति, ग्लपयति ग्लापयति । इति रूपभेदस्समानार्थको बोध्यः । अन्यत् स्पष्टम् ।

५१५. **हरतीति** । वधूनां मनसि रूढं दृढं मानं रोषं हरति । तथा यूनां विमनसिमानं, विमनाः दुःखितः तस्य भावः विमनसिमा तम्, विमनसिमेति इमनिच् प्रत्ययः । चन्द्रकिरणस्पर्शेन युवतीनां मानत्यागः यूनां च दुःखहानिः भवतीत्यर्थः । युवतीसंसर्गसम्पादकत्वात् । शम्बरारेः मन्मथस्य लीलासुमरय, रुचिरपरागाडम्बरैः, मनोज्ञरेणुसदृशैः मयूखैरित्यस्य विशेषणम् । अपरागानपि विरक्तानपि रञ्जयतीत्यर्थः । अनुप्रासः ।

आशाः प्रसाधयति हासयति प्रबुद्धा-
मामोदिनीं कुमुदिनीमभिचुम्बति द्याम् ।
स्पृष्ट्वा करेण सरसीकुरुते शिलां स्वा-
माभाति दक्षिण इव क्षणदाधिनाथः ॥ ५१६ ॥

षट्सप्तैरपि यद्यपि प्रसृमरैरेते चकोराः करै-
स्तृप्यन्त्येव तथापि तेषु नियतं तन्द्रां विना चन्द्रमाः ।
भानून् वर्षति हर्षतो बहुतरान् प्रायोऽथवा याचतां
तृप्तिं नावधयन्त्यहो वितरणे दातार एतादृशाः ५१७ ॥

इदं त्ववधेहि —

पान्थानन्धान् विधत्ते प्रभजति नियतं हन्त मालिन्यमन्तः
भग्नं त्रैलोक्यमातुः कलयति निलयं, बाधते साधुचक्रम् ।
कुर्वन् पादप्रचारं बत सदसि सतां प्राप्तकामाभिवृद्धी
राजा मुग्धावतंसो वहति समुचितामेष दोषाकराख्याम् ॥ ५१८ ॥

---

५१६. **आशा इति** । स्वां शिलाम् चन्द्रकान्तशिलां, सरसीकुरुते रसवतीं करोति । आशादिशब्देषु लिङ्गात् स्त्रीत्वप्रतीतेः चन्द्रमसि दक्षिण-नायकत्वारोपः । 'तुल्योऽनेकत्र दक्षिण' इति तस्य लक्षणात् । चन्द्रस्य उक्त-सर्वसन्तोषाधायकत्वात्तौल्यम् । उत्प्रेक्षा ।

५१७. **षट्सप्तैरिति** । एतादृशाः अर्थिकामादधिकप्रदाः दातारः याचतां तृप्तिम् अलंभावं नावधयन्ति अवधिं न कुर्वन्ति । दानशौण्डाः खल्व-र्थिजनतृप्तिमात्रेण न विरमन्ति । अपि तु तदौदार्यानुगुणं बहु ददत्येवेत्यर्थः ।

" चातकस्त्रिचतुरान् पयः कणान् याचते जलधरं पिपासया ।
सोऽपि पूरयति विश्वमम्भसा हन्त हन्त महतामुदारता ॥ " इति अन्यत्र विस्तरः ।

५१८. **पान्थानिति** । पान्थान् पथिकान् अन्धानिति । विरह-

इत्थं च बोद्धव्यम् —

गगनगहनमार्गे श्लौमयी कापि वापी
नियतममृतपूर्णा तीव्रहन्त्री क्लमानाम् ।
लसति ननु यदस्यां लक्ष्म शक्रोपलाभं
जनकनृपतिकन्ये! शैवलं तत्तु मन्ये ॥ ५१९ ॥

प्राकारमाकलय साधुसुधोपलिप्तं
राकारजन्यधिषबिम्बमनङ्गनेतुः ।
शङ्कस्व पङ्कजमुखि त्वमिमं कलङ्क-
मुत्सङ्गसङ्गतमनोकहसङ्गमस्य ॥ ५२० ॥

अथवा —

शङ्के वेधाश्शशधरमये स्थापयन् रौप्यपीठे
सालग्रामं स्नपयति पयोधारया चिह्नरूपम् ।
ज्योत्स्नाबिम्बात् प्रणयिनि ततः क्षीरपूरं क्षरन्तं
जीवञ्जीवः पिबति च विधूदारपादामृतेप्सुः ॥ ५२१ ॥

वेदनयेतिबोध्यम् । मालिन्यमिति कलङ्कात् । साधूनां चक्रं साधु यथा तथा चक्रवाकपक्षिणं च । सतां नक्षत्राणां साधूनां च । प्राप्तकामाभिवृद्धिः मन्मथ-वृद्धिकरः, कामातुरश्च । राजा चन्द्रः नृपश्च । दोषाकर इति दोषाणामाकरः निशाकर इति च । मुग्धः शिवः तस्य अवतंसः, मुग्धानां मूर्खाणामवतंसः । काव्यलिङ्गम् ।

५१९. **गगनेति** । श्लौमयी चन्द्ररूपिणी कापि वापी लसति । तन्मध्ये इन्द्रनीलोपलाभं यत् लक्ष्म भाति तत् वापीस्थं शैवालमित्यर्थः । रूपकं उत्प्रेक्षा च, तयोस्संकरः ।

५२१. **शङ्के इति** । चन्द्ररूपे रजतपीठे, कलङ्करूपे सालग्रामं क्षीरधारया वेधाः स्नपयति । विधूदारेति । विधुः विष्णुः चन्द्रश्च तस्य उदारपादामृतं श्रीपादतीर्थं । जीवञ्जीवः चकोरः, क्षरन्तं क्षीरपूरं

अपि च —

स्नातस्मिन्धुजले द्युदेवयजनं सार्धं प्रविश्योडुभिः
पत्नीभिर्नवनीतपाण्डुरतनुर्भृत्वाङ्ककृष्णाजिनम् ।
पीनः पर्वणि दीक्षितः कुवलयक्षेमाय सोमाध्वरी
प्राप्तः काश्र्यमनुक्षणं नवसुधाहव्यैर्यजिष्णुः सुरान् ॥ ५२२ ॥
उदयगिरिदरीचरं कुरङ्गं
कमपि कलङ्कमिषादयं गृहीत्वा ।
चरमगिरिवने विहर्तुकाम-
श्चलति सुराध्वनि चन्द्रमाः किरातः ॥ ५२३ ॥

किं बहुना —

अन्तस्सन्ततरूढबाडबशिखाप्रौढज्वरप्रज्वल-
त्पारावारशरीरपुष्टिघटनागोक्षीरधारामयैः ।
विश्वास्कन्दनतत्परस्मरमहावीराट्टहासायितैः
लोकानन्दकरैः करैर्दश दिशः प्रोर्णोति पूर्णो विधुः ॥ ५२४ ॥

पिबतीत्यर्थः । सालग्रामशिलाभिषेकक्षीरं भागवतः कश्चित् पिबतीति च गम्यते । समासोक्तिः ।

५२२. स्नात इति । द्यौः अन्तरिक्षं, तदेव देवयजनं यागशाला । नवनीतमिव पाण्डरतनुः नवनीतेन पण्डरतनुरिति च । यज्ञदीक्षितानां नवनीताभ्यञ्जनं शास्त्रप्रसिद्धम् । तथा कलङ्कमेव कृष्णाजिनं वर्णसाम्यात् । कुवलयस्य भूमण्डलस्य, उत्पलस्य च । सोम एवाध्वरी यजमानः, सोमयागकर्ता च । अनुक्षणं काश्र्यं कृष्णपक्षे चन्द्रः विभर्ति । दीक्षितश्च, आहारवर्जनादनुक्षणं काश्र्यं दत्ते । सुधारूपैर्हव्यैः । अन्यत्र अमृततुल्यैः हव्यैः । रूपकम् ।

५२४. अन्तरिति । प्रोर्णोति आच्छादयति । ऊर्णुञ् आच्छादने इति धातोर्लटि रूपम् ।

पश्येदानीम्—

इह ज्योत्स्नावीचीपरिचयवदिन्दूपलचय-
क्षरत्सारार्कर्क्षपितपरितापस्सुवदने ।
स्मराध्यायाचार्यः स्मितकुवलयाश्लेषसुरभिः
मरुद्भिम्भः कुम्भस्तनि हृदयमेतन्मदयति ॥ ५२५ ॥

अपि च —

स्फुटकुमुदसगन्धाः फुल्लकल्हारमाध्वी-
कणहरणतुषाराः क्लान्तिहारिप्रचाराः ।
मदनसमदनागाः मानिनीमानचोराः
मलयगिरिसमीराः मन्दमन्दं वलन्ते ॥ ५२६ ॥

किं च —

पाण्ड्यस्त्रैणवतंसकोत्पलगलन्माध्वीकपाथेयिन-
श्चोलीचम्पकमाल्यकम्पनदशासम्पन्नधूलीभराः ।
कर्णाटीस्तनचैलचालनमिलत्कालेयकालेपनाः
स्पन्दन्ते मरुतस्सुखाय सविधारामालया मालयाः ॥ ५२७ ॥

हन्तेदानीम् —

एणाङ्कः कुमुदं करैर्दलयति क्रूरः स्मरो मां शरैः
सुस्निग्धं द्रवतीन्दुकान्तपटलं चेतश्च मुग्धे मम ।
आलेढुं मुहुरभ्युदञ्चति रसं ज्यौत्स्नं चकोरीगणो
मद्वक्त्रं च तवाधरामृतरसं मन्दस्मिते लक्ष्यताम् ॥ ५२८ ॥

---

५२५. इहेति । स्मराध्यायाचार्यः कामोद्दीपकः, मरुद्भिम्भः मन्दमारुतः, हृदयं मदयतीत्यन्वयः ।

५२७. पाण्ड्येति । पाण्ड्यस्त्रीसमूहशिरोभूषणकुवलयस्रवन्मधुबृन्दवहाः, चोलस्त्रीचम्पकमाल्यकम्पनसम्पन्नधूलीभराः, कालेयकं सुगन्धिहरिद्राविशेषः, सविधाऽऽरामस्थाः मालया मारुताः दक्षिणवाताः सुखाय स्पन्दन्ते चलन्तीत्यर्थः ।

५२८. एणाङ्क इति । ज्योत्स्नाया इदं ज्यौत्स्नम् । मन्दस्मिते इति सम्बोधनम् ।

इति मुहुरतिरागादीरयन् भूमिपुत्री-
मसमविशिखबाणैरर्दितो रामभद्रः ।
मधुरमधरबिम्बं मैथिलीयं स चुम्ब-
न्ननयत परिरम्भं हन्त वक्षोजकुम्भम् ॥ ५२९ ॥

अथ पुनः कचग्रहणदशानिष्पन्नपुष्पवर्षस्सरभसपरिरम्भसमयतरल-तरकनकवलयकाञ्चीमञ्जीरमुखाभरणपुञ्जोदञ्चितमञ्जुशिञ्जितहृद्य-वाद्यविशेषस्स॰लगलकुहरगलदतुलमणितपरिकलितरतिदयिततमविजय-काहलीकध्वनिविलासो मधुररदनवसनबिम्बचुम्बनाडम्बरजृम्भितदीर्घ-सीत्कारतरङ्गसंघटितमङ्गलसङ्गीतभङ्गीकः पटुरचितचटुवचनचयसमुपचित-वन्दिजनसमुचितस्तवविस्तरसरणिः अतिपृथुलकुचयुगलनिर्दयपरिमर्दन-शिथिलितगुणमणिहारतारमौक्तिकमणिवितातिपरिपतनस्पष्टीकृतलाजवृष्टिः विविधनखक्षतविभ्रमाहितलोहितविशदीकृतकुङ्कुमसेचनकेलिः वीरायित-डोलायिततपनीयताटङ्कयुगलनिहितपद्मरागशकलपटलप्रसृमरकिरणझर-परिकल्पितनीराजनविधिरतनूत्सवः समजनि जानकीराघवयोः ॥५३०॥

रतिविरतिदशायां लम्भितानन्दभूमा
कुवलयरसशीतः कोमलो वातपोतः ।
श्रमजलकणहारी जानकीदाशरथ्योः
अदिशत सुखनिद्रामम्बुजानामिवाक्ष्णाम् ॥ ५३१ ॥

अथ पुनः —

अहह दधदवस्थामम्बरभ्रंशदुस्थां
निबिडतमतमोभिर्न्यक्कृतालोकशक्तिः ।
तरलतरकराग्रस्तारकेशस्तदानी-
ममृतरुचिरवाक्षीद्वार्धकं वार्धिबन्धुः ॥ ५३२ ॥

---

५३०. अथेति । जानकीराघवयो रतोत्सववर्णनं स्पष्टम् ।

५३२. अहहेति । अहहेत्याश्चर्ये । अम्बरस्य वस्त्रस्य भ्रंशः स्रंसनम् । अम्बरादाकाशात् भ्रंशश्च । तेन दुःस्थां दुष्टाम् । आलोकः दृष्टिः प्रकाशश्च । तारकेशः धवलकेशः । तारकाणामीशश्च । वार्धकं वृद्धत्व-मवाक्षीत् । वहेर्लुङ् । निदर्शनालङ्कारः ।

गवाक्षप्रोदञ्चन्मलयपवने केलिभवने
सुपर्यङ्के पङ्केरुहवति सुखस्वापनिभृतम् ।
स्थिता द्वारोपान्ते तदनु सहसीतं रघुपतिं
प्रबोधं नेष्यन्तः प्रजगुरिति वैतालिकजनाः ॥ ५३३ ॥
जय जय रघुनाथ मुञ्च शय्यां
जगदिदमेधय शीतलैः कटाक्षैः ।
जननयनमधुव्रतावलिस्ते
मुखकमलं परिचुम्ब्य मोदमेतु ॥ ५३४ ॥
कुवलयदलनस्फुरत्करः
कुवलयपालनबद्धकङ्कणात् ।
रघुवर भवतः कलानिधि-
श्चकित इवैष बलात्पलायते ॥ ५३५ ॥
वाचंयमानि वदनैस्सह दीक्षितानां
श्रीरामचन्द्र कुमुदान्यधुना भवन्ति ।
निर्यान्ति सम्भ्रममुपेत्य बहिर्भ्रमर्यः
साकं स्नुषाभिरचिरेण सरोजतल्पात् ॥ ५३६ ॥
गन्धं वहन्ती नलिनी सरागा
मन्दं हसन्ती दधती मधूनि ।
भासां निधेरागमनं प्रियस्य
प्रतीक्षते वासकसज्जिकेव ॥ ५३७ ॥

॥ अथ प्राभातिकप्रबोधादिवर्णनम् ॥

५३५. **कुवलयेति** । कुवलयं भूमण्डलं, तत्पालनबद्धकङ्कणा-दित्यर्थः ।

५३६. **वाचंयमानीति** । स्नुषाभिः वधूभिस्सह । स्नुषाः किल गृहसंस्करणार्थं उषस्येवोत्तिष्ठन्तीति भावः । सहोक्तिः ।

५३७. **गन्धमिति** । वासकसज्जिकाख्यनायिकेव नलिनी सूर्यागमनं प्रतीक्षत इत्यर्थः ।

निर्गत्य पङ्कजगृहान्नियमेन भृङ्गाः
बद्धासना निकटनिष्कुटपादपेषु ।
नूनं प्रबोधयितुमेव भवन्तमेते
गायन्ति वन्दिन इव स्पृहणीयरागम् ॥ ५३८ ॥

एकं कोकयुगं विहाय वसुधालोकेऽधुना केवलं
संश्लेषं सकलो विमुञ्चति शनैः स्त्रीपुंसवर्गो मिथः ।
विश्वस्मादखिलेक्षणक्षणकरी विद्राति निद्रादशा
हित्वा कैरविणीं निशान्तशयितां मुक्त्वापि च स्वैरिणीम् ॥ ५३९ ॥

रविश्च कितवश्च वा रघुपते रजन्यागमे
विमुक्तचरमम्बरं ननु पुनर्जिघृक्षत्यसौ ।
पतन्ति बत पुष्करे बलिभुजस्तथा षट्पदाः
निमज्जति च सद्गणो नभसि निर्मले चाम्भसि ॥ ५४० ॥

---

५३९. **एकमिति** । एकं चक्रवाकमिथुनं विना, सकलः स्त्रीपुंस वर्गः वसुधालोके भूलोके, मिथः संश्लेषं सङ्गमं, शनैः विमुञ्चति । चक्रवाक पक्षिणामेव दिवा सङ्गमप्रसिद्धेः । ईक्षणस्य क्षणो नाम, निर्व्यापारस्थितिः, "निर्व्यापारस्थितौ कालविशेषोत्सवयोः क्षणः" इत्यमरः । तत्करी निद्रादशा कैरविणीं निशान्ते उषसि शयितां स्वैरिणीं च हित्वा विश्वस्मात् जनात् । विद्राति अपगच्छति । तयोरेव उषसि स्वापादिति भावः ।

५४०. **रविरिति** । रविश्च कितवश्च वा । रविश्च कितवश्चेत्युभाषित्यर्थः । रजन्यागमे रात्र्यागमे, विमुक्तचरं त्यक्तपूर्वम् । अम्बरं वस्त्रम् आकाशं च । पुनर्जिघृक्षति ग्रहीतुमिच्छति । तथा बलिभुजः वायसाः, षट्पदाः भ्रमराश्च, पुष्करे आकाशे कमले च । सद्गणः, नक्षत्रमण्डलं साधुसमूहश्च । साधवो हि उषःकाले अम्भसि स्नानमाचरन्ति । नक्षत्रमण्डलं नभसि लीनं भवतीत्यर्थः । दिवा तेषामप्रकाशात् ।

आरोहति प्रथमशैलमनूरुरुच्चैः
अस्ताद्रिमिन्दुरपि कुण्ठितपादशक्तिः ।
श्लिष्यत्यनङ्ग इह राम रथाङ्गचित्तं
तूर्णं तदेतदवलोकय मुक्तनिद्रः ॥ ५४१ ॥

अन्तर्वहन्तौ नियमेन कृष्णं
हृताब्जशोभाविह पुष्पवन्तौ ।
सानूरुभासावुदयास्तशैलौ
समानकालं समया प्रयातौ ॥ ५४२ ॥

त्वद्वंशाधिप एत्वपश्चिमगिरिं त्वं राम बाह्याङ्गणं
स्वालोकेन बहिर्गतं स तु तमो हन्याद्भवानान्तरम् ।
अम्भोजेषु विकासमर्पयतु स स्वान्तेषु च त्वं सता-
मादत्तां स पवित्रमर्घ्यसलिलं दत्तां च भक्त्या भवान् ॥ ५४३ ॥

---

५४१. **आरोहतीति** । कुण्ठितपादशक्तिः कुण्ठितगमनशक्तिः । रथाङ्गचित्तं चक्रवाकचित्तं, अनूरोः कुण्ठितपादशक्तेश्च शैलारोहणं, अनङ्गस्य अङ्गरहितस्य, रथाङ्गालिङ्गनं चेत्याश्चर्यमालोकयेति भावः ।

५४२. **अन्तरिति** । कृष्णं कलङ्कं नारायणं च । अब्जः चन्द्रः, अब्जं कमलं च । सानूरुभासौ अनूरोररुणस्य, भासा सह वर्तमानस्सूर्यः, अन्यत्र सानुनि उरुः महती भाः यस्य, तादृशश्चन्द्रः । उदयास्तशैलौ समया इत्यन्वयः । पुष्पवन्तौ सूर्यचन्द्रौ प्रयातौ ।

५४३. **त्वदिति** । त्वद्वंशाधिपः सूर्यः । अपश्चिमगिरिमुदयाचलं यातु । त्वं बाह्याङ्गणं बाह्यप्रदेशं । स्वप्रकाशेन स तु सूर्यस्तु, बहिः प्रसृतं तमः अन्धकारं, हन्यात् नाशयेत् । भवान्, आन्तरं तमः अज्ञानं हन्यात् । स तु अम्भोजेषु पद्मेषु विकासमर्पयतु । त्वं सतां स्वान्तेषु च विकासं प्रसादं अर्पय । सः अर्घ्यतीर्थमादत्तां प्रतिगृह्णातु, भवान् भक्त्या अर्घ्यं दत्तां ददातु ।

इत्यादिकाभिरित्यादरपूर्विकाभिर्वैतालिकमधुरगीतिभिरनवद्यवाद्य-विशेषघोषैश्च लब्धप्रतिबोधो रघुनाथो मन्दसुन्दरगमनाभ्यां चरणनलिनाभ्यां परिकर्मीकृतपादुकायुगलः करुणारसशीकरशीतलाभिः कटाक्षसुधाझरीभिरात्मचरणपरिचरणैकधनानाश्रितजनानभिषिञ्चन् बाह्याङ्गणं तावदलङ्करोति स्म ॥ ५४४ ॥

ततस्तु,

रचिताचमनादिको रघूणा-
मधिपोऽसावरविन्दगन्धसान्द्रैः ।
अभिषेकमकल्मषस्सिषेवे
बहुतीर्थोपहृतैः पयोभिरच्छैः ॥ ५४५ ॥

अवस्त पीताम्बरमम्बुजेक्षणो
नवस्तटित्वानिव विद्युतं शुभाम् ।
अधत्त पुण्ड्रं च मृदाऽवदातया
महेन्द्रनीलाद्रिरिवार्जुनं घनम् ॥ ५४६ ॥

रक्षांसि हन्त रविमात्मकुलस्य नाथं
बाधन्त एव परमेष्ठिवरप्रसादात् ।
इत्याग्रहादिव तदार्घ्यजलाशुगेन
व्यद्रावयद् द्रुतममूनि स रामभद्रः ॥ ५४७ ॥

---

५४४. इत्यादिकाभिरिति । इत्यादिभिर्वन्दिगीतिभिः वाद्यघोषैश्च प्रबोध्यमानो रघुनाथः बाह्याङ्गणमलंचकारेत्यर्थः ।

५४७. रक्षांसीति । आत्मकुलस्य रघुवंशस्य नाथं सूर्यं, ब्रह्मवरबलाद्बाधन्ते । प्रत्यहमुदयादिकाले इति शेषः । अत्र "रक्षांसि हवा पुरोनुवाके तपोग्रमतिष्ठन्त, तान् प्रजापतिर्वरेणोपामन्त्रयत तानि वरमवृणीतादित्यो नो योद्धा इति" इत्यादिश्रुत्यर्थोऽनुसन्धेयः । अर्घ्यजलाशुगेन अर्घ्यतीर्थरूपबाणेन तानि रक्षांसि रामभद्रो व्यद्रावयदिति । उदयकाले यथाविधि अर्घ्यप्रदानं कृतवानित्यर्थः ।

धनुर्वेदाभ्यासे मम गुरुरगुण्या ऋषिरभूत्
श्रुतीनामेषाऽसत्कुलपतितनूनां च जननी ।
वरेण्यं भर्गस्तद्द इति च तदन्तःस्थितमिति
प्रमोदाद्गायत्रीं बहुतरमजापीद्रघुपतिः ॥ ५४८ ॥

जरत्या अपि भारत्या जननीं समुपास्य ताम् ।
उद्यन्तमृग्भिरादित्यं उपास्थित स पार्थिवः ॥ ५४९ ॥

पत्या रघूणां प्रयतेन भक्त्या पत्नीयुतेन प्रतिपादितानाम् ।
त्रेताभिधः काल इवाऽथ देशोप्यासीद्दशानां शुचिराहुतीनाम् ॥ ५५० ॥

ततः कृतनित्यकृत्यः, तपःफलं तपनकुलस्य, तपोधनानामापद्धनं, तरसाशनानां मनस्तापपावकजनेररणिः, आश्रितलोकशोकतमसां तरणिः, आभरणमयोध्यायाः, आयतनं विक्रमाणां, अकूपारो रसानां, सौन्दर्यश्रियो विहारमन्दिरं, सम्पल्लतानां आलवालस्थानं, समावेशनिवेशनं सर्वविद्यानां, सङ्केतनिकेतनं सर्वगुणानां, सर्वस्वं जनकतनयायाः, सञ्जीवनमञ्जनासूनोः, अवतंसोत्पलमवनीवनितायाः मरकतविभूषणं विभीषणस्य, साम्राज्यसामग्री सुग्रीवस्य, प्रावृडम्बुदो भक्तजनकेकिनः प्रत्यर्थिप्रतापदावानलजृम्भणस्य च, ग्रीष्मसमयः क्षुद्रकबन्धकासारस्य,

---

५४८. **धनुर्वेदेति** । अत्र गायत्र्या विश्वामित्रऋषिः । गायत्री वेदमाता

" यो देवस्सविताऽस्माकं धियो धर्मादिगोचराः ।
प्रेरयेत्तस्य यद्भर्गस्तद्वरेण्यमुपास्महे ॥ " इति गायत्र्यर्थश्च अनुसन्धेयः ।

५४९. **जरत्या इति** । जरत्याः पुराण्याः, भारत्याः श्रुतेरपि जननीमित्यन्वयः । उपास्थित, ष्ठा-धातोर्लुङ् ' उपान्मन्त्रकरणे ' इत्यात्मनेपदम् ।

५५०. **पत्येति** । त्रेताभिधः कालः त्रेतायुगरूपः, अन्यत्र त्रेतेत्यभिधा यस्य तादृशो देशः " अग्नित्रयमिदं त्रेता " इत्यमरः । शुचिः शुद्धः वह्निश्च ।

॥ अथ गद्ये श्रीरामगुणवर्णनम् ॥

५५१. **तत इति** । श्रीरामचन्द्रः भ्रातृभिस्सह चिरमयोध्यानगरीं

वसन्तसमयो बहुमुखपलाशविदळनस्य, शरत्समयस्सकलराजहंसानां हेमन्तसमयस्सकलविद्विषां हृदयपङ्कजस्य, निखिलजगदभिरामो निखिलगुणाभिरामः, श्रीरामचन्द्रश्चन्द्र इवोदयाद्रिं भद्रासनमधिरूढो भ्रातृभिरमात्यैः पौरवर्गैश्चोपासितश्शतक्रतुरिव अमरावतीं शशास चिरमयोध्यानगरीम् ॥ ५५१ ॥

॥ श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेतश्रीरामचन्द्रपरब्रह्मणे नमः ॥

इति

श्रीवादिहंसाम्बुदाचार्यवंशावतंसश्रीकाञ्चीनगरनायकतातार्यभागिनेय-
वाजपेयसर्वपृष्टाप्तोर्यामादियाजिश्रीश्रीनिवासाचार्यतनूभवस्य
श्लेषयमकचक्रवर्तिनः रघुनाथार्ययज्वनस्तनयेन श्रीश्रीनिवास-
कृपातिशयसुविदितनयेन सीताम्बागर्भसम्भवेन
श्रीमदात्रेयवेङ्कटाध्वरिकविना विरचितः

उत्तरचम्पूप्रबन्धः सम्पूर्णः

श्रीलक्ष्मीहयवदनपरब्रह्मणे नमः

शशास परिपालयामास ।

"दशवर्षसहस्राणि दशवर्षशतानि च ।
भ्रातृभिः सहितः श्रीमान् रामो राज्यमकारयत् ॥"

इति श्रीमद्रामायणमनुसन्धेयम् ।

इति

श्रीशैलकुलतिलक चतुर्वेदशतक्रतु विद्वदवतंस ज्ञानवैराग्यशेवधि श्रीमन्नृसिंह-
तातार्यमहादेशिकचरणाम्बुजचञ्चरीकायमाणेन तद्वंश्येन श्रीभूतपुरी-
संस्कृतकलाशालाभूतपूर्वन्यायवेदान्ताध्यापकेन न्यायवेदान्त-
शिरोमणिना श्रीकृष्णतातार्येण प्राक्तनव्याख्यानुसारेण
विरचिता उत्तरचम्पूव्याख्या सम्पूर्णा

शुभमस्तु

शुद्धाशुद्धपत्रिका

Page	Line	For	Read
3	12	इति/यद्दुर्यशः	इति यददुर्यक्षः
		वेदोप सर्जन	विध्युप् सर्जन
8	7	प्रबन्धमिव	प्रबन्धवत्
	16	प्रापितः	प्रापितः जटायुः येन तस्मै
	26	वारण परिपन्र्या	वारणः परिपन्र्था
9	1	बलान्	बलात्
	11	वंशेन्द्रपुळसय	वशेन्द्र! पुलस्तय
	22	तिरस्कारः।	तिरस्कारः,
10	8	मुदूह्य	मुदुह्य
13	17	दर्शनेन	दर्शनेन अभ्रमतङ्ग. जस्य ऐरावतस्यापि भयमित्यनिशयोति
14	20	उत्पाद्यमानो	उत्पाद्यमानेन
16	11	सम्भाषणमिव	सम्भाषमाणमिव
	16	समुद्रं आपि प्राप्तम्	समुद्रः आपि प्राप्तः
	18	कथनान्	कथना द्विरोधः।
	19	सचेतनोक्तिरपि	सचेतन त्वोक्तावपि
17	11	पवनप्राप्त	पवनपानप्राप्त
	25	पतितुम्	पतितुमिच्छया
21	17	आत्मभुजेत्यर्थः	आत्मबलेत्यर्थः

जीयाद् गीर्वाणभारती

ACHARYA VIDYAPEETHAM

NEW DELHI-11

AIMS and OBJECTS

To provide facilities for the teaching of Sanskrit on traditional lines;

To conduct classes for the study of the Vedas and Upanishads as well as other ancient and modern classics;

To organise talks and discussions on Sanskrit literature;

To underake the editing and publication of valuable books with commentary, translation etc.;

To organise and conduct a library containing books and periodicals connected with Sanskrit learning and Indian culture.

Copies of the UTTARACHAMPU are available from:
Sri S. Varadachari, 42 Chitrakulam North Street,
Mylapore, Madras 4.
Sri S. Ananthachari, A/47 Pandara Road, New Delhi-11

Complimentary copies are now available only from:

Kumaravadi **A. NARAYANAN / A. VASUDEVAN**
274, MIG FLATS, PRASAD NAGAR,
NEW DELHI-110 005.
Phone: 011-25710645.